No. ११६५ क

Title श्रीविद्यायाः विशेषपूजा पद्धति

Author

Extent २४६ पत्र Age

Subject तन्त्र


श्रीविद्यापद्धतिः

श्रीगणेशायनमः

सूचीपत्रमिदम् श्रीविद्यायाः

श्रीविद्यायाः विशेषपूजापद्धतिः उपयोगिविषयसहिता १२६

सुदर्शनात्मजः प. १



श्री
१

ॐश्रीगुरवेशिवायोंनमः ॐनमोविघ्नहर्त्रेसिद्धिकर्त्रेनमः हेरंबंक्षे
त्रपालंचवागीशंवटुकंतथा श्रीगुरुंनाथमानंदभैरवंभैरवीपरां १
प्रणम्यसंविन्मार्गस्थानागमज्ञानगुरूत्तमान् प्रायश्चित्तंप्रवक्ष्यामि
सर्वतंत्राविरोधतः २ साधकानांचपुत्राणांदीक्षितानांशिवागमे यो
गिनीवीरमेलापेप्रसादःसुलभःखलु ३ मनसश्चंचलत्वाच्चसत्वही
नतयापिच कामिनीनांचसंसर्गात्कर्महीनैश्चकालतः प्रायश्चित्त
विहीनस्यफलभोगायकेवलं सर्वसाक्षीमहादेवोनरकानसृजत्प्रभुः

तस्मात्सर्वप्रयत्नेनप्रायश्चित्तमिहैवतत् कृतस्यकर्मणःकुर्यादनुता
पोभवेद्यदि ६ प्रामादिकमहादोषप्रविलापनकारणं प्रायश्चित्तं
परंसत्यंश्रीगुरोःपादुकास्मृतिः ७ यस्यश्रीपादरजसारंजतेमस्त
केशिवः रमतेसहपार्वत्यातस्यश्रीपादुकास्मृतिः ८ योमोहतमसा
क्रांतमुद्धरेदंधकूपतः केवलंकृपयानाथस्तस्यश्रीपादुकास्मृतिः ९
यस्यैतेलोकमखिलंसच्चिदानंदलक्षणं पश्यतेस्वगुणैःसाक्षात्तस्य
श्रीपादुकास्मृतिः १० यस्मैसर्वस्वमात्मानमप्येकीकृत्यभक्तितः

श्री
२

समर्पयतितद्विष्णुस्तस्यश्रीपादुकास्मरतिः ११ यमाश्रित्यात्मविज्ञानसंविदेमरगायामहे हेतुकेंद्रःशिवता
मूर्त्तीस्तस्यश्रीपादुकास्मरतिः १२ यस्मिन्सृष्टिस्थितिध्वंसपिधानानुग्रहात्मकं प्रकाशतेपंचकृत्यंतस्यश्री
पादुकास्मरतिः १३ मूलेहृदिललाटेचद्वादशांतेपरःशिवः यस्याज्ञामात्रमायन्नस्तस्यश्रीपादुकास्मरतिः
अत्यंतदृढभेदस्यपशोःपाशविमोचनं यमाहुःशांभवीवाचस्तस्यश्रीपादुकास्मरतिः १५ यस्यपादतलेसिंधुः
पादाग्रेकुलपर्वताः गुल्फेनक्षत्रवृंदानितस्यश्रीपादुकास्मरतिः १६ वनस्पतिस्तथारोम्णिशतंरुद्राश्च
जंघयोः जान्वोश्चतेत्रसंदोहस्तस्यश्रीपादुकास्मरतिः १७ दुर्गाश्चसिद्धवीरेंद्रालिंगमूलेचभैरवाः लिंगा
ग्रेस्मरसोयस्यतस्यश्रीपादुकास्मरतिः १८ आधारेपरमाशाकिनीभिश्चक्रेरुद्राज्ञयोः योगिनीनांचतुः
षष्टिस्तस्यश्रीपादुकास्मरतिः १९ हृदयेमातरःकंठेपीठाःपीठोपपीठयोः चिबुकेयस्यदेवाश्चतस्य
श्रीपादुकास्मरतिः २० यन्नाःकपोलयुग्मेचजिह्वाग्रेचसरस्वती यस्यदंतेषुमंत्राश्चतस्यश्रीपादुकास्म
तिः २१ स्कंधेचखेचरादेवानेत्रेचतेजसांत्रयं लिंगत्रयंललाटेचतस्यश्रीपादुकास्मरतिः २२ इडा
पिंगलयोरंतर्गंगाचयमुनातथा मध्येसरस्वतीयस्यतस्यश्रीपादुकास्मरतिः २३ शुक्लारक्तपद
द्वंद्वंमस्तकेयस्यराजते शांभवंचतयोर्मध्येतस्यश्रीपादुकास्मरतिः २४ गुरुःशिवोगुरुर्विष्णुर्

गुर्ब्रह्मा गुरुः परः गुरुरग्निर्गुरुर्मंत्रो भानुर्विंदुस्तथैव च २५ अन्यत्सर्वं समर्पंचं निष्प्रपंचो गुरुस्तुतिः
तस्माच्छ्रीपादुकाध्यानं सर्वपापनिकृंतनं २६ पालनाद्दुरितच्छेदात्कामितार्थप्रपूरणात् पादु
काशब्दमात्रार्थविमर्षनः श्रीभिश्च जयेत् इतिशास्त्रार्थसंकेतरहस्यं कुलशासने शक्त्याहासवपादु
क्रमस्माभिर्गुर्वनुग्रहात् २८ श्रीगुरोः पादुकास्तोत्रं प्रातरुत्थाय यः पठेत् न पश्यंति सर्वपापानि वह्नि
नात्तूलराशिवत् पठितव्यं प्रयत्नेन श्रोतव्यं भक्तिशालिभिः भोगमोक्षार्थिभिस्तस्मात् सद्भिरागमपा
रगैः ३० इति श्रीमद्गुरुवरपादुकास्तुतिः समाप्ता ॥ ॥
ॐ श्रीमद्गुरुपादुकाभ्यो नमः श्रीभैरव उवाच महादेवि गणेशस्य वरदस्य महात्मनः कवचं ते प्रव
क्ष्यामि वज्रपंजरकाभिधं अस्य श्रीमहागणपतिवज्रपंजरकवचमंत्रस्य श्रीभैरव ऋषिः गायत्रं छं
दः श्रीमहागणपतिर्देवता गं बीजं ह्रीं शक्तिः कुरु कुरु कीलकं वज्रविद्यासिद्ध्यर्थे श्रीमहागण
पतिवज्रपंजरकवचपाठे विनियोगः ॐ विघ्नेशं विश्ववंद्यं सुविपुलयशसं लोकरक्षाप्रदक्षं साक्षात्स
र्वापदाशप्रशमनसुमतिं पार्वतीप्राणसूनुं प्रायः सर्वासुरेंद्रैः ससुरमुनिगणैः साधकैः पूज्यमानं
कारुण्येनांतरायामितभयशमनं विघ्नराजं नमामि ॐ ह्रीं श्रीं गं शिरः पातु महागणपतिः प्रभुः वि

श्री
ग

3

नायकोललाटंमेविघ्नराजोभ्रुवौमम पातुनेत्रेगणाध्यक्षोनासिकांमेगजाननः श्रुतीमेवतुहेरंबोगं
डौमेमोदकाशनः हैमातुरोमुखंपातुचाधरौपात्वरिंदमः दंतान्ममैकदंतोव्याद्वक्रतुंडोवताद्रसान्
गांगेयोमेगलंपातुस्कंदौसिंहासनोवतु विघ्नांतकोभुजौपातुहस्तौमूषकवाहनः उरोममावतान्नि
त्यंदेवस्त्रिपुरघातनः हृदयंमेकुमारोव्यात्जयंतःपार्श्वयुग्मकं प्रद्युम्नोमेवतात्पृष्ठंनाभिंशंकरनंद
नः कटिंनंदिगणःपातुशिश्नंवीरेश्वरोवतु मेढ्रंमेवतुसौभाग्योभृंगिरीटीचगुह्यकं विराटस्त्वाव
तादूरूजानूमेपुष्पदंतकः विभुर्ममावताज्जंघेगुल्फौवत्सगणोवतु पादौचित्रगणःपातुपादयो
लोहितोवतु पादपृष्ठेसुंदरोव्यान्नूपुराढ्योवपुर्मम विधारोजठरंपातुभूतानिचोग्ररूपकः शिर
सःपादपर्यंतंवपुःसप्तगणोवतु पादादिमूर्धपर्यंतंवपुःपातुविनर्तकः विस्मारितंतुयत्स्थानं
गणेशस्तत्सदावतु पूर्वेमांह्रींकरालोव्यादाग्नेयेविकरालकः दक्षिणेपातुसंहारोनैरृतेरुरुभैर
वः पश्चिमेमांमहाकालोवायौकालाग्निभैरवः उत्तरेमांसितास्योव्यादैशान्यामसितात्मकः
प्रभातेशतपत्रोव्यात्सहस्रारस्तुमध्यमे दंतमालेदिनांतेमांनिशिपात्रेसदावतु कलशोमांनिशी
थेव्यान्निशांतेपरशुस्तथा सर्वत्रसर्वदापातुशंखयुग्मंचमद्वपुः ॐॐराजकुलेहहौरणभयेह्रींह्रीं

ह्रुंद्युतेवता चूंह्रींश्रींशत्रुगर्वेहेशाषीजलभये ह्लींक्लींवनांतेवतु ह्रांह्रूंह्रैंह्रौंशंसत्वभीतिषुमहाव्या
ध्यार्तिषुह्रौंगंगौं नित्यंयक्षपिशाचभूतफणिषुग्लौंगंगणेशोवतु इतीदंकवचंगुह्यंसर्वतंत्रेषु
गोपितं वज्रपंजरनामेदंगणेशस्यमहात्मनः अंगभूतमनुमयंसर्वाचारैकसाधनं विनानेनन
सिद्धिःस्यात्पूजनस्यजपस्यच तस्मात्तत्कवचंपुण्यंपठेद्वाधारयेत्सदा तस्यसिद्धिर्महादेविक
रस्थापारलौकिकी यंयंकामयतेकामंतंतंप्राप्नोतिपावतः अर्धरात्रेपठेन्नित्यंसर्वाभीष्टफलंल
भेत् इतिगुह्यंसुकवचंमहागणपतेःप्रिये सर्वसिद्धिमयंगुप्तंगोपयेत्परमेश्वरि इतिश्रीदेवी
रहस्येतंत्रेमहागणपतिकवचंसमाप्तम् ॥ ॥
ॐशृणुवक्ष्यामिकवचंसर्वसिद्धिकरंप्रिये पठित्वाधारयित्वाचमुच्यतेसर्वसंकटात् अज्ञात्वा
कवचंदेविविघ्नेशस्यमनुंजपेत् सिद्धिर्नजायतेतस्यकल्पकोटिशतानिच आमोदश्चशिरःपा
तुप्रमोदश्चशिखोपरि संमोदोभ्रूयुगेपातुभ्रूमध्येचगणाधिपः गणक्रीडश्चक्षुर्युग्मेनासा
यांगणनायकः गणक्रीडान्वितःपातुवदनेसर्वसिद्धये जिह्वायांसुमुखःपातुग्रीवायांदुर्मु
खस्तथा विघ्नेशोहृदयेपातुविघ्ननाशश्चवक्षसि गणानांनायकःपातुबाहुयुग्मेसदामम

श्री
४

विघ्नकर्ता च यद्देवे विघ्नहर्ता च लिंगके लंबोदरः सदा पातु गुह्यदेशे ममारुणः व्यालयज्ञोपवीती
मां पातु पादयुग्मे सदा जापकः सर्वदा पातु जानुजंघे गणाधिपः हारिद्रः सर्वदा पातु सर्वांगे गणना
यकः य इदं पठते नित्यं गणेशस्य महेश्वरि कवचं सर्वसिद्ध्यर्थं सर्वविघ्नविनाशनं सर्वसिद्धिकरं सा
क्षात्सर्वपापविमोचनं सर्वदा विघ्नशमनं सर्वशत्रुभयंकरं ग्रहपीडाज्वरा रोगा ये चान्ये गुह्यकाद
यः पठनाच्छ्रवणाद्यस्य नाशमायांति तत्क्षणात् धनधान्यकरं देवि कवचं सुरपूजितं समोना
स्ति महेशानि त्रैलोक्ये कवचस्य तु हारिद्रस्य महेशानि कवचस्य च भूतले किमन्यैरसदालापैर्य
त्रायुः क्षयतामियात् इति श्रीमद्भैरवप्रोक्तं हारिद्रगणेशकवचं संपूर्णम् ॥ ॥
ॐ श्रीगणेशाय विघ्नेशाय वैभवाद्भुतकेतवे नमो निर्विघ्नमारब्धकार्यनिर्वाहहेतवे ॐकारमाद्यं प्रव
दंति संतो वाचः श्रुतीनामपि यं गृणंति गजाननं देवगणानताङ्घ्रिं भजेहमर्धेन्दुकृतावतंसं पादा
रविंदार्चनतत्पराणां संसारदावानलभंगदक्षं निरंतरं निर्गतदानतोयैस्तं नौमि विघ्नेश्वरमंबु
दाभं कृतांगरागं नवकुंकुमेन मत्तालिमालां मदपंकलग्नां निवारयंतं निजकर्णतालैः को विस्म
रेत्पुत्रमनंगशत्रोः शंभोर्जटाजूटनिवासिगंगाजलं समादाय करांबुजेन लीलाभिराराच्छिव

मर्चयंतंगजाननंभक्तियुक्ताभजंति कुमारमुक्तौपुनरात्महेतोःपयोधरौपर्वतराजपुत्र्याः प्रक्षाल
यंतंकरशीकरेणमुग्धाननंनागमुखंभजामि त्वयासमुद्धृत्यगजास्यहस्तंयेशीकराःपुष्कररन्ध्रमु
क्ताः व्योमांगनेतेविचरंतितारा:कलात्मनामौक्तिकतुल्यभासः क्रीडारतेवारिनिधौगजास्येवे
लामतिक्रामतिवारिपूरे कल्पावसानेपरिचिंत्यदेवाःकैलासनाथंस्तुतिभिःस्तुवंति नागाननेना
गकृतोत्तरीयेक्रीडारतेदेवकुमारसंघैः त्वयिक्षणंकालगतिंविहायतौप्रापतुःकंदुकतामिनेंदू
मदोल्लसत्पंचमुखैरजस्रमध्यापयंतंसकलागमार्थान् देवान्ऋषीन्भक्तजनैकमित्रंहेरंबमकारु
णमाश्रयामि पादांबुजाभ्यामतिवामनाभ्यांकृतार्थयंतंकृपयाधरित्रीं अकारणंकारणमाप्त
वाचांतंनागवक्त्रंनजहातिचेतः येनार्पितंसत्यवतीसुतायपुराणमालिख्यविषाणकोट्या तंचंद्र
मौलेस्तनयंतपोभिरराध्यमानंदघनंभजामि पदंश्रुतीनामपदंस्तुतीनांलीलावतारंपरमष्टमू
र्तेः नागात्मकोवापुरुषात्मकोवेत्यभेद्यमाद्यंभजविघ्नराजं पाशांकुशौभग्नरदंत्वभीष्टंकरै
र्दधानंकररंध्रमुक्तैः मुक्ताफलाभैःपृथुशीकरौघैः सिंचंतमंगंशिवयोर्भजामि अनेकमेकं
गजमेकदंतंचैतन्यरूपंजगदादिबीजं ब्रह्मेतियंवेदविदोवदंतितंशंभुसूनुंशरणंव्रजामि

श्री
५

न स्वांकस्थितायाथानिजवल्लभायामुखांबुजालोकलोललनेत्रं स्मरेननाङ्गंमदवैभवेनभद्रंभजेविघ्नवि
मोहनंतं येशर्वमाराध्यगजाननंत्वांसर्वाणिशास्त्राणिपठंतितेषां त्वत्तोनचान्यत्प्रतिपाद्यमेतैस्तद
स्तितत्सत्यमसत्यकल्पं हिरण्यगर्भंजगदीशितारंकविंपुराणंरविमंडलस्थं गजाननंयन्महसा
जनानांविघ्नांधकारंविलयंप्रयाति शंभोःसमालोक्यजटाकलापेशशांकखंडंनिजपुष्करेण
स्वभग्नदंतंप्रविचिंत्यमौग्ध्यादाक्रुष्टकामःशिवमाततान विघ्नार्गलानांविनिपातनार्थंयन्नारिकी
लैःकदलीफलाभैः प्रवादयंतंमदवारणास्यंप्रापुर्नरोभीष्टमहंभजेतं यज्ञैरनेकैर्बहुभिस्तपोभि
राराध्यमाद्यंगजराजवक्त्रं स्तुत्यानयायेविधिनास्तुवंतितेसर्वलक्ष्मीनिधयोभवंति इतिश्रीमत्
शारदातिलकेतंत्रेगणपतिस्तोत्रंसमाप्तमितिशिवम् ॥ ॥
ॐश्रीगणाधिपतयेनमः श्रीदेव्युवाच देवदेवमहादेवभक्तानांप्रीतिवर्धन यत्त्वयाचिंतितंपुरानाथ
किमर्थंनप्रकाशते राजराजेश्वरीदेव्यास्त्रिपुरायाःस्वभावकं कवचंयदिमेप्रीतिःकथयस्ववृष
ध्वज श्रीभैरवउवाच सहस्रलक्षवाराणिवारितासिपुनःपुनः स्त्रीस्वभावान्महादेविपुनस्त्वं
परिपृच्छसि अत्यंतगोपनंगुह्यंकवचंसर्वकामदं तथापिकथयाम्यद्यतवप्रीत्यावरानने अस्य

शिरसि मुखे

श्रीराजराजेश्वरीमहात्रिपुरसुंदरीकवचमंत्रस्य श्रीदक्षिणामूर्तिऋषिः चिदाहूच्छंदः अद्वैतरूप

पादयोः गुह्ये हृदि

णीश्रीदेव्याराधने चिच्छक्तिः पश्यावीजं श्रीमहात्रिपुरसुंदरीराजराजेश्वरीदेवता ममयथोक्तफल

सर्वांगेषु, इति ऋष्यादिन्यासः॥

साधने श्रीदेवीप्रीत्यर्थं जपे पाठे विनियोगः अथध्यानं बालार्कमंडलाभासं चतुर्बाहुं त्रिलोचनां पा
शांकुशशरांश्चापं धारयंतीं शिवां भजे भैरवी पातु शीर्षे मे देवी त्रिपुरभैरवी अक्षरी वदने बाला पातु स
र्वत्र सिद्धिदा ऐंश्रीं कंठे सदा पातु त्रिपुराख्या सरस्वती अष्टारे देवता पातु सिद्धेश्वरी ललाटके त्रिकू
टे तु सदा पातु त्रिपुरा परमेश्वरी हृदये व्यान्महाविद्या राजराजेश्वरी च सा मालिनी नाभिदेशे व्यान्
महात्रिपुरभैरवी लोपामुद्रा गुदे पातु देवी त्रयोदशीपरा मेढ्रे सा त्रिपुरा पातु त्रिपुरेशी सुखप्रदा
ह्रीं पातु गुह्यदेशे तु कामेश्वरी हरप्रिया श्रीं पातु सर्वगात्रेषु निर्मला त्रिपुरेश्वरी हंसस्वासादिनिःश्वा
सं परा निर्वाणसुंदरी हरप्रिया ब्रह्मरंध्रे पायान्मे परदेवता रतिनाथा ललाटे व्यान्नेत्रे वाग्भवमालिनी
लोपामुद्रा भ्रुवोर्मध्ये गंगे मायासदा वतु पार्वती मां ललाटे व्यान्नेत्रे नेत्रवल्लभा श्रोत्रे रतिप्रिया पा
तु घ्राणे शक्रप्रिया वतु कपोले पातु सर्वत्र चाणिमा पश्चिमे सदा ओष्ठे शंभुप्रिया पातु दंते प्राण
स्वरा तु जीवो जिह्वाप्रदेशे तु ब्रह्माव्यात्कर्परे तथा हंसः शंखे सदा पातु श्रद्धी सर्वांगके वतु हृ

ॐ श्रीमहात्रिपुरसुंदरीसर्वज्ञताश
क्तिधाम्ने अंगुष्ठाभ्यां नमः ॐ महात्रि
पुरसुंदरीनित्यतृप्तिशक्तिधाम्ने तर्जे
नीभ्यां नमः ॐ श्रीमहात्रिपुरसुंदरी
अनादिबोधशक्तिमध्यमाभ्यां नमः
ॐ श्रीमहात्रिपुरसुंदरीस्वतंत्रशक्ति अ
नामिकाभ्यां नमः ॐ श्रीमहात्रिपुरसुं
दरीनित्यमलुप्तशक्ति कनिष्ठिकाभ्यां
नमः ॐ महात्रिपुरसुंदरी अनंतशक्ति
धाम्ने करतलकरपृष्ठाभ्यां नमः इतिक
रन्यासः एवं षडंगन्यासः

श्री
९

हृल्लेखा हृदये पातु स्तनौ पातु भगप्रिया क्रोधः कण्ठौ सदा पातु पिनाकी लिंगगोचरे शीर्षादिपादपर्यंतं स
र्वांगे परमेश्वरी आधारे वाग्भवः पातु कामराजो हृदंबुजे त्रैलोक्यडामरं पातु ब्रह्मरंध्रे तु सर्वदा शीर्षं
हृदंत्रयं पातु तथा कंदे सदावतु सर्वमंत्रं कपोले व्यात् सर्वे सर्वत्र रक्षतु अणिमा पश्चिमे पातु लघिमा
चोत्तरे ऽवतु पूर्वे व्यान्महिमा सिद्धिरीशित्वा दक्षिणेवतु वशित्वा वायुनिलये ऐशे प्राकाम्यसिद्धि
दा भुक्तिसिद्धिस्तथाग्नेय्यामिच्छासिद्धिश्च राक्षसे अधः पातु प्राप्तिसिद्धिर्मोक्षसिद्धिस्तथोर्ध्वके ब्र
ह्माणी पूर्वदिग्भागे माहेशी पातु पश्चिमे कौमारी दक्षिणे पातु चोत्तरे शक्रवल्लभा ऐशान्यां वैष्णवी
पायाद्वाराही वायुमंडले चामुंडा नैरृते पातु महालक्ष्मीर्धनंजये सर्वसंक्षोभिणी रूपा मूलाधारे स
दावतु सर्वविद्राविणी पातु स्वाधिष्ठाने सुरेश्वरी सर्वाकर्षणरूपा व्यान्मणिपूरे वरानने सर्वसंस
र्वदा पातु हृदये परमेश्वरी मुद्रा सर्वोन्मदा पातु हृदयोपरि सुंदरी विशुद्धिचक्रे देवेशि पातु नित्यं महां
कुशा चक्रे नित्यं महेशानी त्रिखंडा परिरक्षतु आज्ञाचक्रे सदा पातु बीजमुद्रा विधायका सहस्रारे
महामुद्रा खेचरी पातु सर्वदा नवचक्रे स्थिता मुद्रा हृदादि पंचके ऽवतु योनिमुद्रा महामुद्रा सर्वत्र परिर
क्षतु आधारादि महाचक्रे त्रिपुरा पातु सर्वदा कामाकर्षणमुद्रा व्यात् सदाकर्षणकर्मणि बुद्ध्याक

र्षणमुद्राव्यात्परबुद्धिविकर्षणे अहंकाराकर्षिणीव्यात्सर्वाहंकारकर्षणे शब्दाकर्षणरूपाव्यात्
शब्दाकर्षेत्सर्वदा स्पर्शाकर्षणरूपाव्यात्स्पर्शाकर्षणकर्मणि रूपाकर्षणरूपाव्यात्सर्वरूपनि
रूपणे रसाकर्षणरूपाव्यात्सदासर्वरसेषुमे गंधाकर्षणरूपाव्यात्सर्वगंधोपलब्धिषु चित्ताकर्ष
णरूपाव्यान्मायाघाकृष्टकर्मणि धैर्याकर्षणरूपाव्यात्सर्वधैर्यविधौसदा स्मृत्याकर्षणरूपाव्या
त्सर्वत्रस्मृतिकर्मणि नामाकर्षणरूपाव्यान्नामव्याहरणेसदा बीजाकर्षणरूपाव्यात्सर्वबीजप्रबोध
ने आत्माकर्षणरूपाव्यात्सर्वात्माकर्षणेसदा अमृताकर्षिणीपायादमृताकर्षणेतथा शरीराक
र्षिणीपातुशरीराकर्षणेसदा सर्वकार्येषुसर्वत्रपातुमांत्रिपुरेश्वरी अनंगकुसुमापातुपूर्वस्यांदि
शिसर्वदा अनंगमेखलापातुदक्षिणेकामरूपिणी पश्चिमेसर्वदापायादनंगमदनाप्रिये उत्तरेपा
तुदेवेशित्वनंगमदनातुरा अनंगरेखाचाग्नेय्यांपातुनित्यंमहेश्वरी नैरृत्यांपातुदेवेशिसर्वदानंग
रूपिणी अनंगांकुशावायव्येपातुनित्यंसुखप्रदा अनंगमालिनीदेवीचैशान्यांपातुसर्वदा चक्रस्या
सर्वदापातुदेवीत्रिपुरसुंदरी क्षोभिणीहृदयेपातुशीर्षेविद्राविणीतथा आकर्षिणीशिखांपातु
कवचेह्लादिनीतथा सर्वसंमोहिनीनेत्रेसर्वगात्रेषुस्तंभिनी आकाशेजृंभिणीपातुपातालेतुवशंक

श्री
१

री रंजनीदेवलोकेव्याझ्न्मादिनीचभूतले सर्वार्थसाधनेपायाद्इतप्रेतालयेसदा सिद्धनामालयेपा
तुसर्वसंपत्तिरूपिणी राक्षसानांसपत्नाणांसर्वमंत्रमयीप्रिये श्मशानेनिवासेतुसर्वदेहेहृत्क्षयंक
री सर्वदासर्वदापातुदेवीत्रिपुरवासिनी सर्वसिद्धिप्रदापातुसर्वसंखेषुरक्षतु सर्वसंपत्प्रदादेवीपा
तुराजगृहेसदा सर्वप्रियंकरीपातुसर्वलोकेषुसर्वदा सर्वदापातुमांदेवीसर्वमंगलकारिणी सर्व
कामप्रदादेवीसर्ववांछासुरक्षतु ऐश्वर्यसर्वदापातुसर्वदुःखविमोचिनी सर्वमृत्युप्रशमनीपायात्
सर्वांगसुंदरीदेवीसर्वांगमभितोवतु ॥ नित्यंयमालये सर्वारंभेपातुदेवीसर्वविघ्नविनाशिनी स्नेहसौहार्दकामेषुपातुसर्वांगसुंदरी सर्व
सौभाग्यकामेषुसर्वसौभाग्यदायिनी सर्वत्रसर्वदापातुत्रिपुराश्रीःशुभप्रदा सर्वज्ञाचगृहेपातुस
र्वशक्तिमयीवने सर्वेश्वर्यप्रदामार्गेसर्वज्ञानमयीजले सर्वव्यापिषुसर्वत्रसर्वव्याधिविनाशिनी
सर्वदासर्वतःपातुसर्वाधारस्वरूपिणी सर्वपापहरादेवीसर्वमार्गेषुरक्षतु सर्वानंदमयीदेवीना
नास्त्रकृतगोचरे सर्ववैरिभयेपातुसर्वरक्षास्वरूपिणी सर्वसंकल्पकार्येषुसर्वकामफलप्रदा स
र्वत्रसर्वदापातुदेवीत्रिपुरमालिनी वशिनीवशकार्येष्वात्कामेश्वरीचस्तंभिनी मोहनेमोहिनीपा
तुउच्चाटेविमलावतु वश्यकार्येरुणापातुजयिनीजयकर्मणि सर्वेश्वरीसर्वकार्येकौलिकीभेद

कर्मणि चक्रेश्वरी पातु नित्यं देवी सिद्धेश्वरी सदा पाशांकुशधनुर्बाणा सर्वदा कामरूपिणी रक्तं तु स
ततं भद्रे सर्वज्ञायुधदेवता षडंगयुवती पातु षडंगेषु सुरेश्वरी चंडेश्वरी पातु दंडे दाने रुद्रात्मसंज्ञका का
मेश्वरी रतौ पातु युद्धे वज्रेश्वरी तथा भगमालिनी श्रीकामे सर्वत्र त्रिपुरांबिका विद्ध चक्रेश्वरी पातु सुंद
री तु शिवार्चने सर्वमंत्रेश्वरी पातु सर्वमंत्रस्य साधने योगीश्वरी स्नानकाले सर्वविद्येश्वरी प्रिये सर्ववी
रेश्वरी पायादासने शयनादिके सर्ववागीश्वरी पातु सर्ववागीशसम्पदि सर्वविद्येश्वरी पातु सर्ववि
द्यासमन्वये सर्वसिद्धेश्वरी पातु सर्वसिद्धिप्रदायिनी सर्वकार्येषु सर्वत्र पातु त्रिपुरसुंदरी कामेश्वरी त
था पातु तिथौ प्रतिपदि प्रिये भगमालिनी द्वितीयायां देवी सर्वार्थसाधनी तृतीयायां पातु नित्यं क्लि
न्ना तु मदनातुरा चतुर्थ्यां पातु भीरुंडा पंचम्यां वह्निवासिनी महाविद्येश्वरी षष्ठ्यां सप्तम्यां शिवदूतिका
अष्टम्यां तु त्वरिता पातु नवम्यां कुलसुंदरी नित्या नित्या दशम्यां तु पायात् सकलसिद्धिदा एकादश्यां नी
लपताका द्वादश्यां विजया वतु त्रयोदश्यां तु देवेशि सर्वदा सर्वमंगला ज्वालामाला चतुर्दश्यां शूलि
मायां तु चित्रिणी पंचदश्यां सदा पातु श्रीमत्त्रिपुरसुंदरी राजराजेश्वरी पातु सर्वकालेषु षोडशी
इतीदं कवचं देवि ब्रह्मलोकेषु दुर्लभं तव प्रीत्या मया ख्यातं गोपनीयं स्वयोनिवत् तव नाम्नि श्रुते दे

विसर्वयज्ञफलंलभेत् सर्वपापक्षयंयातिवांछासर्वत्रसिद्ध्यति नाम्नांशतत्रयंस्तोत्रंव्याख्यानेचापित
च्छतं तस्माच्छतत्रयंध्यानंध्यानाच्छतत्रयोमनुः मंत्राच्छतत्रयंदेविकवचंममचोदितं शुचिःस
माहितोभूत्वाभक्तिश्रद्धासमन्वितः संस्थाप्यवामभागेतुशक्तिंस्वामिपरायणीं रक्तवस्त्रसमासी
नांशिवमंत्रपरांशुभां याशक्तिःसामहादेवीशिवरूपस्तुसाधकः अन्योन्यचिंतनाद्देविविह्वलत्वमुपजा
यते शक्तियुक्तोयजेद्देविश्रीचक्रेलक्षणायते भोगैश्चमधुपर्काद्यैस्तांबूलैश्चसुवासितैः ततश्चक
वचंदिव्यंपठेदेकमनाःप्रिये तस्मात्सर्वार्थसिद्धिःस्यान्नात्रकार्याविचारणा इदंरहस्यंपरमंपरंस्व
स्त्ययनेमहत् यस्तुभक्त्यापठेद्देविशृणुयाद्वासमाहितः ससर्वांल्लभतेकामान्परेदेवीपदंव्रजेत्
सकृद्यस्तुपठेद्देविकवचंदेवदुर्लभं सर्वयज्ञफलंतस्यभवत्येवनसंशयः संग्रामेषुजयेच्छत्रून्मा
तंगानिवकेसरी दहेत्तृणंयथावह्निस्तथाशत्रूंजयेत्सदा नतस्यपरशस्त्रशस्त्राणिशरीरेप्रभवंति
हि तस्यव्याधिःकदाचिन्नदुःखंनास्तिवरानने गतिस्तस्यैवसर्वत्रवायोस्तुल्यासदाभवेत् दीर्घा॥
युःकामभोगेशोधनधान्यसमृद्धिमान् जितव्याधीरूपवान्स्याद्गुणवानपिजायते चतुर्वर्गःकरे
तस्यतिष्ठत्येवनसंशयः अन्यस्यवल्लभःसोपिपुत्रदारकुलान्वितः इहलोकेसुखीभूत्वापरेमुक्तोभ

विष्यति न तस्य दुर्गतिर्देवि कदाचिदपि जायते दुर्ग्रहाः सुग्रहा यांति वशं गच्छंति मानवाः न तस्य
विघ्नो भवति न शोकोऽपि विजायते वेतालाश्च पिशाचाश्च राक्षसाः समयप्रदाः ते सर्वे विलयं यांति कव
चस्यापि कीर्तनात् तत्र देशे न दुर्भिक्षं न च मारी प्रजायते न च रोगाः प्रजायंते नोत्पाताः प्रभवंति च त्रि
विधाश्चैव योगिन्यः स्तस्य रक्षणसन्निधौ शांतिं चैव प्रयच्छंति रक्षंति पुत्रवत्सदा शात्रवस्तद्देवेशि चिंत
नात् प्रलयं गताः विनश्यंति न संदेहो योगिन्यो भक्षयंति तान् शांतिकादीनि कर्माणि मारणादीनि
यानि च वाच्यमात्रेण देवेशि तस्य सिद्ध्यंति भूतले न पापैर्लिप्यते सोऽपि महाघोरैरपि दारुणैः न का
लस्य वशं गच्छेन्न जरया न दुःखितः सर्वदा च सुखप्राप्तिः सर्वतीर्थफलं लभेत् नानेन सदृशः कश्चि
त्कवचोऽपि विजायते देवासुरमनुष्याणां स्तवरूपं सुखावहं येन विज्ञातमात्रेण स्मर्तेनैव च सुंदरि
श्रद्धयां लभते कामान्मुक्तिमार्गं स गच्छति सर्वलक्षणहीनोऽपि स्मरणात्कल्मषापहः अहो कव
च माहात्म्यं पठमानस्य नित्यशः विनापि लययोगेन स योगसमतां व्रजेत् भूर्जत्वचि समालि
ख्य यंत्रं मंत्रविनिर्मितं मध्ये त्रिकोणं संलेख्य साध्यसाधकयोर्लिपिं तदूर्ध्वं मूलमंत्रांश्च मातृका
भिश्च वेष्टयेत् कालागुरुविमिश्रेण चंदनेनापि सुंदरि एतद्यंत्रं महेशानि सुरासुरसुदुर्लभं

श्री
९

गोरोचनाकुंकुमाभ्यांतद्बाह्येकवचंलिखेत् श्वेतसूत्रेणसंवेष्ट्यलाक्षयापरिवेष्टयेत् पंचामृतैःपंच
गव्यैस्नापयित्वाशुभेहनि संपूज्यदेवरूपांतांभूर्विदत्वाचदक्षिणां प्राणप्रतिष्ठामंत्रेणप्राणांस्तत्रनिवेश
येत् श्रुतयोनिततोध्यात्वाकेवलग्रोथनप्रदां शीर्षवश्यकरींदेविकल्यांस्तंभनकारिणीं बद्धावामभुजे
देविवैरपक्षक्षयंकरी जठरेरोगशमनीपुत्रदाहृदिसंस्थिता विद्याकरीललाटस्थाशिखायांतुशुभप्र
दा सर्वकामप्रदादेवीसर्वरोगक्षयंकरी दक्षिणेबाहुमूलेपियदितिष्ठतिसर्वदा तदासर्वार्थसिद्धिः
स्याद्यद्यन्मनसिवर्तते एतस्यकवचस्यैवपठनेधारणेप्रिये कथितंतवस्नेहाद्गोपनीयंसदाभवि
गुरोःपादप्रसादेनश्रीविद्यायदिलभ्यते तथैवकवचंदेवित्रिषुलोकेषुदुर्लभं सचदेवोहरःसाक्षात्प
त्नीचपरमेश्वरी यस्यभक्तिर्गुरौदेविकर्त्तव्यादेववत्सदा तदामंत्रस्यतंत्रस्यसिद्धिर्भवतिनान्यथा
कवचस्यतथासिद्धिर्गुटिकाचसुरेश्वरि अज्ञात्वाकवचंदेविश्रीविद्यांयोजपेत्प्रिये नचाप्नोतिफ
लंतस्याःपरेचनरकंव्रजेत् सत्यंसत्यंपुनःसत्यंसत्यंसत्यंपुनःपुनः नशक्नोमिप्रभावंहिकथितंक
वचस्यत जिह्वाकोटिशतैर्देविवक्त्रकोटिशतैरपि पंचास्येनकथंदेविवर्णितंशक्यतेमया यस्मैक
स्मैनदातव्यंसुगोप्यमतिदुर्लभं नदेयंपरशिष्यायकृपणायसुरेश्वरि गुरुभक्तिविहीनायपरहिंसा

रताय च निंदकाय कुचैलाय दांभिकायस्तरेश्वरि यो ददाति निषिद्धेभ्यः कवचं मन्त्रखोदितं तस्य
नश्यंति देवेशि विद्यायुःकीर्तिसंचयाः तं हिंसंति सदा देव्यो योगिन्यो मातृमंडलात् परे नरकमाप्नो
ति जन्मकोटिशतानि च देयं शिष्याय शांताय गुरुभक्तिरताय च सर्वलक्षणयुक्ताय येत्रमेत्रथराय च
इति श्रीमहामहेश्वरीतंत्रे श्रीमहाचक्रपीठे श्रीमहाराजराजेश्वरी श्रीमहात्रिपुरसुंदर्याः कवचं संपूर्णं ॥
ॐ श्रीदेव्यै महात्रिपुरसुंदर्यै नमः श्रीगणपतिपादपद्मेभ्यो नमः कैलासशिखरे रम्ये नानारत्नोप
शोभिते कल्पपादपमध्यस्थे नानापुष्पोपशोभिते मणिमंडपमध्यस्थे मुनिगंधर्वसेविते तं क
दाचित्सुखासीनं भगवंतं जगद्गुरुं कपालखट्वांगधरं चंद्रार्धकृतशेखरं त्रिशूलडमरुहस्तं
महावृषभवाहनं जटाजूटधरं देवं कंठे वासुकिभूषणं विभूतिभूषणं नाथं नीलकंठं त्रिलोचनं
द्वीपिचर्मपरीधानं शुद्धस्फटिकसन्निभं सहस्रादित्यसंकाशं गिरिजार्धांगभूषितं प्रणम्य शि
रसा विश्वकारणं विश्वरूपिणं कृतांजलिपुटो भूत्वा पप्रच्छ शिखिवाहनः श्रीस्कंद उवाच दे
वदेव महादेव सृष्टिस्थित्यंतकारक त्वं गतिः सर्वदेवानां त्वं गतिः सर्वदेहिनां त्वं त्राता सर्वलोका
नां दीनानां च त्वमेव हि त्वमेव जगदाधारस्त्वमेव सर्वकारणं त्वमेव पूज्यः सर्वेषां त्वत्तो नान्यास्ति

श्री
१०

मेगतिः किंगुह्यंपरमंलोकेकिमेकंसर्वसिद्धिदं किमेकंपरमंश्रेष्ठंकिंलोकेस्वर्गमोक्षदं वि
नातीर्थेनतपसाविनादानैर्विनामखैः विनालयेनध्यानेनकेनसिद्धिमवाप्नुयात् कस्मादुत्पद्यते
सृष्टिःकस्मिंश्चप्रलयोभवेत् कस्मादुत्तीर्यतेदेवसंसारार्णवसंकटात् तदहंश्रोतुमिच्छामिक
थयस्वमहेश्वर श्रीमहादेवः साधुसाधुत्वयापृष्टंमत्तोहैमवतीसुत अस्तिगुह्यतमंस्कंदक
थयिष्याम्यसंशयं सत्वंरजस्तमश्चैवब्रह्मविष्णुमहेश्वराः येचान्येबहवोभूताःसर्वेप्रकृतिसंभ
वाः सैवदेवीपराशक्तिर्महात्रिपुरसुंदरी तयाप्रसूयतेविश्वंतयाविश्वंप्रपाल्यते सैवसंहरतेवि
श्वंजगदेतच्चराचरं आधारःसर्वभूतानांसर्वरोगार्तिहारिणी इच्छाक्रियातथाज्ञानंब्रह्मविष्णु
शिवात्मिका त्रिधाशक्तिस्वरूपेणसृष्टिस्थितिविनाशिनी सृज्यतेब्रह्मरूपेणविष्णुरूपेण
पाल्यते संहरेद्रुद्ररूपेणजगदेतच्चराचरं यस्यांयोनौजगत्सर्वमद्यापिवर्ततेऽखिलं यस्यांप्र
लीयतेचांतेयस्यांचजायतेपुनः यांसमाराध्यत्रैलोक्येसंप्राप्तंपदमुत्तमं तस्यानामसहस्रंतेकथ
यामिशृणुष्वतत् अस्यश्रीमहात्रिपुरसुंदरीनामसहस्रस्तोत्रस्य श्रीभगवान्दक्षिणामूर्तिर्वामदे
वऋषिः गायत्रीछंदः समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरा

परातिरहस्याचिंत्यप्रभाववतीश्रीभगवतीदेवता ॐकारोबीजं मायाशक्तिः कामबीजंकीलकं
जीवोबीजं बुद्धिशक्तिः धर्मार्थकाममोक्षार्थेपाठेविनियोगः अथध्यानं आधारेतरुणार्कबिंबस
दृशंबीजंचवाग्भवं बीजंमान्मथमिंद्रगोपकनिभंहृत्पंकजेसंस्थितं चक्रेभालमयेशशांकरुचि
रंबीजंचतातीयकं येध्यायंतिपदत्रयंतवशिवेतेयांतिसूक्ष्मांगतिं श्रीदेव्यैनमः कल्याणीकमला
कालीकरालीकामरूपिणी कामाख्याकामदाकाम्याकामिनीकामचारिणी कालरात्रिर्महारात्रिः
कौलिनीकालरूपिणी कौमारीकरुणाकीर्तिःकलिकल्मषनाशिनी कात्यायनीकलाधाराकौ
मुदीकमलप्रिया कीर्तिदाबुद्धिदामेधानीतिज्ञानीतिवत्सला माहेश्वरीमहामायामहातेजामहेश्व
री महाजिह्वामहालोलामहादंष्ट्रामहाभुजा महामोहांधकारघ्नीमहामोक्षप्रदायिनी महादारि
द्र्यशमनीमहाशत्रुविमर्दिनी महाशक्तिर्महाज्योतिर्महासुरविमर्दिनी महाकायामहावीर्यामहा
पातकनाशिनी महामखामंत्रमयीमणिपूरनिवासिनी महाकायामहादृष्टिर्महादोषकनाशिनी
मानसीमानदामान्यामनश्चक्षुरगोचरा गणमाताचगायत्रीगणगंधर्वसेविता गिरिजागिरिशा
साध्वीगिरिस्थागिरिसंभवा चंडेश्वरीचंडरूपाप्रचंडाचंडमालिनी चर्चिताचर्चिताकाराचंडिकाचंड

श्री ११

रूपिणी यज्ञेश्वरीयज्ञरूपाजपयज्ञपरायणा यज्ञमातायज्ञभोक्त्रीयज्ञेशीयज्ञसंभवा क्रियासिद्धि
र्यज्ञसिद्धिर्यज्ञांगीयज्ञरक्षिका यज्ञक्रियायज्ञरूपायाज्ञीयज्ञक्रियालया जालंधरीजगन्माताजातवे
दाजगत्प्रिया जितेंद्रियाजितक्रोधाजननीजन्मदायिनी गंगागोदावरीगौरीगोमतीचशतद्रुका च
र्घरादेवगर्भाचदेविकाकरसंभवा सिंधुर्मंदाकिनीसिप्रायमुनाचसरस्वती चंद्रभागाविपाशाचगं
डकीविंध्यवासिनी नर्मदाकहूःकावेरीवेत्रवतीचकौशिकी महेंद्रतनयाचैवत्वहल्याचण्यका
वती अयोध्यामथुरामायाकाशीकांचीह्यवंतिका द्वारावतीचतीर्थेशीमहाकिल्बिषनाशिनी
पद्मिनीपद्महस्ताचपद्मकिंजल्कवासिनी पद्मवक्त्राचपद्माक्षीपद्मस्थापद्मसंभवा ह्रींकारीकुं
डलीधात्रीहृत्पद्मस्थासुलोचना श्रींकारभूषणालक्ष्मीः क्लींकारीक्लेशनाशिनी हरिप्रियाहरे
र्मूर्तिर्हरनेत्रकृतालया हरिवक्त्रोद्भवाशांताहरवक्षःस्थलस्थिता वैष्णवीविष्णुरूपाचविष्णुमा
तास्वरूपिणी विष्णुमायाविशालाक्षीविशालनयनोज्ज्वला विश्वेश्वरीचविश्वात्माविश्वेशीवि
श्वरूपिणी शिवेश्वरीशिवाराध्याशिवनाथाशिवप्रिया शिवमाताशिवाख्याचशिवदाशिवरू
पिणी भवेश्वरीभवाराध्याभवेशीभवनायिका भवमाताभवगम्याभवकंटकनाशिनी भवप्रि

याभवानंदाभवानीभवमोचिनी गतिर्वैष्णवासावित्रीब्राह्मणीब्रह्मवादिनी ब्रह्मेशीब्रह्मदाब्राह्मी
ब्रह्माणीब्रह्मरूपिणी दुर्गस्थादुर्गरूपाचदुर्गादुर्गतिनाशिनी सुगमादुर्गमादांतादयादोग्धीदु
रापहा दुर्गतिघ्नीदुरध्यक्षादुरदुष्कृतनाशिनी पंचस्थापंचमीपूर्णापूर्णपीठनिवासिनी सत्वस्था
सत्वरूपाचसत्वदासत्वसंभवा रजःस्थाचरजोरूपारजोगुणसमुद्भवा तमःस्थाचतमोरूपाता
मसीतामसप्रिया तमोगुणसमुद्भूतासात्विकीराजसीतमी कलाकाष्ठानिमेषाचमुहूर्तातदनंत
रा अर्धमासाचमासाचसंवत्सरस्वरूपिणी युगस्थायुगरूपाचकल्पस्थाकल्परूपिणी ना
नारत्नविचित्रांगीनानाभरणमंडिता विश्वात्मिकाविश्वरूपाविश्वपाशविनाशिनी विश्वासका
रिणीविश्वाविश्वशक्तिविचक्षणा जपाकुसुमसंकाशादाडिमीकुसुमोपमा चतुरंगीचतुर्वाहु
श्चतुराचारुहासिनी सर्वेशीसर्वदासार्वासर्वासर्वार्थदायिनी सर्वेश्वरीचसर्वाद्याशर्वाणीसर्वमं
गला नलिनीनंदिनीनंदाचानंदानंदवर्धिनी व्यापिनीसर्वभूतेषुभवमायाविनाशिनी कुली
नाकुलमध्यस्थाकुलधर्मोपदेशिनी सर्वशृंगारवेशाढ्यापाशांकुशकरोद्यता सूर्यकोटिस
हस्राभाचंद्रकोटिनिभानना गणेशकोटिलावण्याविष्णुकोट्यरिमर्दिनी दावाग्निकोटिज्व

श्री
१२

लिनीरुद्रकोट्यग्निरूपिणी समुद्रकोटिगंभीरावायुकोटिमहाबला आकाशकोटिविस्तारायम
कोटिभयंकरी मेरुकोटिसमुच्छ्रायागणकोटिसमृद्धिदा निष्कलंकानिराधारानिर्गुणागुणव
र्जिता अशोकशोकरहितातापत्रयविवर्जिता विशिष्टाविश्वजननीविश्वाद्याविश्ववर्धिनी चित्रा
विचित्राचित्रांगीहेतुगर्भाकुलेश्वरी इच्छाशक्तिर्ज्ञानशक्तिःक्रियाशक्तिःशुचिस्मिता श्रुतिःस्मृ
तिमयीसत्याश्रुतिरूपाश्रुतिप्रिया स्मृतिप्रज्ञामहातत्त्वापंचतत्त्वोपरिस्थिता पार्वतीहिमवत्पुत्री
पारस्थापाररूपिणी जयंतीभद्रकालीचत्वकुलाकुलनायिका भूतधात्रीचभूतेशीभूतस्थाभूत
भाविनी महाकुंडलिनीशक्तिर्महाविभववर्धिनी हंसाख्याहंसरूपाचहंसस्थाहंसरूपिणी
सोमसूर्याग्निमध्यस्थाब्रह्मद्वारनिवासिनी द्वादशसरोजस्थासूर्यमंडलवासिनी अकलंका
शशांकाभाषोडशारनिवासिनी हृत्पत्रतलमध्यस्थाललाटतलवासिनी डाकिनीराकिणीचैव
लाकिनीकाकिनीतथा शाकिनीहाकिनीचैवषट्चक्रक्रमवासिनी सृष्टिस्थितिविनाशात्मा
सृष्टिस्थित्यंतकारिणी श्रीकंठप्रियाश्रीकंठानादाख्याबिंदुमालिनी चतुःषष्टिकलाधारादे
हदंडसमाश्रया महाकालीद्युतिर्मेधास्वधातुष्टिर्महाद्युतिः हिंगुलामंगलाशांतिःसुषुम्णा

मध्यगामिनी पराघोराकरालाक्षीविजयाजयकारिणी हृत्पद्मनिलयाभीमामहाभैरववा
दिनी आकाशलिंगसंभूताभुवनोद्यानवासिनी महास्सूक्ष्माचकंकालीभीमरूपामहाबला मे
नकागर्भसंभूतातप्तकांचनसन्निभा अवस्थाकूटबीजाचत्रिकूटाचलवासिनी वर्णाख्यावर्णरहि
तापंचाशद्वर्णभेदिनी विद्याधरीभूतधात्रीचाप्सराश्चाप्सरप्रिया दक्षादाक्षायणीदीक्षादक्षयज्ञ
विनाशिनी यशस्विनीयशःपूर्णायशोदागर्भसंभवा देवकीदेवमाताचराधिकाकृष्णवल्लभा
अरुंधतीतथेंद्राणीगांधारीगंधमादिनी ध्यानातीताध्यानगम्याध्यानस्थाध्यानधारिणी लंबो
दरीचलंबोष्ठीजांबवतीजलोदरी महोदरीमुक्तकेशीमुक्तिकामार्थसिद्धिदा तपस्विनीतपोनि
ष्ठात्वपर्णापर्णभक्षिणी बाणचापधरावीरापांचालीपंचमप्रिया गुह्यागंभीरगहनागुह्यतत्त्वानि
रंजना अशरीराशरीरस्थासंसारार्णवतारिणी अमृतानिष्कलाभद्रासकलाकृष्णपिंगला च
क्रेश्वरीचक्रहस्तापरचक्रविनाशिनी पद्मरागप्रतीकाशानिर्मलाकाशसन्निभा ऊर्ध्वस्थाचो
र्ध्वरूपाचऊर्ध्वपद्मनिवासिनी कार्यकारणकर्त्रीचस्पर्शाख्यारूपसंस्थिता रसज्ञारसमध्यस्थागं
धस्थागंधरूपिणी परब्रह्मस्वरूपाचपरब्रह्मनिवासिनी शब्दब्रह्मस्वरूपाचशब्दाख्याशब्दव

र्जिता सिद्धिर्वृद्धिः परा वृद्धिः सत्कीर्तिर्दीप्तिमंडिता सद्गुणा शांभवी शक्तिस्तत्त्वज्ञा तत्त्वरूपिणी
श्री १३ शाश्वती भूतमाता च महाभूताधिपप्रिया स्तुतिः प्रज्ञा धर्मसिद्धिर्दत्तकन्याऽपराजिता कामसंदी
पिनी कामा सदा कामकुतूहला भोगोपचारकुशला विमला श्यामलानना भक्तानुकंपिनी मैत्री
शरणागतवत्सला क्षोभिणी मोहिनी चैव स्तंभिनी जृंभिणी तथा रथिनी ध्वजिनी सेना सर्वमंत्रम
यी त्रयी ज्ञानमुद्रा महामुद्रा योनिमुद्रा महोत्सवा सहस्रभुजा चिच्छक्तिः सहस्राक्षी शतानना
सिद्धलक्ष्मीर्महालक्ष्मी राजलक्ष्मीः सुलक्षणा यज्ञसारा तपःसारा धर्मसारा जनेश्वरी विश्वे
श्वरी विश्वश्रेष्ठा विश्वाख्या विश्वतोमुखी विश्वास्यश्रवणघ्राणा विश्वमालापरात्मिका तरुणा
दित्यसंकाशा किरणानेकसंकुला जटाजूटधरा मुख्या शुष्कमांसातिभीषणा द्वीपिचर्मपरीधा
नाचीरवल्कलधारिणी त्रिशूलडमरुकरा वनमालाविभूषणा अत्युग्ररूपिणी चोग्रा कल्पां
तदहनोपमा त्रैलोक्यसाधिनी साध्या सिद्धसाधकवल्लभा सर्वविद्यामयी सारा वैरिवर्गविदा
रिणी सुभगा सुमुखी सौम्या सुरसुधा सोमभूषणा शुद्धस्फटिकसंकाशा महावृषभवाहना
माहेशी महिषारूढा महिषासुरमर्दिनी दमनी दामिनी दांतिर्दमहाडंबरितापहा अग्निजि

ह्रामहाघोराघोराघोरतरानना नारायणीनारसिंहीन्द्रसिंहहृदयस्थिता योगेश्वरीयोगरू
पायोगमाताचयोगिनी खेचरीभूचरीचेलानिर्वाणपदसंश्रया नागिनीनागकन्याचसुरसा
नागनायिका विषज्वालावतीदीप्ताकलाशतविभूषणा भीमवक्त्रामहावक्त्रावक्त्राणांकोटि
धारिणी महाव्रताचधर्मीख्याधर्मीतिसुखदायिनी ह्रस्वमूर्धामहामूर्धाघोरमूर्धावरानना
सर्वेन्द्रियमयीमातासर्वेन्द्रियमनोमयी सर्वसंग्रामजयदासर्वप्रहरणोद्यता सर्वपीडोपशा
मनीसर्वारिष्टविनाषिनी सर्वैश्वर्यसमुत्पत्तिःसर्वग्रहविनाषिनी भीतिघ्नीभक्तिगम्याचभक्ता
नामार्तिनाषिनी मातंगीमत्तमातंगीमत्तंगकुलमंडिता गंडमंडिततांदंकागुंजाहारविभूष
णा संगीतासंगीतरसावीणावाद्यकुतूहला अमृतोदधिमध्यस्थाकटिसूत्रैरलंकृता मणि
मंडलमध्यस्थाप्रवालदशनोज्ज्वला रत्नमंदिरनिष्ठाचरत्नसिंहासनस्थिता परमानंदमुदि
तात्वीषत्प्रहसिताननाकुमुदाललितादोलालाक्षालोहितलोचना दिग्वस्त्रादेवदूतीचदे
वदेवाधिदेवता सिंहोपरिसमारूढाहिमाचलनिवासिनी अट्टाट्टहासिनीघोराघोरदैत्यवि
नाशिनी अत्युग्रारक्तवसनानागकेयूरमंडिता मुक्ताहारलतोपेतातुंगपीनपयोधरा रक्तो

श्री
१९

त्पलदलाकारामदाघूर्णितलोचना समस्तदेवतामूर्तिरक्षारत्नयकारिणी खड्गिनीशूलहस्ता च
चक्रिणीचाक्षमालिनी शंखिनीचापिनीबाणावज्रिणीवज्रदंडिनी आनंदोदधिमध्यस्थाकंठ
स्त्रैरलंकृता नानाभरणदीप्तांगीनानामणिविभूषणा जगदानंदसंभूतिश्चिंतामणिगुणा
करा त्रैलोक्यव्यापिनीतुर्याचिन्मयानंदरूपिणी त्रैलोक्यनंदिनीदेवीदुःखदुःस्वप्ननाशिनी
घोराग्निदाहशमनीराज्ञीदेवाधिशालिनी महापरापराशिन्नीमहाचौरभयापहा रागादिदोष
रहिताजरामरणवर्जिता चंद्रमंडलमध्यस्थापीयूषार्णवसंभवा सर्वदेवस्तुतादेवीसर्वसि
द्धैर्नमस्कृता अचिंत्यशक्तिरूपाचमणिमंत्रमहौषधिः स्वस्तिःस्वस्तिमतीबालामलयाच
लवासिनी धात्रीविधात्रीसंहर्त्रीरतिज्ञारतिदायिनी रुद्राणीरुद्ररूपाचरौद्रीरौद्रार्तिनाशि
नी सर्वज्ञासर्वधर्मज्ञारसज्ञादीनवत्सला अनाहतात्रिनयनानिर्वैरानिर्वृतिः परा पराघोरा
करालास्यास्त्रमाताप्रियदायिनी मंत्रात्मिकामंत्रगम्यामंत्रमातासमंत्रिणी ब्रह्मानंदामहा
रुद्रानिर्द्वंद्वानिर्गुणात्मिका धरणीधारिणीपृथ्वीधराधात्रीवसुंधरा मेरुमंदरमध्यस्थास्थिरा
शंकरवल्लभा श्रीमतीश्रीमयीश्रेष्ठाश्रीकरीश्रीविधायिनी श्रीदाश्रीपाश्रीनिवासाश्रीःस

तीश्रीमतांगतिः उमा च शार्ङ्गिणी कुब्जा कुटिला कुटिलालका त्रिलोचना त्रिलोकात्मा पुण्यदा
पुण्यकीर्तिदा अमृता सत्यसंकल्पा सत्याशा ग्रन्थिभेदिनी परेशी परमा राध्या परा विद्या परात्परा
सुन्दरांगी सुवर्णाभा सुरासुरनमस्कृता प्रजा प्रजावती धन्या धनधान्यसमृद्धिदा ईशानी भुवनेशा
नी भुवना भुवनेश्वरी अनंतानंतमहिमा जगत्सारा जगद्भवा अचिंत्यशक्तिश्चिंत्यात्मा चिंत्याचिंत्य
स्वरूपिणी ज्ञानगम्या ज्ञानमूर्तिः ज्ञानिनी ज्ञानशालिनी अमिता घोररूपा च सुधाधारा सुधावहा
भास्वरा भास्वती भीती भास्वदुत्थानशालिनी अनसूया क्षमा लज्जा दुर्लभा भुवनात्मिका विश्व
वंद्या विश्ववीरा विश्वघ्नी विश्वसंस्थिता शीलस्था शीलरूपा च शीला शीलप्रदायिनी बोधिनी बो
धकुशला रोधिनी बाधिनी तथा विद्योतिनी विचित्रात्मा विद्युत्पटलसन्निभा विश्वयोनिर्महायोनिः
कर्मयोनिः प्रियंवदा रोगघ्नी रोगशमनी महारोगज्वरापहा रसदा पुष्टिदा देवी मानदा मानवप्रि
या कुब्जांगवाहिनी चैव कुब्जा कुब्जसहोदरी शांभवी शंभुरूपा च शंभुस्था शंभुसंभवा विश्वोदरी
विश्वमाता योगमाता च योगिनी वागीश्वरी योगनिद्रा योगिनीकोटिसेविता कौलिकानंदकंदा
च शृंगारपीठवासिनी क्षेमंकरी सर्वसिद्धिर्दिव्यरूपा दिगम्बरी धूम्रवक्त्रा धूम्रनेत्रा धूम्रकेशी च धू

श्री
१५

सरा पिनाकिरुद्रावेतालीमहावेतालरूपिणी तपिनीतापिनीदीप्ताविस्त्रविद्यात्मनाश्रिता म
धराजटरातीज्ञात्वग्निजिह्वाभयापहा पद्मश्रीविश्वरूपाचपद्मगृहापद्मवाहिनी पितामाताचधाता
चपद्मपाशविनाशिनी चंद्रप्रभाचंद्रकांतिश्चंद्रकांतविभूषणा कुंकुमांकितसर्वांगीस्तथाडुडुपलो
चना शुक्लांवरधरादेवीवीणापुस्त(क)धारिणी श्वेतपद्मधरादेवीश्वेतपद्मासनस्थिता रक्तांवरधरा
दिव्यरक्तपद्मविलोचना निष्ठुराक्रूरहृदयात्वक्रूराप्रियभाषिणी स्त्रैणोपमगुणोपेतास्वरमधुरभा
षिणी विरूपाक्षीसहस्राक्षीशताक्षीवहुलोचना दुस्तरातारिणीतारातरुणीचारुरूपिणी
स्वधाधाराचधर्मज्ञाधर्मसंकेतदेशिनी भगेश्वरीभगाराध्याभगिनीभगनायिका भगविंवाभग
क्लिन्नाभगयोनिर्भगप्रदा भगेपणीभगरूपाचभगगुह्याभगावहा भगोदरीभगानंदाभगाढ्या
भगमालिनी सर्वसंक्षोभिणीशक्तिःसर्वविद्राविणीतथा मालिनीमाधवीमाध्वीमदरूपामदो
त्करा भीरुंडाचंडिकाज्योत्स्नाविश्वचक्षुस्तमोपहा सुप्रसन्नामहादूतीयमदूतीभयंकरी उन्मा
दिनीमहारूपादिव्यरूपासुरार्चिता चैतन्यरूपिणीनित्यानित्यक्लिन्नामध्रत्करा मदिरानंदकैव
ल्यामदिराक्षीमदालसा सिद्धेश्वरीसिद्धविद्यासिद्धाद्यासिद्धवंदिता सिद्धार्चितासिद्धमातासेसि

द्धिःसर्वसिद्धिदा मनोमयीगुणातीतापरज्योतिःस्वरूपिणी परेशीपारगापारापरासिद्धिःपराग
तिः विमलामोदिनीमाद्यामधुपानपरायणा वेदवेदांगजननीसर्वशास्त्रविशारदा सर्ववेदमयी वि
द्यासर्वशास्त्रमयीकथा सर्वज्ञानमयीदेवीसर्वधर्ममयीश्वरी सर्वयज्ञमयीयज्ञासर्वमंत्राधिकारिणी
सर्वसंपत्प्रतिष्ठात्रीसर्वविद्राविणीपरा सर्वसंभोगिनीदेवीसर्वमंगलकारिणी त्रैलोक्याकर्षिणीदेवी
सर्वाह्लादनकारिणी सर्वसंमोहिनीदेवीसर्वदुःखक्षयंकरी त्रैलोक्यवर्धिनीदेवदेवीसर्ववशंकरी
त्रैलोक्यरंजिनीदेवीसर्वोन्मादनवर्धिनी सर्वार्थसाधनीदेवीसर्वसंपत्तिदायिनी सर्वमंत्रमयीदेवी
सर्वद्वंद्वक्षयंकरी सर्वसिद्धिप्रदादेवीसर्वसंपत्प्रदायिनी सर्वप्रियंकरीदेवीसर्वसंतोषकारिणी स
र्वकामप्रदादेवीसर्वदुःखविमोचिनी सर्वमृत्युप्रशमनीसर्वविघ्नविनाशिनी सर्वांगसुंदरीमाता
सर्वसौभाग्यदायिनी सर्वज्ञासर्वशक्तिश्चसर्वैश्वर्यफलप्रदा सर्वज्ञानमयीदेवीसर्वव्याधिविना
शिनी सर्वाधारस्वरूपाचसर्वपापहरातथा सर्वानंदमयीदेवीसर्वरक्षास्वरूपिणी सर्वलक्ष्मी
मयीविद्यासर्वेप्सितफलप्रदा सर्वदुष्टप्रशमनीपरमानंददायिनी त्रिकोणनिलयात्रिस्थात्रिमा
तात्रितनुस्थिता त्रयीविद्यात्रयीसारात्रैलोक्येऽपित्रिपुष्करा त्रिकोदरस्थात्रिविधात्रिपुरात्रिपुरालि

श्री का त्रिधाम्नी त्रिदशीअमला त्रिज्ञी त्रिपुरवासिनी त्रिवर्णा त्रिपदी त्र्यास्या त्रिमूर्तिस्त्रिपुरेश्वरी त्रि
१९ दिवा त्रिदशेशा च त्रिभूस्त्रिपुरवासिनी त्रिपुराश्रीस्त्रिजननी त्रिसूस्त्रिपुरसुंदरी १००० इति त्रिपुर
सुंदर्या मंत्रनामसहस्रकं सर्वविघ्नप्रशमनं सर्वारिष्टविनाशनं गुह्याद्गुह्यतरं पुत्र तव प्रीत्या प्रकी
र्तितं गोपनीयं प्रयत्नेन पठनीयं प्रयत्नतः नातः परतरं पुण्यं नातः परतरं तपः नातः परतरं स्तो
त्रं नातः परतरा गतिः स्तोत्रं सहस्रनामाख्यं मम वक्त्राद्विनिर्गतं यः पठेत्प्रयतो भक्त्या शृणुया
द्वा समाहितः मोक्षार्थी लभते मोक्षं स्वर्गार्थी स्वर्गमाप्नुयात् कामार्थी प्राप्नुयात्कामान् धनार्थी
लभते धनं विद्यार्थी लभते विद्यां यशोर्थी लभते यशः कन्यार्थी लभते कन्यां सुतार्थी लभते सुता
न् गुर्विणी जनयेत्पुत्रं कन्या विंदति सत्पतिं मूर्खोपि लभते शास्त्रं चौरोपि लभते गतिं अमाव
स्यायां संक्रांतावष्टम्यां च विशेषतः पौर्णमास्यां चतुर्दश्यां नवम्यां भौमवासरे पठेद्वा पाठयेद्वा
पि शृणुयाद्वा समाहितः स मुक्तः सर्वपापेभ्यो धनेश्वरसमो भवेत् लक्ष्मीवान्सुतवांश्चैव वल्ल
भः सर्वयोषितां तस्य वश्यं भवेदाशु त्रैलोक्यं सचराचरं रुद्रं दृष्ट्वा यथा देवा विष्णुं दृष्ट्वा च दानवाः
पन्नगा गरुडं दृष्ट्वा सिंहं दृष्ट्वा यथा गजाः मंडूका भोगिनं दृष्ट्वा मार्जारं मूषकास्तथा शत्रवः प्रप

लायं तेन स्यवक्त्रावलोकनात् अग्निचौरभयं तस्य कदाचिन्नैव संभवेत् पातका विविधाः सन्ति मे

रुमंदिरसन्निभाः भस्मसाद्यांति वै देवि प्रेत्त्यणेव वह्निरूं तेयथा एकदा पठनादेव सर्वपापक्षयो भवेत्

नश्यंति सहस्रा रोगा दशधावर्ततेन च शतधा पठनादेव वाचांसिद्धिः प्रजायते सहस्रधा पठेद्य

स्तु खेचरो जायते नरः सहस्रदशकं यस्तु पठेद्देभक्तिमान्नरः सा तस्य जगतां धात्री प्रत्यक्षा भव

ति ध्रुवं लक्षपूर्णं यदा पुत्र स्तोत्रराजमिमं सुधीः भवपाशविनिर्मुक्तो मम तुल्यो न संशयः सर्व

तीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलं सर्वकर्मसु यद्धर्मं सर्वदानेषु यत्फलं सर्ववेदेषु धीतेषु यत्फ

लं परिकीर्तितं तत्सर्वं समवाप्नोति सहस्रनामकीर्तनात् अद्वैतं योगिभिर्ज्ञानैर्ज्ञानिभिर्दुर्लभं

च यत् तत्कोटिगुणितं पुण्यं सहस्रजस्यालभेन्नरः श्रुत्वा लभेत् पुत्र यत्नेः प्रज्ञावान् सर्वसंपदः देहां

ते परमं स्थानं यत्सुरैरपि दुर्लभं सयास्यति न संदेहः स्तवराजस्य कीर्तनात् भुक्त्वा भोगाननेकां

स्तु स्मरतो मोक्षमवाप्नुयात् इदं रहस्यं परमं नाख्येयं यस्य कस्यचित् दत्ते च सिद्धिहानिः स्यादित्या

ज्ञापा परमेश्वरी इति श्रीवामकेश्वरतंत्रे हरकुमारसंवादे श्रीराजराजेश्वरी महात्रिपुरसुंदरी सहस्र

नामस्तोत्रं समाप्तमिति शिवं ॥ ॥

श्री
१
17

ॐ श्रीत्रिपुरसुंदर्यै नमो नमः अस्य श्रीत्रिपुरसुंदरीतत्त्वविद्यास्तोत्रमंत्रस्य श्रीदक्षिणामूर्तिर्ऋ
षिः पंक्तिश्छंदः श्रीमहात्रिपुरसुंदरीदेवता ऐंबीजं सौंःशक्तिः क्लींकीलकं श्रीमुक्तिसाधना
र्थे तत्त्वस्तवपाठे विनियोगः अथ ध्यानं बालार्कमंडलाभासं चतुर्बाहुं त्रिलोचनां पाशांकुशश
रांश्चापं धारयंतीं शिवां भजे लक्ष्मीबीजं बीजवर्यैकमौलिं मंत्री नित्यं यो जपेद्भक्तिपूर्वं जित्वा शत्रू
न्निर्भयः साधकेंद्रः कुर्याज्ञज्ञं देवि विद्यावद्विः खे मायाबीजं यो जपेदंब नित्यं भक्त्या पीतं वीतरा
गो मनुष्यः भुक्त्वा भोगान्साधको विश्वमातर्जीवन्मुक्तो याति तत्त्वज्ञमस्यः कामार्णं ते शुक्लरूपं
जपेद्यो मंत्री रात्रौ प्रेतगेहे प्रभाते विस्तीर्णस्तुः शंभुरंभोजयोनिर्नुत्वा नुत्वा सेवते तस्य दात्रि
श्रीवाग्भवं ते हृदि संजपेद्यः प्रभातकालेथ निशीथकाले विमानमारुह्य स याति स्वर्गे रंभोर्व
शीचामरवीज्यमानः शक्तिबीजमसितं शिवमातर्यो जपेन्नवमनो निशामुखे दासतां भजति
तस्य निकेते वासवो नरपतेः कथैव का ॐकारबीजमनघं यदि साधकेंद्रो ध्यायेन्महेशहृद
ये तव मंत्रमध्ये त्रैलोक्यवामनयनाश्चरणौ तदीयौ सीमंतरत्नकिरणैरनुरंजयंति भूतिबीज
ममले हरित्त्विभं साधको हृदि चतुष्पथे जपेत् आजिमंडलगतो रिपून्निजान्सान्विजित्य स्वगृहे

स्वबीजसेतत् रमाबीजमाद्यं सितं यो जपेन्महेशि प्रभाते न रोगान्यचेताः तदा तस्य लक्ष्मीः स्वयं तं गृहे
तु भजेद्दासतां वा सखी मानवेन्द्रः त्रिकूटेति तत्त्वे सदा सर्वकाले जपेत्साधको यस्त्रिवेदस्वरूप इहस्या
द्धराया: पतिः सार्वभौमः परत्र प्रयाति गृहं तावकीनं शक्त्यार्णमंतेन तवयः प्रभाते जपेच्छिवे रक्तमनंतवी
र्ये स्त्रीणां पुरः कामरूपापरः स्यादङ्गवेन्द्रपाणामपि चक्रवर्ती वामनार्णमन्त्रे तेकनिधानं यो जपे
त्तुषस्त्रिवादिनत्रये तस्य साधकपतेः पुरः शिवे शत्रवो न हि भवंति संमुखाः कामराजमसितेतररूपं
साधको यदि जपेन्निशि मातः याति स्वर्गमधिरुह्य विमानं क्रीडते सपरिरम्भमीनकां मायार्णमीशं
भुवनेक साम्यमाद्यं जपेद्यो मदिरैकपात्रे स साधको वै विधिवत्त्रिलोकीं यथा स्वयं देवपतिर्महेशः
रमार्णं रक्ताभं कनकशिखराकारमनघं जपेन्मातर्मंत्री तव भवनसौंदर्यसहितं प्रमथगणेभ्यस्त्येवास
रितिपदिस्पृङ्गारकपथे भवेत्सद्यो मंत्री त्रिभुवनपतिस्त्रीवकरइव इति त्रिपुरसुंदर्याः स्तोत्रं श्रीमंत्र
विग्रहं रहस्यं मे च सर्वस्वं गोपनीयं महेश्वरि इति श्रीमहात्रिपुरसुंदरी स्तोत्रं संपूर्णं ॥ ॥
ॐ श्री देव्यै सदा सफलदायिन्यै नमः श्रीईश्वर उवाच अथ नाम्नां देवेशि स्तोत्रं तत्त्वनिरूपणं म
हात्रिपुरसुंदर्याः सर्वस्वं सारमुत्तमं यस्य कस्य न वक्तव्यं न द्रष्टव्यं कदाचन यस्य कस्य न दातव्यं वि

श्री नाशिष्यायधीमते अस्यश्रीत्रिपुरसुंदरीस्तोत्रराजस्य श्रीदक्षिणामूर्तिःऋषिः पंक्तिश्छंदः
१८ श्रीमहात्रिपुरसुंदरीदेवता प्रथमकूटंबीजं द्वितीयंशक्तिः तृतीयंकीलकं श्रीधर्मार्थकाम
मोक्षार्थेस्तवपाठेविनियोगः ध्यानं सूर्यकोटिसमानाभांचतुर्बाहुंत्रिलोचनां पाशांकुश
धनुर्बाणान्धारयंतींशिवांभजे शुभंवक्त्रारूढंमतियुतमनल्पेष्टफलदं सविंदुंहंमध्येयदि
जपतिभक्तस्तवमनुं तदातस्यश्रोणीवलयममरेशार्चितपदे भवेज्जित्वेकाकीन्दपजन
शिखाशेखरमणिः अनंयोदहनाधिरूढममलंवामाक्षिणीसंयुतं सिंदुंसुंदरिबिंदुमं
डितशिरस्त्वांतेस्मरेत्साधकः मूकस्यापिसुरेंद्रसिंधुजलवद्वाग्देवताभारती सद्यःपद्य
मयीमुखाब्जकुहराद्देवेशिनिर्गच्छति २ ककारोर्ध्वध्यांतात्तरमिपरमात्राम्वितमनुं स
बिंदुंचंद्रार्धांकितममलचंद्राप्तममयं जपेद्योमंत्रेशंहृदयभवनेवीरजननि त्वदीयंनिः
शोकंपदमवनिनाथःसलभते ३ वाग्भवंतवशिवेहृदिबीजंध्यायतेयदिनरोचलचित्तः
तस्यतत्त्वचरणाम्बुजनमात्राद्दासतांभजतिमंदिरेरमा ४ शक्तिबीजमनघंसुधाकरंसाध
कोयदिजपेद्धृदिभक्त्या तस्यदेववनिताश्चरणाब्जोरंजयंतिमुकुटैर्मणिभूषैः ५ नारायणी

मेकंमन्त्रमध्यसंस्थंयोध्यायतेसाधकचक्रवर्ती सुरांगनाकेलिविलासकारीपरत्रशक्रःप्राप्तकल्प
कोटि ६ मायाबीजंयोजपेन्नेमहेशितत्वंमंत्रीभक्तिमान्मुक्तिकोत्ती त्वत्सहृष्ट्यायातित्वद्धामर
म्यनाकस्त्रीभिर्वीज्यमानःसुतालेः ७ लक्ष्मीबीजंसर्वमंत्रैकतत्त्वंध्यायेन्मंत्रीतावकंविश्वमातः
भुक्त्वाभोगान्यातित्रैलोक्यराज्यंकृत्वास्थानेतावकेसाधकेशः ८ ककाराद्यंकूटंभुवनविदितंतेज
पतियो हृदंतर्मंदोवात्रिदशजननिस्यदतरपदे त्रिनेत्रोविश्वुर्वाकमलनयनःपंकजभवो भजे
द्रास्यंगेहेजननिसहसातस्यविबुधः ९ हकाराद्यंकूटंविदितमतिगम्यंशरणदं गृणातीतंश्रीणां
हृदयरचितबीजंमन्त्रमयं जपेद्ध्यायेद्दस्तेविभवमनिशंप्राप्यसहसा सुरस्त्रीभिःसार्धंचरतिभवने
नंदनवने १० सकारादिकूटंचतुर्वर्गसाध्यंपरंयोजपेत्साधकोमानसेतु शिवोविश्वरिंद्रोवि
रिंचोमहेशित्वदीयेषुपुत्रेभजेत्साधकेते ११ शक्त्याण्ठंसाधकोंतर्जपेद्योबीजंतेजोवर्धनंस्व
प्रभाते सर्वाञ्जित्वासाधकोवैरिसंघान्कुर्याद्राज्यंजन्मजन्मांतरेषु १२ वासन्मार्गमनिशंयदि
ध्यायेद्धिंडुमंडितमसाध्यलाकुलं वीरभूमिशयनेविशुद्धिजांस्तान्विसृज्यभजतेधरामिमां १३
कामराजमस्तकनिधानंयोजपेद्दिनरोभवभूत्ये सार्वभौमपरिपालितांधरांधारयेद्धिसहसा

श्री
१९

नवभक्त्या १४ मायाबीजं देवि मंत्रोत्तरस्थं राज्ञा वह्निं ध्यायते साधको यः भूमौ भूपास्तस्य पादा
ब्जयुग्मं रंजंति स्वैर्मौलिरत्नांशुभिस्तैः १५ त्वन्मंत्रांतगतं रमाणीमचलं पीयूषधाराधरं त
त्वं तच्छमतं ह्रितो जपति यो बीजं शिवे तावकं वश्यास्तस्य धराधरेश्वरसुते गीर्वाणवामभ्रुवः
पुष्पस्थापि भुनीश्वरैः कविवरैः स्तुत्यः ससेव्यो न्टपैः १६ श्रीसुंदरीस्तववरं पठते जपेद्यो श्री
मंत्रराजनिलयं विभवैकहेतुं इष्टप्रदानसमये बहुकल्पवृक्षं शीघ्रं प्रयाति त्रिदिवं स नरो विशि
ष्टः १७ इतीदं परमं तत्त्वमंगभूतं हि पंचमं महात्रिपुरसुंदर्याः स्तवराजं स्तवोत्तमं इदं पंचां
गमनिशं सुंदर्याः सारमुत्तमं गोप्यं गुप्ततमं गुह्यं गोपनीयं प्रयत्नतः सदा गुप्तं सदा गोप्यं गो
प्तव्यं पशुसंकटे राज्यं देयं शिरो देयं न देया षोडशाक्षरी गुप्तमत्यंतगुप्तं च गोपनीयं स्वयोनि
वत् अभक्तेभ्योपि पुत्रेभ्यो दत्वा नरकमाप्नुयात् विना शिष्याय नो दद्यात् साधकाग्रे न गोपये
त् दुर्जनेभ्यः सदा गोप्यं गुप्तं च शठजन्मनः सर्वदा गोपयेन्नित्यमित्याज्ञा पारमेश्वरी इ
ति श्रीमद्रुद्रयामले तंत्रे श्रीमदुमामहेश्वरसंवादे श्रीमहात्रिपुरसुंदरीतत्त्वविद्याख्यः स्तव
राजः समाप्तः इति शिवं वो भवीतुतमां साधकस्य ॥ ॥

19

ॐ कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मीस्वयंवरणमंगलदेवताभिः सेवाभिरंबतवपादसरोज
मूलेनाकारिकिंमनसिभक्तिमतांजनानां १ एतावदेवजननिस्पृहणीयमास्तेत्वद्वन्दनासुसलि
लस्थगितेपिनेत्रे सांनिध्यमुद्यदरुणायुतसोदरस्यत्वद्विग्रहस्यपरयासुधयाप्लुतस्य २ ईशित्वभा
वकलुषाःकतिनामसंतिब्रह्मादयःप्रतियुगंप्रलयाभिभूताः एकःसएवजननिस्थिरसिद्धिरा
स्तेयःपादयोस्तवसकृत्प्रणतिंकरोति लब्ध्वासकृत्त्रिपुरसुंदरितावकीनंकारुण्यकंदलितकां
तिभरंकटाक्षं कंदर्पभावसुभगाःत्वयिभक्तिभाजःसंमोहयंतितरुणीर्भुवनत्रयेपि ४ ह्रींका
रमेवतवनामगृणंतिवेदामातस्त्रिकोणनिलयेत्रिपुरेत्रिनेत्रे संस्मृत्ययमभटादिभयंविहा
यनंदंतिनंदनवनेसहलोकपालैः ५ हंतुःपुरामधिगलंपरिपीयमानःक्रूरःकथंनभविताग
रलस्यवेगः नाश्वासनाययदिमातरिदंतवार्धंदेहस्यशश्वदमृतप्लवशीतलस्य ६ सर्वज्ञतांस
दसिवाक्पटुतांप्रसूतेदेवित्वदंघ्रिसरसीरुहयोःप्रणामः किंचस्फुरन्मुकुटमुज्ज्वलमातपत्रंद्वे
चामरेचमहतींवसुधांददाति ७ कल्पद्रुमैरभिमतप्रतिपादनेषुकारुण्यवारिभिरिवांबवला
त्कटाक्षैः आलोकयत्रिपुरसुंदरिमामनाथंत्वय्येवभक्तिभरितंत्वयिदत्तदृष्टिं हंतेतरेष्वपिमनो

श्री
२.

सि निधाय चान्ये भक्तिं भजंति किल पामरदैवतेषु त्वामेव देवि मनसाहमनुस्मरामि त्वामेव नौमि
जननी शरणं त्वमेव ९ त्वद्देहमत्स्वपि तवांब विलोकितानामालोके त्रिपुरसुंदरि मां कथंचित्
नूनं मयात्त सदृशः करुणैकपात्रं जातो जनिष्यति जनो न च जायते वा १० ह्रीं ह्रीमिति प्रतिपदं ज
पतां तवाख्यां किंनाम दुर्लभमिह त्रिपुराधिवासे मालाकिरीटमदवारणमाननीया तान्सेवते
पटुमती स्वयमेव लक्ष्मीः ११ संपत्कराणि सकलेंद्रियनंदनानि साम्राज्यदानकुशलानि सरो
रुहाक्षि त्वत्सेवनानि दुरिताधनयोद्यतानि मामेव मातरनिशं कलयंतु नान्यं १२ कल्पोपसं
हृतिषु कल्पितताण्डवस्य देवस्य खंडपरशोः परभैरवस्य पाशांकुशैक्षवशरासनपुष्पबाणा
सा साक्षिणी विजयते तव मूर्तिरेका १३ लग्नं सदा भवतु मातरिदं त्वदीयं तेजः परं बहुलकुंकु
मपंकशोभि भास्वत्किरीटममृतांशुकलावतंसं मध्ये त्रिकोणमुदितं परमामृतं यत् ह्रींका
रमेव तव नाम तदेव रूपं तन्नौमि सुंदरि सरोजनिवासशीले यत्तेजसा परिणतं वियदादि
भूतं संपन्नोति सरसीरुहसंभवादिः १५ ह्रींकारत्रयसंपुटेन महता संदीपितं भक्तितः स्तो
त्रेयः प्रतिवासरं तव पुरो मातः पठेन्मंत्रवित् तस्य क्षोणिभुजो भवंति वशगा लक्ष्मीश्चिरस्था

यिनी वाणी निर्भरसूक्तिसारभविता जागर्ति दीर्घं वयः १९ इति श्रीमंत्रगर्भमहात्रिपुरसुंदरीस्तोत्रं
संपूर्णम् ॥ ॥
ॐ नमस्त्रिपुरसुंदर्यै ॥ अथ यंत्रशोधनविधिः तत्र कृतनित्यक्रियः स्वस्तिवाचनपूर्वं संकल्पं कुर्या
त् अद्येत्यादि अमुकगोत्रः अमुकदेवशर्मा अमुकदेवतायाः पूजार्थम् अमुकयंत्रसंस्कारमहं करि
ष्ये इति संकल्प्य न्यासं कुर्यात् अस्य श्रीयंत्रशोधनमंत्रस्य श्रीसदाशिव ऋषिः त्रिष्टुप्छंदः परा
शक्तिर्देवता श्रीं बीजं ह्रीं शक्तिः क्लीं कीलकं श्रीचक्रशुद्ध्यर्थे न्यासे विनियोगः इति स्मृत्वा न्या
सं कुर्यात् ततो मूलमंत्रऋष्यादिन्यासं चरेत् ततः षडंगः ततो मातृकान्यासः ततो ऽर्धनारीश्व
रन्यासः ततो लयांगन्यासः इति न्यासान् विधाय पंचगव्यमानीय हौं इति मंत्रेणाष्टोत्तरशतमभि
मंत्र्य प्रणवेन तत्र यंत्रं क्षिपेत् ततउद्धृत्य पात्रांतरे स्थापयेत् ततः पंचामृतमानीय हौमिति मं
त्रेण पूर्ववच्छोधयित्वा स्नापयेत् तत्र क्रमः प्रथमं क्षीरेण स्नापयेत् पुनर्जलेन स्नापयित्वा धू
पं दद्यात् एवं दध्ना घृतेन मधुना शर्करया च ततो गंधेन शीतजलेन चंदनेन कस्तूरीकुंकुमेन च
स्नापयित्वा ततो ऽष्टभिः कलशैः कषायजलसंपन्नैः कुंकुमगोरोचनचंदनमिश्रितैस्तोयैः स्ना

श्री पयेत् सर्वेषु पदार्थेषु शुल्लमंत्रेण स्नानं कारयेत् स्वधामंत्रेण वा ततो यंत्रमुत्तोल्य कुशाग्रेण
२१ तत्स्पृष्ट्वा ॐ यंत्रराजाय विद्महे महायंत्राय धीमहि तन्नो यंत्रः प्रचोदयात् इत्यष्टोत्तरशतमभिमं
त्र्य प्राणप्रतिष्ठां कुर्यात् ततो देवतामावाह्य षोडशोपचारैः पंचोपचारैः पूजयेद्वा ततः पट्टसू
त्रादिकं दत्वा अष्टोत्तरशतं सहस्रं वा जप्त्वा शक्तश्चेद्बलिं दद्यात् ततोऽष्टोत्तरशतं होमं कुर्यात्
प्रत्याहुतिसंपाताज्यं यंत्रे दद्यात् होमाभावे पि द्विगुणो जपः कार्यः ततो दक्षिणां दत्वा ततोऽच्छि
द्रावधारणं कुर्यात् ऐं सौः ऐं सौः चक्रेश्वरि यंत्रे सौवर्णे शोधय शोधय स्वाहेति कनकयंत्रमंत्रः
ॐ ॐ चक्रेश्वरि राजते यंत्रे शोधय शोधय स्वाहा इति राजतयंत्रमंत्रः ॐ स्त्रीं ॐ स्त्रीं ॐ श्रीं ता
म्रेश्वरि यंत्रे शोधय शोधय स्वाहा इति ताम्रयंत्रमंत्रः ॐ श्रीं ह्रीं ॐ स्फाटिकयंत्रे कुलोविके
शोधय शोधय स्वाहा इति स्फाटिकयंत्रमंत्रः इति श्रीमद्यंत्रशोधनविधिः सम्पूर्णम् ॥
इति भद्रं भवतु सदा साधकानाम् ॥ ॥

21

ॐ श्रीगुरुवरचरणकमलेभ्यो नमो नमः श्रीगणेशाय नमः अथ से श्वेतं श्वेतविलेपमाल्यवसनं वामेन
रक्तोत्पलं विभ्रत्या प्रिययेतरेण तरसाश्लिष्टं प्रसन्नाननं हस्ताभ्याममभयं वरं विदधतं शंभुस्वरूपं परं हा
लालोहितलोचनोत्पलयुगं वंदे शिरस्थं गुरुं श्रीभैरव उवाच अधुना पद्धतिं वक्ष्ये श्रीविद्यार्चनसंयुतां ग
द्यपद्यमयीं गोप्यां सकलागमनिश्चितां प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोर्चयेत् तस्य पूजा तु वि
फला शेषे च हीना यथा क्रिया ततः श्रीमान् साधको ब्राह्मे मुहूर्ते शयनतलादुत्थाय करचरणा
दि प्रक्षाल्याचम्य निजासने समुपविश्य निजशिरसि श्वेतवर्णाधोमुखसहस्रदलकमलकर्णिकां
तर्गतचंद्रमंडलसिंहासनोपरिनिषण्णं स्वगुरुं शुक्लवर्णं शुक्लालंकारभूषितं ज्ञानानंदमुदितमा
नसं सच्चिदानंदविग्रहं त्रिनयनं चतुर्भुजं ज्ञानमुद्रापुस्तकवराभयकरं वामांगे वामहस्तधृतकम
लया रक्तवसनाभरणया स्वप्रियया दक्षिणभुजेनालिंगितं सर्वदेवाधिदेवं सर्वतीर्थतीर्थं परमशि
वस्वरूपं शांतं स्वप्रसन्नं ध्यात्वा तच्चरणकमलयुगलविगलदमृतधारया स्वात्मानं स्नातं विभाव्य मा
नसैरुपचारैराराध्य लं भूम्यात्मकं गंधं श्रीगुरुश्रीपादुकायै समर्पयामि नमः हं आकाशात्मकं पुष्पं
समर्पयामि नमः यं वाय्वात्मकं धूपं समर्पयामि नमः रं वह्न्यात्मकं दीपं समर्पयामि नमः वं अमृता

श्री
२२

22

त्मकं नानानैवेद्यं समर्पयामि नमः सर्वात्मकानि फलमूलतांबूलानि च समर्पयामि नमः इत्थं
श्रीगुरुं समर्पयेत् श्रीगुरुपादुकां दशधा विमृश्य मनसा दंडवत्प्रणाममेकं कुर्यात् ध्याने सहस्रदल
पंकजे सकलशीतरश्मिप्रभं वराभयकरांबुजं विमलगंधपुष्पांबरं प्रसन्नवदनेक्षणं सकलदेवता
रूपिणं स्मरेच्छिरसि हंसगं तदभिधानपूर्वं गुरुं प्रणाममंत्रो यथा नमामि सद्गुरुं शांतं प्रत्यक्षं शि
वरूपिणं शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये श्रीगुरुं परमानंदं वंदे स्वानंदविग्रहं यस्य
सान्निध्यमात्रेण चिदानंदायते परं अखंडमंडलाकारं व्याप्तं येन चराचरं तत्पदं दर्शितं येन तस्मै श्रीगु
रवे नमः अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः नमस्ते नाथ भ
गवन् शिवाय गुरुरूपिणे विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह नवाय नवरूपाय परमार्थै
करूपिणे सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते स्वतंत्राय दयाक्लृप्तविग्रहाय परात्मने परतं
त्राय भक्तानां भव्यानां भव्यरूपिणे विवेकिनां विवेकाय विमर्शाय विमर्शिनां प्रकाशिनां प्र
काशाय ज्ञानिनां ज्ञानरूपिणे पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः सदा मच्चित्तरूपेण

विधेहिमवदासनं इतिश्रीगुरुंप्रणम्यतत्प्रसन्नंविभाव्य मनसातदाज्ञांगृहीत्वा मूलाधारेस्वर्ण
वर्णचतुर्दलकमलकर्णिकांतर्गतत्रिकोणचक्रांतर्गतशृंगाटकोपरि परांपराक्तिंकुंडलिनीमुद्य
द्दिनकरसहस्रभास्वरां विद्युत्कोटिसन्निभां पंचाशद्वर्णविग्रहांमहात्रिंशत्कलारूपिणीं स
कलमंत्रमातरं त्रिधामधामानंसर्पाकारामूर्ध्वमुखीं सर्वप्राणिजीवांसार्धत्रिवलयां विसतंतुतनी
यसींसुप्तांविभाव्य श्रीगुरूपदिष्टमार्गेण निजसहजनादेनसचेतन्यांविधाय तत्रचतुर्षुदले
षु वंनमः शंनमः षंनमः संनमः इतिपत्रेषुमध्येमूलेनचप्रादक्षिण्येनप्रपूज्य हंसइतिमंत्रेण
सर्वत्रोत्थाप्य ततःस्वाधिष्ठानेलिंगमूलेविद्रुमवर्णे षड्दलकमलेतांनीत्वा तत्र वंनमः भंनमः
मंनमः यंनमः रंनमः लंनमः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततोमणिपूरकेनाभौनीलवर्णेद
शदलकमलेतांनीत्वा तत्र डंनमः ढंनमः णंनमः तंनमः थंनमः दंनमः धंनमः नंनमः पंनमः
फंनमः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततोवक्षस्यनाहतेपिंगलवर्णेद्वादशदलकमलेतांनीत्वा
तत्र कंनमः खंनमः गंनमः घंनमः ङंनमः चंनमः छंनमः जंनमः झंनमः ञंनमः टंनमः ठंन
मः इतिपत्रेषुमध्येमूलेनचप्रपूज्य ततोविशुद्धौकंठेधूम्रवर्णे षोडशदलकमलेतांनीत्वा त

श्री
२३
23

त्र अंनमः आंनमः इंनमः ईंनमः उंनमः ऊंनमः ऋंनमः ॠंनमः ऌंनमः ॡंनमः एंनमः ऐंनमः
ओंनमः औंनमः अंनमः अः नमः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततोभ्रूमध्येआज्ञाचक्रेविद्युद्वर्णे द्वि
दलकमलेतांनीत्वा तत्र हंनमः क्षंनमः इतिपत्रयोःमध्येमूलेनचसंपूज्य ततोब्रह्मरंध्रगतसहस्र
दलकमलकर्णिकांतर्गत बिंदुरूपतेजोमयपरमशिवेनसहैकतांनीत्वा ततःस्रवतापरमामृतेन
तांसंतर्प्य तत्रनादश्रवणतत्परोमुहूर्तंलयंविभाव्य ततोऽवरोहेसर्वत्र सोहमितिमंत्रेणकमलात्
कमलंअवारोहमाणमाज्ञाचक्रादिक्रमेण तेषुतेषुकमलेषुतैस्तैरक्तैःसंपूज्यमानांतत्तदा॰॰
धारतत्तत्स्थान तत्तद्वर्ण तत्तदधिदेवताःसंतर्पयंतीं मूलाधारंप्राप्य तत्रैवस्वस्थानेस्थापयेदित्या
रोहाऽवरोहक्रमेणपरांशक्तिंकुंडलिनींध्यात्वा प्रकाशमानांप्रथमेप्रयाणेप्रतिप्रयाणेऽमृताय
मानांअंतःपदव्यामनुसंचरंतीमानंदरूपामबलांप्रपद्ये इतिध्यात्वा नाहमस्मिनचान्योस्मिध्येयेचा
त्रनविद्यते आनंदपदसंलीनेमनःसमरसीगतं अहंदेवीनचान्योस्मिब्रह्मैवाहंनशोकभाक् स
च्चिदानंदरूपोहंस्वात्मानमितिचिंतयेत् इतिसंस्मृत्य मूलाधारेवह्निमंडलेदशकलात्मकेविभा
व्य तत्रमूलविद्यायाः प्रथमकूटंवाग्भवाख्यंस्फुरत्तडिल्लताभास्वरमनाहतपर्यंतप्राप्तनादधि

खंविभाव्य अनाहते सूर्यमंडले द्वादशकलात्मकं ध्यात्वा तन्मध्ये मूलविद्यायाः कामराजाख्यं द्वितीय
कूटमुद्यदादित्यसंकाशमाज्ञाचक्रादिपर्यंतप्राप्तनादशिखमधऊर्ध्वप्रस्तरश्मिकं ध्यात्वा आज्ञा
चक्रे सोममंडले षोडशकलात्मकं विभाव्य तन्मध्ये मूलविद्यायाः शक्तिकूटाख्यं तृतीयखंडं शशि
शिप्रभं ब्रह्मरंध्रांतर्गतबिंदूर्ध्वमंडलपर्यंतप्राप्तनादशिखं ध्यात्वा ततो मूलादिब्रह्मरंध्रांतं मूलवि
द्यामुद्यद्दिनकरसहस्रभास्वरां तेजोमयीमखंडां ध्यात्वा तत्तेजसा व्याप्तं स्वदेहं विचिंत्य तत्तेज
सा परिणतां श्रीविद्यापरदेवतां स्वहृदयकमले स्वाभेदेन ध्यात्वा मानसोपचारैः संपूज्य प्राणाया
मऋष्यादिस्मरणं विदधीत यथा तत्रादौ श्रीमहागणपतेः इडयापिबषोडशभिः पवनं कुरुषष्टि
चतुष्टयमंतरगं त्यजपिंगलया शनकैः शनकैः दशभिर्दशभिर्दशभिः द्व्यधिकैः अस्य श्रीमहा
गणपतिमंत्रस्य श्रीब्रह्माऋषिः गायत्रेछंदः श्रीमहागणपतिर्देवता गंबीजं ह्रींशक्तिः नमः की
लकं मम चतुर्वर्गफलप्राप्त्यर्थे गणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः इति कृतांजलिः स्म
त्वान्यसेत् श्रीब्रह्मऋषये नमः शिरसि गायत्रछंदसे नमो मुखे श्रीमहागणपतिदेवतायै न
मः हृदि गंबीजाय नमः गुह्ये ह्रींशक्तये नमः पादयोः नमः कीलकाय नमो नाभौ मम श्रीगण

श्री
२४

पतिप्रसादसिद्ध्यर्थे जपे विनियोगः सर्वांगेषु न्यासमिति करषडंगन्यासौ ततः स्वहृदयकमले श्री
महागणपतिं ध्यायेद्यथा गजवदनमचिंत्यं तीक्ष्णदंतं त्रिनेत्रं बृहदुदरमनंतं दंतमालेंदुधारं प
रशुचषकपद्मद्वंद्वहस्तारविंदं हरिविगलनिविष्टं श्रीगणेशं भजामि इति ध्यात्वा मानसोपचारैरा
राध्य मालामादाय यथाशक्ति मंत्रं जपं विधाय पुनरपि प्राणायामऋष्यादिकरषडंगन्यासा
न्विधाय गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देव त्वत्प्रसादाद्विनायक इ
ति तेजोमयं जपफलं देवताया महस्ते समर्प्य योनिमुद्रया प्रणमेत् ततः श्रीभैरवमंत्रेण प्राणा
यामं विधाय अस्य श्रीकामेश्वरभैरवमंत्रस्य श्रीदक्षिणामूर्तिर्ऋषिः पंक्तिःछंदः श्रीकामे
श्वरो देवता श्रीं बीजं ह्रीं शक्तिः क्लीं कीलकं मम श्रीविद्यामंत्रसिद्ध्यर्थे जपे विनियोगः इति कृ
तांजलिः स्वस्वान्न्यसेत् श्रीदक्षिणामूर्तिऋषये नमः शिरसि पंक्तिच्छंदसे नमो मुखे श्रीकामे
श्वरभैरवदेवतायै नमो हृदि श्रीं बीजाय नमः गुह्ये ह्रीं शक्तये नमः पादयोः क्लीं कीलकाय न
मः नाभौ मम श्रीविद्यामंत्रसिद्ध्यर्थे जपे विनियोगः सर्वांगेषु ऐं अंगुष्ठाभ्यां नमः क्लीं तर्जनीभ्यां स्वा
हा सौंः मध्यमाभ्यां वषट् ऐं अनामिकाभ्यां हुं क्लीं कनिष्ठिकाभ्यां वौषट् सौंः करतलपृष्ठाभ्यां फ

२

ट् ऐंहृदयायनमः क्लींशिरसेस्वाहा सौंःशिखायैवषट् ऐंकवचायहुं क्लींनेत्रत्रयायवौषट् सौंःअ

स्त्रायफट् ततःस्वहृदयकमलेस्वाभेदेन श्रीपरभैरवंध्यायेद्यथा सूर्यकोटिसमानाभंचंद्रमौलिं

त्रिलोचनं पाशांकुशधनुर्बाणान्धारयंतंशिवंभजे इतिध्यात्वा मानसोपचारैराराध्य पुनरपिप्रा

णायामऋष्यादिकरषडंगन्यासान्विधाय गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं सिद्धिर्भव

तुमेदेवत्वत्प्रसादान्महेश्वर इतियोनिमुद्रयातेजोमयजपफलंदेवतावामहस्तेसमर्प्यप्राणम्यच

अस्यश्रीमहात्रिपुरसुंदरीमंत्रराजस्य श्रीदक्षिणामूर्तिःऋषिः पंक्तिःछंदः श्रीमहात्रिपुरसुंद

रीभगवतीदेवता ऐंप्रथमकूटंबीजं सौंःतृतीयंकूटंशक्तिः क्लींद्वितीयंकीलकं ममश्रीचतु

र्वर्गसिद्ध्यर्थेजपेविनियोगः इतिकृतांजलिःस्मृत्वान्यसेत् श्रीदक्षिणामूर्तिऋषयेनमःशिर

सि पंक्तिच्छंदसेनमोमुखे श्रीमहात्रिपुरसुंदरीदेवतायैनमःहृदि ऐंप्रथमकूटबीजायनमः

गुह्ये सौंःतृतीयंशक्तयेनमःपादयोः क्लींद्वितीयंकीलकायनमःनाभौ ममश्रीचतुर्वर्गसिद्ध्य

र्थेश्रीजपेविनियोगःसर्वांगेषु ऐंप्रथमंअंगुष्ठाभ्यांनमः क्लींद्वितीयंतर्जनीभ्यांस्वाहा सौंः

तृतीयंमध्यमाभ्यांवषट् ऐंप्रथमंअनामिकाभ्यांहुं क्लींद्वितीयंकनिष्ठिकाभ्यांवौषट् सौंःतृ

श्री तीयेकरतलपृष्ठाभ्यांफट् इतिकरन्यासः अथषडंगः ऐंप्रथमेहृदयायनमः क्लींद्वितीयेशिरसे
२५ स्वाहा सौंःतृतीयेशिखायैवषट् ऐंप्रथमंकवचायहुं क्लींद्वितीयंनेत्रत्रयायवौषट् सौंःतृतीयंअस्त्रा
यफट् ततःस्वहृदयकमलेस्वाभेदेनश्रीदेवींध्यायेद्यथा उद्यद्धेमरुचिरांशविचेन्द्रवह्निनेत्रांधनुः
शरयुतांकुशकामपाशान् हस्तैः भुजैस्संदधतींशिवशक्तिरूपांकामेश्वरींहृदिभजामिधृतेन्दुलेखां
इतिध्यात्वामानसोपचारैःसंपूज्य मंत्रसंस्कारंकुर्यात् तत्रादौउत्कीलनं सकलह्रींनमः हसकलह्रीं
हसकहलह्रीं इतिविर्जपेत् ह्रींह्रींह्रींहसकलह्रीं हसकहलह्रीं सकलह्रीं इतिसंजीवनेत्रिः तेन
लेथेदर्पनं इतितोटिल्यंत्रिः ऐंसौंःक्लींरुद्रशापंमोचयमोचयफट्स्वाहा इतिदशधाशापहरी
र्ध्वकेशिन्यै नमः ऋं ऋद्धिदायै नमः ॠं ॠक्षायै नमः ऌं ऌकारायै नमः ॡं ॡषायै नमः

ऐं ऐकपादायै नमः ऐं ऐश्वर्यात्मिकायै नमः ओं ओंकारात्मिकायै नमः औं औषधात्मिकायै नमः

अं अंबिकायै नमः अः अक्षरात्मिकायै नमः इति डाकिनीं ध्यात्वा षोडशदलेषु न्यसेत् त

तो नाहते द्वादशदले श्यामां शूलादिहस्तां डमरुकसहितां तीक्ष्णचक्रं वहंतीं ध्यायेद्रक्तत्रिने

त्रां भ्रुकुटिविलसद्दंष्ट्रदंतप्रभाभिः दीप्तास्यां देवदेवीं हृदयकमलगां रक्तधात्विकनाथां शु

द्धान्नेषु प्रसक्तां मधुमदमुदितां चिंतयेद्राकिणीं तां इति न्यसेत् रां रीं रूं रैं रौं रः रमलवरयऊं

राकिणि मां रक्ष रक्ष मम रक्तधातुं रक्ष रक्ष सर्वसत्ववशंकरि देवि आगच्छ २ इमां पूजां गृह्ण २

ऐं घोरे देवि ह्रीं ह्रः परमघोरे हूं घोररूपे एह्येहि नमः चामुंडे डरलकसहैं श्रीमहात्रिपुरसुंदरि देवि वर

देवि चक्रे १२ अनाहतपीठस्थे अनाहतराकिणि अनाहतनाथ देवश्रीपादुकां पूजयामि नमः

न्यसेत् कं कालरात्र्यै नमः खं खातीतायै नमः गं गायत्र्यै नमः घं घंटाधारिण्यै नमः ङं ङवर्णा

त्मिकायै नमः चं चामुंडायै नमः छं छायायै नमः जं जयायै नमः झं झंकारिण्यै नमः ञं ञव

र्णात्मिकायै नमः टं टंकहस्तायै नमः ठं ठंकारिण्यै नमः इति राकिणीं ध्यात्वा न्यसेत् ततो म

णिपूरके नाभौ हस्तां देवीं त्रिवक्त्रां त्रिनयनलसितां दंष्ट्रिणीमुग्ररूपां वज्रं शक्तिं च दंडाभयवर

श्री दद्रानन्ददत्तवामे दधानां ध्यात्वा नाभिस्थपद्मे दशदलविलसत्कर्णिके लाकिनीं तां मांसस्थां
५८ गौडभक्तोत्सुकहृदयवतीं विन्यसेत्साधकेन्द्रः ॐ लां लीं लूं लैं लौं लः लमलवरयूं लाकिनि मां र
58 क्ष २ मम मांसधातुं रक्ष २ सर्वसत्त्ववशंकरि देवि आगच्छ २ इमां पूजां गृह्ण २ ऐं घोरे देवि ह्रीं सः प
रमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे डरलकसहैं श्रीमहात्रिपुरसुन्दरि देवि विचरे देवि विच्चे डं ढं णं
तं थं दं धं नं पं फं मणिपूरकपीठस्थे मणिपूरकलाकिनि मणिपूरकनाथदेव श्रीपादुकां पूज
यामि नमः इति कर्णिकायां परितस्तद्दलदेवता लाकिनीवद्ध्यात्वा न्यसेत् ॐ डं डामर्यै नमः
ढं ढक्कारिण्यै नमः णं णंकारिण्यै नमः तं तामस्यै नमः थं स्थानदेव्यै नमः दं दाक्षायिन्यै नमः
धं धात्र्यै नमः नं नन्दायै नमः पं पार्वत्यै नमः फं फेत्कारिण्यै नमः इति ततः स्वाधिष्ठाने षड्दल
कमले स्वाधिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिनेत्रां पीताभां धारयन्तीं त्रिशिखगुणक
पालाभयान्यात्तगर्वां मेदोधातुप्रतिष्ठामलिमदमुदितां बन्धिनीत्यादिवीतां दध्यन्ने सक्तचि
त्तामभिमतफलदां काकिनीं भावयेत्तां इति कर्णिकायां ध्यात्वा ॐ कां कीं कूं कैं कौं कः कमल
वरयूं काकिनि मां रक्ष २ मम मेदोधातुं रक्ष २ सर्वसत्त्ववशंकरि देवि आगच्छ २ इमां पूजां गृह्ण २

ऐंघोरेदेविह्रींसःपरमघोरेहूंघोररूपेएह्येहिनमश्चामुंडेडरलकसहैंश्रीमहात्रिपुरसुंदरिदेवि
वरदेविच्चेवंभंमंयंरंलंस्वाधिष्ठानपीठस्थेस्वाधिष्ठानकाकिनिस्वाधिष्ठाननाथदेवश्रीपादु
कांपूजयामिनमः इतिविन्यस्य परितस्तद्दलेषुपरिवारदेवताःन्यसेत् धंवंवंधिन्यैनमः धंभंभ
द्रकाल्यैनमः धंमंमहामायायैनमः धंयंयशस्विन्यैनमः धंरंरमायैनमः धंलंलंबोष्ठ्यैनमः
इतिकाकिनीवद्ध्यात्वान्यसेत् ततोमूलाधारेचतुर्दले देवींज्योतिःस्वरूपांत्रिनयनविलस
त्पंचवक्त्रांसुदंष्ट्रां हस्ताम्भोजैस्तुचापंसृणिमपिदधतींपुस्तकंज्ञानमुद्रां मूलाधारस्थपद्मेनि
खिलपशुजनोन्मादिनीमस्थिसंस्थां शुद्धान्नप्रीतिपूर्णांमधुमदमुदितांचिंतयेच्छाकिनींतां
इतिध्यानं धंश्रांश्रींश्रूंश्रैंश्रौंश्रःश्रमलवरयूंशाकिनिमांरक्ष२ममास्थिधातुंरक्ष२सर्वसत्ववशं
करिदेविआगच्छ२इमांपूजांगृह्ण२ऐंघोरेदेविह्रींसःपरमघोरेहूंघोररूपेएह्येहिनमश्चामुं
डेडरलकसहैंश्रीमहात्रिपुरसुंदरिदेविवरदेविच्चे धंवंशंषंसंमूलाधारपीठस्थेमूलाधारशा
किनिमूलाधारनाथदेवश्रीपादुकांपूजयामिनमः इतिविन्यस्य तद्दलेषुतत्परिवारदेवतास्तद्
ध्यात्वान्यसेत् धंवंवरदायैनमः धंशंशंखिन्यैनमः धंषंषोढायैनमः धंसंसरस्वत्यैनमःइति

श्री
४९

ततो भ्रूमध्ये द्विदले भ्रूमध्ये बिंदुपद्मे द्विदलस्य ललिते शुक्लवर्णे कराब्जैर्बिभ्राणां ज्ञानमुद्रां
डमरुकसहितामक्षमालां कपालं षड्वक्त्रां मज्जसंस्थां त्रिनयनलसितां हंसवत्यादियुक्तां
हारिद्राभ्रप्रसन्नां सकलसुरनुतां हाकिनीं भावयेत्तां हां हीं हूं हैं हौं हः हमलवरयूं हाकिनि मांर
क्ष २ ममम मज्जाधातुं रक्ष २ सर्वसत्ववशंकरि देवि आगच्छ २ इमां पूजां गृह्ण २ ऐं घोरे देवि ह्रीं सः
परमघोरे हूं घोररूपे एह्येहि नमश्चामुंडे डरलकसहैं श्रीमहात्रिपुरसुंदरि देवि वरदे विच्चे धं
हं ठं: आज्ञाचक्रपीठस्थे आज्ञा हाकिनि आज्ञानाथदेव श्रीपादुकां पूजयामि नमः इति वि
न्यस्य तद्दलयोः धं हं हंसवत्यै नमः धं क्षः क्षमावत्यै नमः इति हाकिनीं ध्यात्वा न्यसेत् ततो
ब्रह्मरंध्रे सहस्रारकर्णिकायां मुंडव्योमासनस्थे सकलदलयुते याकिनी भैरवीं तां यदि
ण्याद्यां समस्तायुधललितकरां सर्ववर्णसमष्टिं डादीनां सर्ववक्त्रां सकलसुखकरीं सर्वधा
तुस्वरूपां सर्वान्नेसक्तचित्तां परशिवरसिकां भावयेत्सर्वरूपां इति ध्यात्वा धं यां यीं यूं यैं यौं
यः यमलवरयूं याकिनि मांर क्ष २ ममम शुक्रादिसर्वधातून् रक्ष २ सर्वसत्ववशंकरि आगच्छ २
इमां पूजां गृह्ण २ ऐं घोरे देवि ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुंडे डरलकसहैं श्री

महात्रिपुरसुंदरि देवि वरदे विच्चे अंआंइंईंउंऊंऋंॠं इत्यादि धँ ५० ब्रह्मरंध्रपीठस्थे ब्रह्मरंध्रयाकि
निब्रह्मरंध्रनाथदेवश्रीपादुकां पूजयामि नमः इति विन्यस्य परितः पंचाशद्देवताः याकिनीवद्धा
त्वा न्यसेत् धँ अं अमृतायै नमः धँ आं आकर्षिण्यै नमः धँ इं इन्द्राण्यै नमः धँ ईं ईशान्यै नमः धँ उं उ
मायै नमः धँ ऊं ऊर्ध्वकेशिन्यै नमः धँ ऋं ऋद्धिदायै नमः धँ ॠं ॠषायै नमः धँ लृं लृकारांति
कायै नमः धँ ॡं ॡषायै नमः धँ एं एकपादायै नमः धँ ऐं ऐश्वर्यात्मिकायै नमः धँ ओं ओंकारा
त्मिकायै नमः धँ औं औषधात्मिकायै नमः धँ अं अंबिकायै नमः धँ अः अक्षरात्मिकायै नमः धँ
कं कालरात्र्यै नमः धँ खं खातीतायै नमः धँ गं गायत्र्यै नमः धँ घं घंटाधारिण्यै नमः धँ ङं ङार्णा
त्मिकायै नमः धँ चं चामुंडायै नमः धँ छं छायायै नमः धँ जं जयायै नमः धँ झं झंकारिण्यै नमः
धँ ञं ञार्णात्मिकायै नमः धँ टं टंकहस्तायै नमः धँ ठं ठंकारिण्यै नमः धँ डं डामर्यै नमः धँ ढं ढं
कारिण्यै नमः धँ णं णंकारिण्यै नमः धँ तं तामस्यै नमः धँ थं स्थानदेव्यै नमः धँ दं दाक्षायिण्यै
नमः धँ धं धात्र्यै नमः धँ नं नंदायै नमः धँ पं पार्वत्यै नमः धँ फं फेत्कारिण्यै नमः धँ बं बंधिन्यै न
मः धँ भं भद्रकाल्यै नमः धँ मं महामायायै नमः धँ यं यशस्विन्यै नमः धँ रं रमायै नमः धँ लं लं

ढोष्ट्यैनमः ध्वँ वं वरदायैनमः ध्वँ शं शाकिन्यैनमः ध्वँ षं षोढायैनमः ध्वँ सं सरस्वत्यैनमः ध्वँ हं हंस
वत्यैनमः ध्वँ क्षं क्षमावत्यैनमः इतिमहायोगिनीन्यासंन्यसेत् अथराशिन्यासः रक्तश्वेतेहरिद्व
र्णीपांडुचित्रंसितंस्मरेत् पिशंगपिंगलोबभ्रुकर्बुरोसितधूम्रकौ इतिध्यात्वा दक्षगुल्फे ध्वँ अं आं राशीन्मेषादिकान्नित्यं ध्यात्वा न्यासं समारभेत्
इं ईं मेषायनमः दक्षजानुनि ध्वँ उं ऊं वृषायनमः दक्षवृषणे ध्वँ ऋं ॠं ऌं ॡं मिथुनायनमः दक्ष
कुक्षौ ध्वँ एं ऐं कर्कटायनमः दक्षस्कंधे ध्वँ ओं औं सिंहायनमः दक्षशिरोभागे ध्वँ अं अः शं षं सं हं क
न्यायैनमः वामशिरोभागे ध्वँ कं ध्वँ तुलाधरायनमः वामस्कंधे ध्वँ चं ध्वँ वृश्चिकायनमः वाम
कुक्षौ ध्वँ टं ध्वँ धनुषेनमः वामवृषणे ध्वँ तं ध्वँ मकरायनमः वामजानुनि ध्वँ पं ध्वँ कुंभायनमः
वामगुल्फे ध्वँ यं रं लं वं लं क्षं मीनायनमः इतिराशिन्यासः अथपीठन्यासः सितासितारुण
श्यामहरित्पीतान्यनुक्रमात् पुनः पुनः क्रमाद्देवि पंचाशत्स्थानसंचये पीठानि संस्मरेद्दि
द्धान्सर्वकामार्थसिद्धये इतिध्यात्वान्यसेत् ध्वँ अं कामरूपपीठायनमः शिरसि ध्वँ आं वारा
णसीपीठायनमः मुखे ध्वँ इं नैपालपुरपीठायनमः दक्षनेत्रे ध्वँ ईं पौंड्रवर्धनपीठायनमः वामे ध्वँ उं
काश्मीरपुरपीठायनमः दक्षकर्णे ध्वँ ऊं कान्यकुब्जपीठायनमः वामे ध्वँ ऋं पूर्णगिरिपीठायनमः दक्षनासि

ॐ ऋं अर्बुदपीठायनमः वामायां ॐ ॡं आम्रातकेश्वरपीठायनमः दक्षगंडे ॐ ॡं एकाम्र
पीठायनमः वामे ॐ एं त्रिस्रोतःपीठायनमः ऊर्ध्वोष्ठे ॐ ऐं कामकोटपीठायनमः अधरे ॐ
ओं कैलासपुरपीठायनमः ऊर्ध्वदंतेषु ॐ औं भृगुनगरपीठायनमः अधोदंतेषु ॐ अं केदार
पुरपीठायनमः ललाटे ॐ अः चंद्रपुरपीठायनमः चिबुके ॐ कं श्रीपुरपीठायनमः दक्षबा
हुमूले ॐ खं ओंकारपीठायनमः कूर्परे ॐ गं जालंधरपीठायनमः मणिबंधे ॐ घं मालवपी
ठायनमः अंगुलिषु ॐ ङं कुलांतकपीठायनमः अंगुल्यग्रे ॐ चं देवीकोट्टपीठायनमः वा
मबाहुमूले ॐ छं गोकर्णपीठायनमः कूर्परे ॐ जं मारुतेश्वरपीठायनमः मणिबंधे ॐ
झं अट्टहासपीठायनमः अंगुलिषु ॐ ञं विराजपीठायनमः अंगुल्यग्रे ॐ टं राजगृहपीठाय
नमः दक्षपादकच्छे ॐ ठं महापथपीठायनमः जानुनि ॐ डं कोल्लगिरिपीठायनमः गुल्फे
ॐ ढं एलापुरपीठायनमः अंगुलिषु ॐ णं कालेश्वरपीठायनमः अंगुल्यग्रे ॐ तं जयंतक
पीठायनमः वामपादकच्छे ॐ थं उज्जयिनीपीठायनमः जानुनि ॐ दं चरित्रापुरपीठाय
नमः गुल्फे ॐ धं क्षीरिकपीठायनमः अंगुलिषु ॐ नं हस्तिनापुरपीठायनमः अंगुल्यग्रे

श्री
५१
51

ऐं पं उड्डीशपीठाय नमः दक्षपार्श्वे ऐं फं प्रयागपीठाय नमः वामे ऐं बं षष्ठीशपुरपीठायन
मः पृष्ठे ऐं भं मायापुरपीठाय नमः नाभौ ऐं मं जलेश्वरपीठाय नमः उदरे ऐं यं मलयगिरिपी
ठाय नमः हृदि ऐं रं श्रीशैलपीठाय नमः दक्षांसे ऐं लं मेरुकपीठाय नमः ककुदि ऐं वं गि
रिवरपीठाय नमः वामांसे ऐं शं महेन्द्रपुरपीठाय नमः हृदादिदक्षपाण्यंते ऐं षं वामनपुर
पीठाय नमः हृदादिवामपाण्यंते ऐं सं हिरण्यपुरपीठाय नमः हृदादिदक्षपादांते ऐं हं म
हालक्ष्मीपीठाय नमः हृदादिवामपादांते ऐं ळं उड्याणपुरपीठाय नमः पादादिनाभ्यंते
ऐं क्षः छायापुरपीठाय नमः नाभ्यादिमूर्द्धांते इति पीठन्यासः पुनर्मातृकास्थानेषु न्यस्त
व्यः इति षोढान्यासः अथ विहितपद्मासनो मूलाधारार्पितचित्तवृत्तिः मूलं प्रणवं वा एक
गुणं स्मरन् त्रिरिडया वायुमापूर्य मूलाधारे प्रापय्यांगुष्ठानामाकनिष्ठाभिर्नासापुटौ धृत्वा ततो वायुं कुंभयि
त्वा कुंभकसमये मूलं प्रणवं वा चतुर्गुणं जपन् पुनः पिंगलया द्विगुणं तमेव जपन् वायुं शनैः शनै
रेचयेत् इत्येकः प्राणायामः विपर्ययेण द्वितीयः प्रथमवत् तृतीयः इति प्राणायामं कृत्वा मूलवि
द्यया करन्यासादि समरणं कुर्यात् अस्य श्रीमहात्रिपुरसुंदरीमंत्रराजस्य श्रीदक्षिणामूर्तिर्ऋषिः पं

+ षोढान्यासफलं श्रीयोगिनीहृदये । गणेशैः प्रथमो न्यासो द्वितीयस्तु ग्रहैर्मितः नक्षत्रैस्तु तृतीयः स्याद् योगिनीभिश्चतुर्थकः राशिभिः पञ्चमः प्रोक्तः षष्ठः पीठैर्निगद्यते षोढान्यासस्तु संप्रोक्तः सर्वत्रैवापराजितः एवं यो न्यस्तदेहस्तु स पूज्यः सर्वयोगिभिः न तस्य पूज्यो लोकेषु पितृमातृमुखो जनः स एव पूज्यः सर्वेषां स स्वयं परमेश्वरः षोढान्यासविहीनं यं प्रणमेद् देवि पार्वति सो चिरान्मृत्युमाप्नोति नरकं च प्रपद्यते +

क्तिश्छंदः श्रीमहात्रिपुरसुंदरीदेवता ऐंप्रथमंबीजं सौःतृतीयंशक्तिः क्लींद्वितीयंकीलकं म
मचतुर्विधपुरुषार्थसिद्ध्यर्थे न्यासे विनियोगः एवंन्यसेत् ऐंप्रथमंअंगुष्ठाभ्यांनमः क्लींद्विती
यंतर्जनीभ्यांस्वाहा सौःतृतीयंमध्यमाभ्यांवषट् ऐंप्रथमंअनामिकाभ्यांहुं क्लींद्वितीयंकनि
ष्ठिकाभ्यांहुं सौःतृतीयंकरतलपृष्ठाभ्यांफट् इतिकरन्यासः एवंषडंगः अस्त्रेणतालत्रयेंदत्वा
दशदिग्बंधनंकुर्यात् अथयोगपीठन्यासः तत्रोसहृदयोरुहृदयकल्पितपादचतुष्टयोगपीठं
निजदेहंध्यात्वान्यसेत् मूलाधारे धँमंडूकायनमः स्वाधिष्ठाने धँ कालाग्निरुद्रायनमः मणि
पूरे धँमूलप्रकृत्यैनमः अनाहते धँआधारशक्त्यैनमः हृदये धँकूर्मायनमः तत्रैव अनंतायन
मः धँवराहायनमः धँपृथिव्यैनमः धँ तत्रपश्चिमादिविलोमेन इक्षुरससमुद्रायनमः मदि
रासमुद्रायनमः घृतसमुद्रायनमः दुग्धसमुद्रायनमः तन्मध्ये अंआं ५५ नवखंडविराजि
तनवरत्नद्वीपायनमः तत्पश्चिमे अंआंइंईंउंऊंऋंॠंपुष्परागरत्नायनमः नैर्ऋते ऌंॡंएंऐंओं
औंअंअः वैडूर्यरत्नायनमः दक्षिणे धँकंधँनीलरत्नायनमः आग्नेये धँचंधँविद्रुमरत्नायन
मः पूर्वे धँटंधँमौक्तिकरत्नायनमः ईशाने धँतंधँमरकतरत्नायनमः उत्तरे धँपंधँवज्ररत्ना

श्री
५२

यनमः वायव्ये ॐ यं रँ गोमेधरत्नायनमः मध्यखंडे ॐ शं ॐ पद्मरागरत्नायनमः तन्मध्यखंड
मध्ये ॐ स्वर्णपर्वतायनमः तदुपरि नंदनोद्यानाय तन्मध्ये ॐ कल्पवृक्षेभ्योनमः तन्मध्ये वसंता
दिषड्ऋतुभ्योनमः तत्पश्चिमे इंद्रियाश्वेभ्योनमः तत्पूर्वे इंद्रियार्थगजेभ्योनमः तन्मध्ये विचित्र
रत्नभूमिकायैनमः तत्पश्चिमे कालचक्रेश्वर्यैनमः नैऋते मुद्राचक्रेश्वर्यैनमः दक्षिणे मातृचक्रे
श्वर्यैनमः आग्नेये रत्नचक्रेश्वर्यै पूर्वे देशचक्रेश्वर्यैनमः ईशाने गुरुचक्रेश्वर्यैनमः उत्तरे
तत्वचक्रेश्वर्यैनमः वायव्ये ग्रहचक्रेश्वर्यैनमः मध्ये मूर्तिचक्रेश्वर्यैनमः करुणातोयपरिधये
स्वर्णप्राकाराय तन्मध्ये मणिमंडपायनमः तस्यैनैऋत्यादिकोणचतुष्टयेषु वामावर्तेन काल
रूपिणीशक्त्यैनमः आकाररूपिणीशक्त्यैनमः शब्दरूपिणीशक्त्यैनमः मध्ये संगीतयोगिनी
भ्योनमः तत्रैव समस्तप्रकटगुप्तसिद्धयोगिनीचक्रेभ्योनमः तन्मध्ये मणिमयवेदिकायैनमः
श्वेतच्छत्रायनमः तदधः रत्नसिंहासनायनमः इतिहृदयएवविन्यस्य दक्षांसे ॐ ब्रह्मप्रेतास
नायनमः वामांसे विष्णुप्रेतासनायनमः वामोरौ ॐ रुद्रप्रेतासनायनमः दक्षोरौ ॐ ईश्वरप्रे
तासनायनमः सर्वांगे ह्सौंः सदाशिवमहाप्रेतपद्मासनायनमः पुनर्दक्षांसे ॐ धर्मायनमः वा

मांसे धँ ज्ञानायनमः वामोरौ धँ वैराग्यायनमः दक्षोरौ ऐश्वर्यायनमः मुखे अधर्मायनमः वा
मपार्श्वे धँ अज्ञानायनमः नाभौ अवैराग्यायनमः दक्षपार्श्वे अनैश्वर्यायनमः पुनर्हृदि माया
यैनमः विद्यायैनमः अनंतायनमः धर्मायनमः आनंदकंदायनमः संविन्नालायनमः प्रकृतिम
यपत्रेभ्योनमः विकारमयकेसरेभ्योनमः पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायैकर्णिकायैनमः
तस्यामेव अं अर्कमंडलायनमः धँ ऊं सोममंडलायनमः रं वह्निमंडलायनमः सं प्रबोधात्मने
सत्त्वायनमः रं प्रकृत्यात्मने रजसेनमः तमोहात्मने तमसेनमः अं आत्मनेनमः अं अंतरात्म
नेनमः धँ पं परमात्मनेनमः ह्रीं ज्ञानात्मनेनमः कर्णिकाचतुर्दिक्षु मध्ये च ज्ञानतत्त्वायनमः
कलातत्त्वात्मनेनमः विद्यातत्त्वात्मनेनमः परतत्त्वात्मनेनमः इति पश्चिमादिप्रादक्षिण्येन
विन्यस्य ह्लौं सर्वशक्तिकमलासनायनमः इति व्यापकं विन्यस्य तन्मध्ये श्रीचक्रं विभाव्य
मूलं समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरापररहस्यपरापरातिरहस्य
योगिनीचक्रपादुकाभ्योनमः इति सर्वांगे व्यापकं विन्यस्य धँ प्रथमकूटं शरीरात्मनेनमः
धँ द्वितीयं बुद्ध्यात्मनेनमः धँ तृतीयं प्राणात्मनेनमः इति सर्वांगे व्यापकं हृदयत्रिकोणस्या

श्री
५३
53

ग्रकोणे ॐ ऐं कामरूपपीठाय नमः ईशाने ॐ क्लीं पूर्णगिरिपीठाय नमः आग्नेये सौः
जालंधरपीठाय नमः तन्मध्यस्थबिंदौ तुरीयविद्यां स्मृत्वा ॐ महोड्याणपीठाय नमः मध्य
स्थबिंदुचक्रे नवहिरण्मयसहस्रदलकमलासनाय नमः दक्षांसपृष्ठे ॐ श्रें श्रों सौः त्रिपुरा
सुधार्णवासनाय नमः दक्षकर्णपृष्ठे ॐ ऐं क्लीं सौः त्रिपुरेश्वरीपोताम्बुजासनाय नमः दक्षल
लाटभागे ॐ ह्रीं ऐं ह्रीं क्लीं ह्रीं सौः श्रीमहात्रिपुरसुंदरीदेव्यात्मासनाय नमः दक्षनेत्रे ॐ हैं ह्क्लीं ह्सौः
त्रिपुरवासिनीसर्वचक्रासनाय नमः चिबुकदक्षभागे ॐ ह्सैं ह्स्क्लीं ह्सौः त्रिपुराश्रीसर्वमंत्रासना
यनमः हृदयत्रिकोणेषु ॐ ह्रीं ऐं ह्रीं क्लीं ह्रीं सौः ह्रें श्रीत्रिपुरमालिनीसिद्धासनाय नमः श्रें श्रों ५ं
शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृत्यहंकारबु
द्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवा
य्वग्निसलिलपृथिव्यात्मने षट्त्रिंशत्तत्त्वरूपाय श्रीमहात्रिपुरसुंदरीयोगपीठाय नमः इति सर्वांगे
व्यापकं विन्यस्य इति योगपीठन्यासः ॥ अथ श्रीचक्रन्यासः ध्याने शरीरे चिंतयेदादौ निजं श्रीच
क्ररूपिणं त्वगाद्याकारनिर्मुक्तं ज्वलत्कालाग्निसन्निभं इति स्वशरीरे श्रीचक्ररूपं ध्यात्वा

संहारक्रमेण स्थितिश्रीचक्रन्यासः स च विद्याचक्रचक्रेश्वरी अंगत्रयात्मकः तत्र प्रथमं संप्र
दायात् करशुद्धिविद्यया करशुद्धिं विधाय ततस्तथैव विन्यस्य तथैवात्मरक्षां कृत्वा न्यासमा
रभेत तत्रादौ विद्यान्यासः मूर्ध्नि ॐ प्रथमकूटं गले द्वितीयं हृदये ॐ तृतीयं दक्षनेत्रे प्रथमं
वामे द्वितीयं नासाग्रे ॐ तृतीयं दक्षकर्णे प्रथमं वामे द्वितीयं मुखे तृतीयं दक्षांसे ॐ प्रथमं वा
मे द्वितीयं पृष्ठे तृतीयं दक्षजानुनि प्रथमं वामे ॐ द्वितीयं नाभौ ॐ तृतीयं पादयोः ॐ श्रें श्रीं सौः
नमः जंघयोः ऐं क्लीं सौः नमः जान्वोः ह्रीं क्लीं सौः नमः ऊर्वोः ह्रीं क्लीं ॐ ह्रीं हक्लीं ह्सौः नमः स्फि
जोः हसैं हस्क्लीं हसौः नमः लिंगे ॐ ह्रीं क्लीं ब्लें नमः ॐ ह्रीं श्रीं सौः नमः हसैं हस्क्लीं हसौः नमः मूल
पंचदशी नमः हस्क्लीं श्रीं ब्लें नमः इति मूर्ध्नि विद्यां विन्यस्य तत्रैव हसैं हस्क्लीं हसौः नमः इत्यावा
हनीविद्यां विन्यस्य मूलविद्यया मूर्धादि पादांतं पादादि हृदयांतं व्यापकं न्यसेत् मूलाधाराद्यधः
स्थितोर्ध्वमुखरक्तसहस्रदलकमलकर्णिकायां ॐ श्रें श्रीं सौः त्रैलोक्यमोहनचक्राय नमः मूला
धारे ॐ ऐं क्लीं सौः सर्वाशापरिपूरकचक्राय नमः स्वाधिष्ठाने ॐ ह्रीं क्लीं सौः सर्वसंक्षोभनचक्रा
य नमः मणिपूरके ॐ हसैं हस्क्लीं हसौः सर्वसौभाग्यदायकचक्राय नमः अनाहते ॐ हसैं हस्क्लीं हसौः

श्री
५४

सर्वार्थसाधकचक्रायनमः विशुद्धचक्रे ॐ ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्रायनमः लंबिकाग्रे ॐ ह्रीं
श्रीं सौः सर्वरोगहरचक्रायनमः आज्ञायां ॐ हसैं हस्क्लीं हसौः सर्वसिद्धिप्रदचक्रायनमः मूर्ध्नि
ॐ मूलपंचदशीसर्वानंदमयचक्रायनमः इतिनवचक्राणिविन्यस्य नवचक्रेश्वरीन्यासंकुर्यात्
तत्रमूलाधाराद्यधः प्रागेवत्रैलोक्यमोहनचक्रे ॐ अं आं सौः त्रिपुराचक्रेश्वर्यैनमः मूलाधारस्थ
सर्वाशापरिपूरकेचक्रेश्वर्यैनमः ॐ ऐं क्लीं सौः त्रिपुरेश्वरीचक्रेश्वर्यैनमः स्वाधिष्ठानस्थसर्वसंक्षो
भनचक्रेश्वर्यैनमः ॐ ह्रीं क्लीं सौः त्रिपुरसुंदरीचक्रेश्वर्यैनमः मणिपूरकस्थसर्वसौभाग्यदायकेच
क्रेश्वर्यैनमः ॐ हैं हक्लीं हसौः त्रिपुरवासिनीचक्रेश्वर्यैनमः अनाहतस्थसर्वार्थसाधकेचक्रेश्व
र्यैनमः ॐ हसैं हस्क्लीं हसौः त्रिपुराश्रीचक्रेश्वर्यैनमः विशुद्धस्थसर्वरक्षाकरचक्रेश्वर्यैनमः
ॐ ह्रीं क्लीं ब्लें त्रिपुरमालिनीचक्रेश्वर्यैनमः लंबिकास्थसर्वरोगहरेचक्रेश्वर्यैनमः ॐ ह्रीं श्रीं सौः
त्रिपुरासिद्धाचक्रेश्वर्यैनमः आज्ञास्थसर्वसिद्धिप्रदाचक्रेश्वर्यैनमः ॐ हसैं हस्क्लीं हसौः त्रि
पुरांबिकाचक्रेश्वर्यैनमः महिमाबिंदुस्थबिंदुचक्रेमूलपंचदशाक्षरीमुच्चार्य श्रीमहात्रिपु
रसुंदरीमहाचक्रेश्वरीश्रीपादुकायैनमः इतिविन्यस्य तत्तच्चक्रंपरस्परंसंलग्नं तत्तच्चक्रेश्व

पीठस्थितं तस्य ध्यात्वा पुनः करशुद्धिं विधाय ऐं मूलाधारे क्लीं हृदये सौः भ्रूमध्ये समस्त
विद्यांत्रयस्वंशेच विन्यस्य ॐ समस्तप्रकटगुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरापर
रहस्यपरापरातिरहस्ययोगिनीश्रीचक्रपादुकाभ्यो नमः इति स्वरूपं श्रीचक्ररूपं ध्यात्वा व्या
पकं कुर्यात् इति श्रीचक्रन्यासः अथ त्रिविधषडंगन्यासः तत्रादौ रत्नाषडंगः ॐ ऐं क्लीं सौः
नमः श्रीमहात्रिपुरसुंदरि मां रक्ष २ हृदयाय नमः ॐ ऐं क्लीं सौः नमः श्रीमहात्रिपुरसुंदरि
मां रक्ष २ शिरसे स्वाहा एवं षडंगेषु न्यसेत् ततो मूलषडंगः प्रथमकूटं हृदयाय नमः इत्या
दि मूलषडंगन्यासः अथ बालाषडंगयुवतीन्यासः ऐं सर्वज्ञायै हृदयाय नमः क्लीं नित्यतृ
प्तायै शिरसे स्वाहा सौः अनादिबोधायै शिखायै वषट् ऐं स्वतंत्रायै कवचाय हुं क्लीं नि
त्यलुप्तायै नेत्रत्रयाय वौषट् सौः अनंतायै अस्त्राय फट् अथ मूलषडंगयुवतीन्यासः ॐ प्र
थमकूटं श्रीमहात्रिपुरसुंदरी सर्वज्ञताशक्तिधाम्ने हृदयाय नमः द्वितीयं श्रीमहात्रिपुरसुंद
री नित्यतृप्ताशक्तिधाम्ने शिरसे स्वाहा तृतीयं श्रीमहात्रिपुरसुंदरी अनादिबोधशक्तिधाम्ने
शिखायै वषट् प्रथमं श्रीमहात्रिपुरसुंदरी स्वतंत्रशक्तिधाम्ने कवचाय हुं द्वितीयं श्रीमहा

श्री
५५
55

त्रिपुरसुंदरीनित्यमत्वप्रशक्तिधाम्ने नेत्रत्रयाय वौषट् ॐ तृतीयं श्रीमहात्रिपुरसुंदरी अनंतशक्ति
धाम्ने अस्त्राय फट् इति षडंगः अथायुधन्यासः तत्र दक्षिणाधःकरे ॐ द्रां द्रीं क्लीं ब्लूं सः यां रां लां
वां सां जृंभनेभ्यः कामेश्वरकामेश्वरीबाणेभ्यो नमः वामाधःकरे थं धं मोहनाभ्यां कामेश्वरकामेश्व
रीचापाभ्यां नमः वामोर्ध्वकरे ॐ आं ह्रीं वशीकरणाभ्यां कामेश्वरकामेश्वरीपाशाभ्यां नमः द
क्षोर्ध्वकरे ॐ क्रों क्रों स्तंभनाभ्यां कामेश्वरकामेश्वर्यंकुशाभ्यां नमः अथैतन्मुद्राभिः कार्यः अ
थ कामेश्वर्यादिन्यासः वामपादांगुष्ठान्नाभिपर्यंतं ऐं प्रथमकूटं कामेश्वर्यै नमः नाभेः कंठप
र्यंतं क्लीं द्वितीयं वज्रेश्वर्यै नमः कंठाच्छिरःपर्यंतं ॐ सौः तृतीयकूटं भगमालिन्यै नमः इ
ति वामभागे विन्यस्य दक्षपादांगुष्ठान्नाभिपर्यंतं ह्स्रैं आत्मतत्वाधिपतये ब्रह्मणे नमः ना
भेः कंठपर्यंतं ह्स्क्लीं विद्यातत्वाधिपतये विष्णवे नमः कंठादिशिरोपर्यंतं ह्सौः शिवतत्वा
धिपतये रुद्राय नमः अथ च तत्वन्यासः नाभ्यादिपादांतं प्रथमकूटं आत्मतत्वात्मने श्री
महात्रिपुरसुंदर्यै नमः कंठादिनाभ्यंतं द्वितीयकूटं विद्यातत्वात्मने श्रीमहात्रिपुरसुंदर्यै
नमः मूर्धादिकंठांतं ॐ तृतीयकूटं शिवतत्वात्मने श्रीमहात्रिपुरसुंदर्यै नमः सर्वांगे ॐ मूल

पंचदशी सर्वतत्वात्मने श्रीमहात्रिपुरसुंदर्यै नमः अथ मूलविद्यान्यासः मूलाधारे ॐ प्रथम
कूटं नमः हृदि ॐ द्वितीयकूटं नमः भ्रूमध्ये ॐ तृतीयकूटं सर्वांगे तुरीयविद्यां त्रिः विन्यस्य प्राग्व
त्समस्तविद्यां व्यापकं न्यसेत् अथ नवयोनिन्यासः वामकर्णे ऐं नमः दक्षकर्णे ॐ क्लीं नमः चिबु
के ॐ सौः नमः वामशंखे ॐ ऐं नमः दक्षशंखे ॐ क्लीं नमः मुखे ॐ सौः नमः वामनेत्रे ॐ ऐं नमः दक्षे
ॐ क्लीं नमः नासायां ॐ सौः नमः वामांसे ॐ ऐं नमः दक्षांसे ॐ क्लीं नमः हृदये ॐ सौः नमः वाम
कूर्परे ॐ ऐं नमः दक्षे ॐ क्लीं नमः नाभौ ॐ सौः नमः वामजानुनि ॐ ऐं नमः दक्षे ॐ क्लीं नमः लिं
गे ॐ सौः नमः वामपादे ॐ ऐं नमः दक्षे ॐ क्लीं नमः गुह्ये ॐ सौः नमः वामपार्श्वे ऐं नमः दक्षे ॐ क्लीं
नमः हृदि ॐ सौः नमः वामस्तने ऐं नमः दक्षस्तने ॐ क्लीं नमः कंठे ॐ सौः नमः अथान्तर्नव
योनिन्यासः ततो मूलाधारादिषट्चक्रललाटसीमन्तब्रह्मरंध्रेषु नवसु स्थानेषु चतुरस्र
वेष्टितनवयोनीः परिकल्प्य तासु अग्न्यादिप्रादक्षिण्येन क्रमेण प्रागुक्तबीजत्रयं मनसा
ध्यायन् न्यसेत् अथ शृंखलान्यासः शिखायां ॐ प्रथमकूटं चिबुके ॐ द्वितीयं मुखे ॐ तृती
यं मुखे ॐ प्रथमं कंठे ॐ द्वितीयं चिबुके ॐ तृतीयं चिबुके ॐ प्रथमं हृदये ॐ द्वितीयं कंठे

श्री
५६
56

धैं तृतीये कंठे धैं प्रथमे नाभौ धैं द्वितीये हृदये धैं तृतीये हृदये धैं प्रथमे स्वाधिष्ठाने धैं द्वितीये
नाभौ धैं तृतीये नाभौ धैं प्रथमे मूलाधारे धैं द्वितीये स्वाधिष्ठाने धैं तृतीये ९ स्वाधिष्ठाने धैं प्रथ
मे ऊर्वोः धैं द्वितीये मूलाधारे धैं तृतीये मूलाधारे धैं प्रथमे जान्वोः धैं द्वितीये ऊर्वोः धैं तृतीये ऊ
र्वोः धैं प्रथमे पादयोः धैं द्वितीये जान्वोः तृतीये अथाम्नायन्यासः शिरसि धैं ऐं सरस्वत्यैनमः
ललाटे धैं ह्रीं पार्वत्यैनमः दक्षनेत्रे धैं श्रीं सवित्रेनमः वामे धैं मेघश्रियैनमः मुखवृत्ते धैं ठं चेंद्रम
सेनमः जिह्वायां धैं श्रीं श्रियैनमः दक्षकपोले धैं स्रां दंतिनेनमः वामकपोले धैं ह्रां दंतिनेनमः
इतिआम्नायन्यासः इत्येन्यासान्विधाय प्रणवसंपुटितां श्रीषोडशाक्षरीं सर्वांगे व्यापकत्वेन विन्य
स्य पुनस्तथाविधां तां हृदयेन्यसेत् अथऋष्यादिकरषडंगन्यासं विधाय शिवोहमितिभावय
न्वक्ष्यमाणसंक्षोभण्यादि नवमुद्राः पाशादिचतुर्मुद्राश्चबद्ध्वा सर्वांगवयवभावेन कामकला
रूपमात्मानंध्यात्वा शक्त्युत्थापनमुद्रांबद्ध्वा प्रातःस्मरणोक्तप्रकारेण मूलाधारात् कुंडलिनी
मुत्थाप्य तथैवषट्चक्रभूजोंविधाय तत्तेजसापरिणतां श्रीपरदेवतांहृदयकमलगतसिंहा
सने श्रीचक्रराजेकामेश्वरांकस्थांसर्वाभरणभूषितां त्रिखंडामुद्रितकरांध्यायेत् यथा ऐंश्रीं दे

ध्येसच्चिदानंददायिनेनमः अथकंदोदयतत्त्वरूपपीयूषवारिधेः मध्येहेममयींभूमिंस्मरेन्माणि
क्यमंडितां तन्मध्येनंदनोद्यानेमदनोन्मादनेमहत् नित्याभ्युदितशीतांशुज्योत्स्नाजालविराजितं स
दामहवसंतेनकामदेवेनरक्षितं कदंबचूतपुन्नागनागकेसरचंपकैः बकुलैःपारिजातैश्चसर्व
र्तुकुसुमोज्वलैः हुंकारमुखरैःभृंगैःकूजद्भिःकोकिलैःशुकैः नानावर्णैरथान्यैश्चद्विजसंघैर्नि
षेवितं शिखिकारंडहंसाद्यैर्नानापक्षिभिरावृतं नानापुष्पलताकीर्णैःशोभितंवृक्षषंडकैः पर्यंत
दीर्घिकोत्फुल्लकमलोत्पलसंभवैः रजोभिर्धूसरैःसम्यक्संसेवितंमलयानिलैः ध्यात्वैवंनंदनोद्या
नेतदंतःप्रांगणेस्मरेत् शुद्धकांचनसंकाशवसुधाभिरलंकृतं प्रांगणेचिंतयित्वाथस्वरसिद्धनिषे
वितं तन्मध्येमंडपंध्यायेद्धामब्रह्मांडमंडले सहस्रादित्यसंकाशेचतुरस्रेसुशोभने रत्नतेजःप्र
भापुंजपिंजरीकृतदिङ्मुखं मध्यस्तंभविनिर्मुक्तकोणस्तंभसमन्वितं महामाणिक्यवैडूर्यरत्न
कांचनभूषितं मुक्तादामवितानाढ्यंरत्नसोपानभूषितं मंदवायुसमाक्रांतंगंधधूपतरंगितं र
त्नचामरघंटादिविमानैरुपशोभितं जातीचंपकपुन्नागकेतकीमल्लिकादिभिः रक्तोत्पल
सितांभोजमाधवीभिःसपुष्पकैः वद्धाभिश्चित्रमालाभिःसर्वत्रसमलंकृतं तिर्यगूर्ध्वलसद्रत्न

श्री पुत्तलीकोटिमंडितं नानारत्नादिभिर्दिव्यैर्निर्मितं विश्वकर्मणा तन्मध्ये विपुलां ध्यायेद्वेदिकां शत
५७ योजनां सहस्रादित्यसंकाशां कोटिमाणिक्यमंडितां चतुर्द्वारसमोपेतां माणिक्यद्वारतोरणां प्र
57 दीपैः पूर्णकुंभैश्च सर्वतः समलंकृतां पताकाभिश्च हेमीभिः सांकुराभिरलंकृतां रत्नपीठस्थि
तैर्दिव्यै रागैः परिशोभितां तदंतरांतराप्रोद्यन्मणिदर्पणसंकुलां मधुरोदारविविधगंधर्व
स्तोत्रबृंहितां शृंगाररससंपन्नैर्नवयौवनशोभितैः अमरीनिकरैर्नानामणिभूषणभूषितैः वी
णावेणुमृदंगादिवादनेन च नर्तकैः प्रीणयद्भिर्महादेवीं परीतां परितः सदा रत्नसिंहासनं त
स्या विद्यामध्ये स्मरेच्छुभं विरिंचिविष्णुरुद्रेशाः शवपादचतुष्टयं सदाशिवमयं साक्षात्तस्मिन्
परशिवात्मकं पुष्पपर्यंकमैश्वर्यं तत्र श्रीचक्रनामकं तन्मध्ये योनिमध्यस्थ श्रीमदुड्डानपीठ
के पर्यंकबंधविलसत्स्वस्तिकासनलालितं ध्यायेत्परशिवं कस्यां पद्ममध्योज्ज्वलाकृतिं
ततो ध्याने प्रवक्ष्यामि त्रिदशैः सेवनीयकं ततः पद्मनिभां देवीं बालार्ककिरणारुणां जपाकुसु
मसंकाशां दाडिमीकुसुमोपमां पद्मरागप्रतीकाशां कुंकुमोदकसन्निभां स्फुरन्मुकुटमा
णिक्यकिंकिणीजालमंडितां कालालिकुलसंकाशकुटिलालकपल्लवां प्रत्यग्रारुणसंकाशा

वदनांभोजमंडलां किंचिदर्धेंदुकुटिलललाटमरुपट्टिकां पिनाकधनुराकारभ्रूलतां परमेश्वरीं
आनंदमुदितोल्लोललीलान्दोलितलोचनां स्फुरन्मयूखसंघातविलसद्धेमकुंडलां स्वगंडमंड
लाभोगजितेंदुमस्तमंडलां विश्वकर्मादिनिर्माणसूत्रसस्पष्टनासिकां रक्तविद्रुमबिंबाभरक्तोष्ठीं
ममृतोपमां दाडिमीबीजवज्राभदंतपंक्तिविराजितां स्मितमाधुर्यविजितमाधुर्यरससागरां अनौ
पम्यगुणोपेतचिबुकोद्देशशोभितां कंबुग्रीवांमहादेवीमृणालललितैर्भुजैः मणिकंकणके
यूरभारचित्रैःप्रशोभितां रक्तोत्पलदलाकारसुकुमारकरांबुजां करांबुजनखज्योतिर्विराजित
नभःस्थलीं मुक्ताहारलतोपेतसमुन्नतपयोधरां त्रिवलीवलनायुक्तमध्यदेशसुशोभितां ला
वण्यसरिदावर्ताकारनाभिविभूषितां अनर्घरत्नघटितकांचीयुक्तनितंबिनीं नितंबबिंबद्वि
रदरोमराजीवरांकुशां कदलीललितस्तंभसुकुमारोरुमीश्वरीं लावण्यकदलीतुल्यजंघायु
गलमंडितां गूढगुल्फपदद्वंद्वप्रपदाजितकच्छपां ब्रह्मविष्णुशिरोरत्ननिघृष्टचरणांबुजां
नखदीर्घांगुलीभास्वन्नखचंद्रविराजितां शीतांशुरत्नसंकाशकांतिसंतानहासिनीं लोहितजि
तसिंदूरजपादाडिमरागिनीं रक्तवस्त्रपरीधानां पाशांकुशकरोद्यतां रक्तपद्मनिविष्टां च रक्ता

श्री
५८
58

भरणभूषितां चतुर्भुजांत्रिनेत्रांचपंचबाणधनुर्धरां कर्पूरशकलोंमिश्रतांबूलपूरिताननां महा
मृगमदोद्दामकुंकुमारुणविग्रहां सर्वशृंगारवेशाढ्यांसर्वालंकारभूषितां जगदाह्लादजननींजग
द्रंजनकारिणीं जगदाकर्षणकरींजगत्कारणरूपिणीं सर्वमंत्रमयींदेवींसर्वसौभाग्यसुंदरीं
सर्वलक्ष्मीमयींनित्यांपरमानंदसुंदरीं एवंध्यायेन्महेशानींमहात्रिपुरसुंदरीं इतिस्वकेनध्यात्वा
मूलविद्ययास्वशिरसिपुष्पांजलिंदत्वा पुनर्हृदयकमलेयथोक्तरूपांसांगांसावरणांध्यात्वा व
क्ष्यमाणप्रकारेणपीठपूजादिपूर्वकंसांगांसावरणां मानसैरुपचारैःप्रपूज्य नैवेद्यंदत्वा भोजना
वसरेरंतर्वैश्वदेवंकुर्यात् तत्रमूलाधारे आत्मांतरात्मपरमात्मज्ञानात्मेत्यात्मचतुष्टयेसचतुरस्रे
कुंडल्याग्निसमुज्वलेकुंडंध्यात्वा तत्रश्रीपरदेवतांध्यात्वा तन्मुखे मूलांते अहंतांजुहोमिस्वाहा
इत्याहंतासत्यपैशुन्यकामक्रोधलोभमोहमदमात्सर्याणि सुषुम्णास्रुक शुक्लमनःस्रुवेणप्रते
केहुत्वा अथवा धर्माधर्महविर्दीप्तेस्वात्माग्नौमनसास्रुचा सुषुम्णावर्त्मनानित्यमक्षवृत्तीःजु
होम्यहंस्वाहा इतिहुत्वा प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माधर्मकलास्नेहपू
र्णंवह्नौजुहोम्यहंस्वाहा इत्यपिहुत्वा पुनःहृदयकमलेदेवींध्यात्वा उत्तरापोशानादिसर्वोप

चावैराराध्य मूलंयथाशक्तिजप्त्वा प्राणायामादिनाजपंसमर्प्य श्रीगुरुंप्रणम्य स्वदेहंगंधादिभि
रलंकृत्य ॐतीर्थस्नानेयंतीर्थमेवसमानानांभवतिमानाशंसो अरिरुषोधूर्तिप्रणंमर्त्यस्यरक्षाणो
ब्रह्मणस्पति वस्त्रपवित्रमस्य शतधारंवस्त्रंनो अयंदत्त्वा वाप्रजयासंप्रजाभिरायस्फुरुषेण बहुलाः
भवति परमात्मनेपुरुषोत्तमायपंचभूतात्मकायविश्वात्मनेमंत्रनाथाय आधारशक्तिसमालभ
नेगंधोनमः अर्घोनमः पुष्पंनमः स्वप्रकाशोमहादीपःसर्वत्रतिमिरापहः सबाह्याभ्यंतरंज्यो
तिर्दीपोयंप्रतिगृह्यतां वनस्पतिरसोत्पन्नोगंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रति
गृह्यतां नमोधर्मनिधानायनमःस्वकृतिसाक्षिणे नमःप्रत्यक्षदेवायभास्करायनमोनमः य
त्रास्तिमातानपितानबंधुर्भ्रातापिनोयत्रसुहृज्जनाश्च नज्ञायतेयत्रदिनेनरात्रिंतत्रापिदीपंशा
रणंप्रपद्ये अद्यतत्सत् अद्यतावत्तिथावद्य अमुकमासस्य अमुकपक्षस्य तिथावमुकायां आ
त्मनोवाङ्मनःकायोपार्जितपापनिवारणार्थं श्रीमहात्रिपुरसुंदरीपूजनमहंकरिष्येतिसंक
ल्प्य कलशस्थापनंकुर्यात् तत्रस्ववामभागेषट्कोणांतर्गत त्रिकोणवृत्तबिंदुवाह्यहस्तचतुर
स्रंकृत्वा स्वदक्षेत्रिकोणंवृत्तबिंदुंभूमौविरचय्य तत्राधारशक्तिनमः इतिसंपूज्य तत्राधारंनिदि

श्री ष तदुपरि अस्त्राय फडिति शोधितं नमः इति पूरितं पात्रं शंखादिकं वा संस्थाप्य तत्र गंगे च य
५९ मुने चैव इत्यादि तीर्थमावाह्य गंधादीन् प्रणवेन निक्षिप्य वह्निसोमसूर्यकलाभिः संपूज्य मूलमंत्रे
ण च संपूज्य धेनुमुद्रां प्रदर्श्य इति विधिविहितसामान्यार्घ्योदकेन स्ववामे कृतमंडलमभ्युक्ष्य
तत्राधारशक्त्यै नमः ॐ मंडूकाय नमः ॐ कालाग्निरुद्राय नमः ॐ कमठाय नमः ॐ मूलप्र
कृत्यै नमः ॐ शेषाय नमः ॐ पृथिव्यै नमः ॐ सुधासमुद्राय नमः ॐ मणिद्वीपाय नमः ॐ चिं
59 तामणिगृहाय नमः ॐ रत्नवेदिकायै नमः ॐ मणिपीठाय नमः ॐ नानामुनिगणेभ्यो नमः
ॐ नानादेवेभ्यो नमः ॐ धर्माय नमः ॐ ज्ञानाय नमः ॐ वैराग्याय नमः ॐ ऐश्वर्याय नमः
ॐ अधर्माय नमः ॐ अज्ञानाय नमः ॐ अवैराग्याय नमः ॐ अनैश्वर्याय नमः ॐ पद्माय न
मः ॐ प्रकृतिमयपत्रेभ्यो नमः ॐ विकारमयकेसरेभ्यो नमः ॐ पंचाशद्बीजभूषितायै क
र्णिकायै नमः ॐ सूर्यमंडलाय नमः ॐ सोममंडलाय नमः ॐ वैश्वानरमंडलाय नमः ॐ सं स
त्त्वाय नमः ॐ रं रजसे नमः ॐ तं तमसे नमः ॐ आं आत्मने नमः ॐ अं अंतरात्मने नमः ॐ पं प
रमात्मने नमः ॐ ह्रीं ज्ञानात्मने नमः ॐ वामायै नमः ॐ ज्येष्ठायै नमः ॐ रौद्र्यै नमः ॐ अंबिका

यैनमः ॐ इच्छायैनमः ॐ ज्ञानायैनमः ॐ क्रियायैनमः ॐ कुब्जिकायैनमः ॐ चिञ्चायैनमः
ॐ विषघ्निकायैनमः ॐ हृतयैनमः ॐ आनंदायैनमः ॐ मनोन्मन्यैनमः ॐ ऐं परायैनमः ॐ ऐं अ
परायैनमः ॐ ऐं विरूपायैनमः ॐ ह्सौः सदाशिवायमहाप्रेतपद्मासनायनमः ॐ इतिमंड
लेसंपूज्य तत्राधारंसंस्थाप्य ॐ रंवह्निमंडलायदशकलात्मनेनमः ॐ यंधूम्रायैनमः ॐ रंनी
लवर्णायैनमः ॐ लंकपिलायैनमः ॐ वंविस्फुलिंगिन्यैनमः ॐ शंज्वालायैनमः ॐ षंहैमव
त्यैनमः ॐ संकव्यवाहिन्यैनमः ॐ हंहव्यवाहिन्यैनमः ॐ लंरौद्र्यैनमः ॐ क्षः संकर्षिण्यैनमः
इतिप्रपूज्य तत्रफडितिकलशंप्रक्षाल्य ऐंसंदीपनिसंतापनिज्वालामालिनि ह्रीमिति संदी
पनीविद्यया योनिमुद्रयाचसंदीप्य हूमितिअवगुंठन कारणेनप्रपूर्य रक्तवस्त्रमाल्यादिनासं
भूष्य ॐ ॐ शंभुनाथयथादेविविश्वनाथयथास्थिता ब्रह्मणाथयथापूर्वंतथात्वंस्थापया
म्यहं इतिपठित्वा श्रीदेवीबुद्ध्यासंस्थाप्य तत्राधारेकलशंसंस्थापयेत् ॐ अंअर्कमंडला
यद्वादशकलात्मनेनमः इतिप्रपूज्य द्वादशकलाःपूजयेद्यथा ॐ कंभंतपिन्यैनमः ॐ खंबं
तापिन्यैनमः ॐ गंफंबोधिन्यैनमः ॐ घंपंरोधिन्यैनमः ॐ ङंनंकालिन्यैनमः ॐ चंधंशोषि

श्री
६०

ण्यैनमः ध्रँ छं देवरेण्यैनमः ध्रँ जं ध्यं आकर्षिण्यैनमः ध्रँ ऊं तं मायायैनमः ध्रँ अं णं विष्णावत्यैनमः
ध्रँ टं फं हेमप्रभायैनमः ध्रँ ठं डं दमावत्यैनमः इतिकलशं संपूज्य ध्रँ तः लं हं सं षं शं वं लं रं यं मं भं बं
फं पं नं धं दं थं तं णं ढं डं ठं टं ञं ऊं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ल्हं लं ऋं ऋं ऊं उं ईं इं आं अं
इतिपठन्पानकामस्तेनतत्कलशंप्रपूर्य तदमृतंचन्द्ररूपंविभाव्य सः चन्द्रमंडलायषोडशक
लात्मनेनमः इतिप्रपूज्य षोडशकलाः पूजयेद्यथा ध्रँ अं अमृतायैनमः ध्रँ आं मानदायैनमः
ध्रँ इं तुष्ट्यैनमः ध्रँ ईं पुष्ट्यैनमः ध्रँ उं प्रीतयेनमः ध्रँ ऊं रतयेनमः ध्रँ ऋं श्रियैनमः ध्रँ ॠं ह्रियैनमः
ध्रँ लृं स्वधायैनमः ध्रँ लॄं रात्र्यैनमः ध्रँ एं ज्योत्स्नायैनमः ध्रँ ऐं हैमवत्यैनमः ध्रँ ओं छायायैन
मः ध्रँ औं पूर्णिमायैनमः ध्रँ अं नित्यायैनमः ध्रँ अः अमावस्यायैनमः एताः कलाः इवे संपू
ज्य फडिति संरक्ष्य हूमित्यवगुंठ्य मूलेन संवीक्ष्य नमः इत्यभ्युक्ष्य मूलेन गंधमाघ्राय त
त्रकलशे मूलं पठन् अं आं सां तं अं रँ कं रँ थं रँ इति त्रिकोणं शक्तिचक्राख्यं वि
लिख्य तन्मध्ये हं लं सः तत्रपरं ध्यात्वा इष्टदेवतां संपूजयेत् ततः ॐ ह्रीं परस्वामिनि पर
माकाशस्वामिनि परमाकाशशून्यवाहिनि चन्द्रार्काग्निभक्षिणि पात्रे विश विश स्वाहा

60

इति घटं धृत्वा दशधा पठेत् ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वधा च स्वाहा च
नित्यमेव भवन्त्विह इति त्रिः श्रों ५। आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च हिर
ण्मयेन सविता रथेना देवो याति भुवनानि पश्यन् इति ऋचमपि दशधा जपेत् १० मधुवात
ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधु नक्तमुतोषसः मधुमत् पार्थिवं रजः म
धु द्यौरस्तु नः पिता मधुमान्नो वनस्पतिः मधुमानस्तु सूर्यः माध्वीर्गावो भवन्तु नः ॐ मधु ॐ मधु
ॐ मधु इत्यपि दशधा जपेत् १० ॐ ऐं ह्रीं श्रीं आनन्देश्वराय विद्महे श्रीं श्रीं स्वरादेव्यै धीमहि तन्नो
ऽर्धनारीश्वरः प्रचोदयात् इति गायत्रीं दशधा जप्त्वा ॐ हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिष
दतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं इति त्रिर्जपेत् ३
ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमं इति त्रिः ३ वां वीं वूं वैं वौं वः ब्रह्मशा
पमोचितायै स्वरादेव्यै वौषट् इति दशधा जप्त्वा १० इषे त्वोर्जे त्वा वायवस्थ पायवस्थ दिवो वा
सविता प्रार्पयतु श्रेष्ठतमाय कर्वतु इति ऋचमेकवारं पठेत् १ ॐ ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः
स्वधे कृष्णशापं मोचय मोचय अमृतं स्रावय स्रावय स्वाहा इति त्रिर्जपेत् ३ अग्न आयाहि वीतये गृ

श्री
६१

61

त्वानो हव्यदातये निहोतासत्सि बर्हिषि इति दशधा जपेत् १० शुक्रशापहरीं विद्यां पठेद्यथा
ग्रां ग्रीं ग्रूं ग्रैं ग्रौं ग्रः शुक्रशापविमोचितायै सुरादेव्यै नमः सूर्यमंडलसंभूते वरुणालयसं
भवे अमाबीजमये देवि शुक्रशापाद्विमुच्यतां वेदानां प्रणवो बीजं ब्रह्मानंदमयो यदि तेन स
त्येन हे देवि ब्रह्महत्यां व्यपोहतु एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं कचोद्भवां ब्रह्महत्यां ते
न ते नाशयाम्यहं ब्रह्मशापविनिर्मुक्ता त्वं मुक्ता विष्णुपापतः विमुक्ता शुक्रशापेन पवित्रा भव
सांप्रतं इति त्रिः पठित्वा ३ शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः इति
दशधा जपेत् १० ह्रीं श्रीं क्लां क्लीं क्लूं क्लैं क्लौं क्लः कुलिका कारिणि विकारान स्पद व्यस्य हर हर स्वाहा
इति कलशोपरि दशधा पठित्वा १० यो विश्वचक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्
पात् सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः इति दशधा जपेत् १० ततः
सहस्रारे गुरुं ध्यात्वा हृत्कमले इष्टदेवतां प्रणम्य श्रीतिरस्करिणीं ध्यात्वा जपेत् नीलतो
यदसंकाशां नीलकुंतलशोभितां नीलांबरधरां देवीं नीलोत्पलविलोचनां नीलपुष्पवि
भूषाढ्यां नीलालंकारभूषितां नीलांगरागसंयुक्तां नीलवैडूर्यमालिनीं इंद्रनीलनिबद्धां

श्यमहार्घमणिभूषणां नीलवाजिसमारूढां नीलखड्गायुधांपरां निशाछदेननीलेनभुवनानिच
त्वरेश मोहयंतीमहामायांडवनिंदकभक्षिणीं वीरपानरतान्वीरान्पालयंतीसमंततः संके
तमंडलेदिव्येच्छादयंतीस्ववाससा परमानंदवपुषंपरमानंदभैरवीं परमानंदजननींप्रणमामि
परांबिकां इतितिरस्करिणींध्यात्वा ततःमंत्रंजपेत् ॐऐंक्लींश्लींह्रींतिरस्करिणिसकलजनवा
ग्वादिनिसकलपशुजनव्रातमनश्चक्षुः श्रोत्रजिह्वाघ्राणादीनितिरस्कुरुकुरुठः ठः ठः स्वाहा
इतिप्रदेदशधाजप्त्वा पावमानः परंब्रह्मशुद्धंज्योतिःसनातनं पितृंस्तस्योपतिष्ठेतक्षीरसर्पि
र्मधूदकैः इतित्रिः पावमानंपरंब्रह्मपावमानःपरोरसः पावमानंपरंज्ञानंतेनत्वांपावयाम्य
हं इतित्रिःपठित्वा श्रीगुरुंध्यात्वा वमित्यमृतबीजंजपन् हंसः इत्यर्कमंत्रंजपन् कुंडलिन्याः
प्रयोगेनामृतं वामनासाग्रात्कलशेनिक्षिपेत् ततोमृतमुद्रयामृतीकृत्य ह्रींश्रींक्लींअमृते
अमृतोद्भवे अमृतवर्षिणिअमृतंस्त्रावय २ अंआंअमृतेश्वर्यैनमः इतित्रिःपठित्वा अमृत
मयंघटंध्यात्वा कर्पूरैलालवंगकस्तूरीचंदनोशीरमिश्रितंविधाय मूले गंगेचयमुनेचैव
गोदावरिसरस्वति इतितीर्थान्यंकुशमुद्रयावाह्य सर्वतीर्थमयंद्रव्यंध्यायेत् ततोद्रव्यम

श्री ६२

षेविंदुयुतंशर्ववत्रिकोणंविभाव्य श्रं १९ कं १९ थं १९ योनिमुद्रांनिबध्य बिंदावानंदभैरवंसु
रादेवींचध्यायेद्यथा सूर्यकोटिप्रतीकाशंचंद्रकोटिसुशीतलं अष्टादशभुजंदेवंपंचवक्त्रंत्रि
लोचनं अमृतार्णवमध्यस्थंब्रह्मपद्मोपरिस्थितं वृषारूढंनीलकंठंसर्पाभरणभूषितं कपाल
खट्वांगधरंघंटाडमरुवादिनं पाशांकुशधरंदेवंगदामुसलधारिणं खड्गखेटकपट्टिशमुद्गरो
च्छूलकुंतिनं विचित्रखेटकंमुंडवरदाभयपाणिकं लोहितंदेवदेवेशंभावयेत्साधकोत्तमः
दत्वापुष्पांजलिंकुंभेजपेदानंदभैरवं इतिध्यात्वा कुंभेपुष्पांजलिंदत्वानंदभैरवमंत्रंदशधाज
पेत् हस्क्ष्मलवयरूं आनंदभैरवायवौषट् इतिदशधाजप्त्वा १ आनंदभैरवांकोपविष्टांसु
रादेवींध्यायेद्यथा समुद्रेमथ्यमानेतुक्षीराब्धौसागरोत्तमे तत्रोत्पन्नासुरादेवीकुमारीरूपधा
रिणी भावयेत्त्वसुरादेवींचंद्रकोट्ययुतप्रभां हिमकुंदेंदुधवलांपंचवक्त्रांत्रिलोचनां अष्टाद
शभुजैर्युक्तांसर्वानंदकरोद्यतां प्रहसंतींविशालाक्षींदेवदेवस्यसंमुखीं दत्वापुष्पांजलिंकुंभेज
पेदानंदभैरवीं इतिध्यात्वा जपेद्यथा सहक्ष्मलवरयूंसुरादेव्यैवौषट् इतिदशधाजप्त्वा म
हामुद्रायोनिधेनुमत्स्यमुद्राःप्रदर्शयेत् ततोलेलिहानाख्यंमुद्रांबद्ध्वा कुंडलिनीमूलाधा

रातसमुत्थाय सुषुम्णावर्त्मना द्वादशान्तं समानीय सोऽहं हंसः इति स्मरन् शिवेन सह संयोज्य प
रमानन्दमयो भूत्वा तदुद्भवामृतवृष्टिं वामनासापुटेन प्रणवं स्मरन् परदेवतायै नियोज्य साक्षाद
मृततत्त्वाध्येकलशं ध्यायेत् ततो वमिति वरुणबीजमुच्चार्य मूलमन्त्रं दशधा जप्त्वा ८ घंटानि:
स्वनपूर्वकं नानाविधपुष्पमाल्यभूषणधूपदीपविविधौषधप्रणामस्तुतिभिः कलशं संपूज्य
सर्वदेवमयं कुम्भं ध्यायेत् इति कलशपूजाविधिः अथ श्रीविशेषार्घ्यपात्रपूजाविधिः ततः
आत्मश्रीचक्रयोर्मध्ये त्रिकोणषट्कोणवृत्तचतुरस्रं भूमौ विलिख्य चतुरस्रे ऐं पूर्णगिरिपीठाय नमः
ऐं उड्डियानपीठाय नमः ऐं कामरूपपीठाय नमः ऐं जालन्धरपीठाय नमः इति संपूज्य षट्को
णे षडङ्गं संपूज्य त्रिकूटेन त्रिकोणं प्रदक्षिणं संपूज्य मध्ये ह्रीं आधारशक्तीः संपूज्य त्रिकोणगर्भे
ये त्रिकोणषट्कोणभूषितं संस्थाप्य नमः इति सामान्यार्घ्यजलेनाभ्युक्ष्य ऐं यं धूम्रार्चिषे नमः ऐं रं
ऊष्मायै नमः ऐं लं ज्वलिन्यै नमः ऐं वं ज्वालिन्यै नमः ऐं शं विस्फुलिङ्गिन्यै नमः ऐं षं सुश्रियै नमः
ऐं सं स्वरूपायै नमः ऐं हं कपिलायै नमः ऐं लं हव्यवाहायै नमः ऐं क्षः कव्यवाहायै नमः इति
संपूज्य मध्ये ऐं रं वह्निमण्डलाय दशकलात्मने नमः इति संपूज्य षट्कोणे षडङ्गं च संपूज्य

श्री
६३

त्रिकोणे त्रिकूटं मध्ये मूलेन श्रीदेवीं संपूज्य ह्रूं ह्रूं ब्रह्माण्डचषकाय नमः स्वाहा इति पात्रं वा
मकरेण धृत्वा फडिति प्रक्षाल्य ॐ ऐं ह्रीं श्रीं श्रीमहात्रिपुरसुन्दर्या विशेषार्घ्यपात्रं स्थापया
मि नमः इति पात्रं यन्त्रे त्रिकोपरि संस्थाप्य धँ कं भं तपिन्यै नमः धँ खं बं तापिन्यै नमः धँ गं
फं धूम्रायै नमः धँ घं पं मरीच्यै नमः धँ ङं नं ज्वालिन्यै नमः धँ चं धं रुच्यै नमः धँ छं दं सुषुम्णा
यै नमः धँ जं थं भोगदायै नमः धँ झं तं विश्वायै नमः धँ ञं णं बोधिन्यै नमः धँ टं ढं धा
रिण्यै नमः धँ ठं डं क्षमायै नमः इति संपूज्य धँ अं अर्कमण्डलाय द्वादशकलात्मने नमः
इति संपूज्य त्रिकोणवृत्तषट्कोणं पात्रे विलिख्य समस्तमस्त्रमन्त्रेण च संपूज्य त्रिकोणे
त्रिकूटं संपूज्य वमिति वरुणबीजं श्लेविलोममातृकां च पठन् तत्वमुद्रया मूलेन त्रिको
णं प्रपूर्य जलेन च भागमेकं प्रपूर्य तत्र सर्वं गन्धादि निक्षिप्य धँ अं अमृतायै नमः धँ आं मान
दायै नमः धँ इं पूषायै नमः धँ ईं तुष्ट्यै नमः धँ उं पुष्ट्यै नमः धँ ऊं रत्यै नमः धँ ऋं धृत्यै नमः
धँ ॠं शशिन्यै नमः धँ लृं चन्द्रिकायै धँ ॡं कान्त्यै नमः धँ एं ज्योत्स्नायै नमः धँ ऐं श्रियै नमः
धँ ओं प्रीत्यै नमः धँ औं अंगदायै नमः धँ अं पूर्णायै नमः धँ अः पूर्णामृतायै नमः इति संपूज्य

63

षोडशकलात्मने सोममण्डलाय नमः इति संपूज्य पूर्ववद्यंत्रं मध्ये विलिख्य त्रिकोणरेखायां
अ १६ क १६ थ १६ इति त्रिर्विलिख्य कूटत्रितयेन त्रिकोणं संपूज्य षट्कोणे षडंगेच गं
गेत्यादितीर्थमावाह्य आनंदभैरवभैरव्योस्वस्वमंत्रेण संपूज्य वामावर्तेन देव्यष्टकं पात्रे पूजयेत्
ॐ ह्रीं ह्रुं द्राविण्यै वौषट् धं ॐ ह्रीं यं वेदिन्यै वौषट् धं ॐ ह्रीं वं आनंदिन्यै वौषट् धं ॐ ह्रीं लं बो
धिन्यै वौषट् धं ॐ ह्रीं मं उन्मादिन्यै वौषट् धं ॐ ह्रीं क्लं: संमोहिन्यै वौषट् धं ॐ ह्रीं रं भ्रामिन्यै वौषट्
धं ॐ ह्रीं हस्ख्फ्रें क्लिन्नै वौषट् इति संपूज्य रत्नेश्वरीश्रीवीदितः पूजयेद्यथा ह्लूं गगनरत्नेभ्यो नमः
पूर्वे स्लूं स्वर्गरत्नेभ्यो नमः दक्षिणे ल्लूं पातालरत्नेभ्यो नमः पश्चिमे ह्लूं मर्त्यरत्नेभ्यो नमः
उत्तरे न्लूं नागरत्नेभ्यो नमः मध्ये इति संपूज्य ततो मांसादीन्संशोधयेद्यथा तत्र चतुरस्रवि
वे विलिख्य तत्र मांसादिपात्राणि संस्थाप्य अस्त्राय फडिति सामान्यार्घोदकेनाभ्युक्ष्य
हूमित्यवगुंठ्य यमिति संशोष्य रमिति संदह्य वमिति चाप्लाव्य धेनुमुद्रयामृतीकृत्य यो
निमुद्रां प्रदर्श्य मत्स्यमुद्रयाच्छाद्य आनंदेश्वरभैरवमंत्रं शतं च दशधा पठित्वा छागला
जैनमांसेन कृतरूपाय विश्वबे बल्यर्थं भिवशात्कोशं प्रपद्ये विश्वमव्ययं प्रतर्पयामि बल

श्री
६४

र्थं पवित्रीभव सांप्रतं ॐ ह्रीं हरये नमः इति त्रिः पठित्वा प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः
कुचरो गिरिष्ठः यस्योरुषु त्रिषु विक्रमेष्वधिक्षियन्ति भुवनानि विश्वा इति मांसशोधनं अथ मी
नशोधनं कृतावतारो हरिणा कलिना पीडितं जगत् बलिना निगृहीतं च कौलिकानां हिते
च्छया भैरवीपरितोषार्थं स्वयं मीनो भवेद्धरिः ह्रीं हरये नमः ॐ त्र्यम्बकं यजामहे सुगन्धिं
पुष्टिवर्धनं उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् इति मीनशोधनं अथ मुद्रा
शोधनं देवतापूजनीयानि सौरभीयानि सांप्रतं बलार्थं देवदेवस्य परिज्ञाणीह सिद्ध
ये भूले च दशधा प्रजप्य ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततं
तद्विप्रासो विपण्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदं इति मुद्रां शोधयेत् विष्णु
र्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिञ्चतु प्रजापतिः धाता गर्भं दधातु ते गर्भं
धेहि सिनीवालि गर्भं धेहि सरस्वति गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा इति कुण्डगो
लादिशोधनं अथ मांसादीनां पापहरी विद्या ॐ ह्स्ख्फ्रें क्रों ऐं ज्रं सः अमृते अमृतोद्भवे अ
मृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा ॐ ग्लूं स्लूं म्लूं प्लूं न्लूं ऐं ज्रं सः इति सर्वेषां

64

वस्त्रीनां शणयहरीं त्रिः पठेत् इति मांसादि संशोध्य सर्वांशं श्रीपात्रे निक्षिप्य श्रीपात्रोप
रिद्रमित्यवगुंठ्यामृतीकृत्य तालत्रयेण दिशः संबध्य तदुपरि सम्यथा मूलं संजप्य तत्र
श्रीदेवीमावाह्य पुनः तालत्रयेण दिग्बंधनं च विधायावगुंठ्य योनिं प्रदर्श्य कुंडलिन्याः
प्रयोगेन राजदंतवर्त्मना निःसृतामृतधारां योनिमुद्रोल्लासितेन करेणानीय मूल
विद्यांते ब्रह्मांडरससंभूतमशेषरससंभवं आपूरितमहापात्रं पीयूषरसमावह १ अ
खंडैकरसानंदकरे परसुधात्मनि स्वच्छंदस्फुरणामत्र निधेह्यकुलरूपिणि अकुलस्था
मृताकारे सिद्धिज्ञानकरे परे अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि २ पुनः ऐं
अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय २ ॐ जूं सः स्वाहा इत्यभिमं
त्र्य सौः तद्रूपेणैकरस्यं च कृत्वा ह्येतत्स्वरूपिणि भूत्वा परामृताकारमयि चित्स्फुरणं कु
रु इत्यभिमंत्र्य ह्सौः नमः इति संपूज्य धेनुमुद्रां प्रदर्श्य षडंगेन सकलीकृत्य मत्स्यमु
द्रया पात्रमाच्छाद्य मूलं च दशधा जप्त्वा पात्रे श्रीदेवीरूपं भावयेत् इति विशेषार्घ्यस्था
पनविधिः ततस्तत्परतः तेनैव विधिना श्रीपात्रं स्थापयेत् तेनैव मूलदेवीव्यतिरिक्ता

वरणदेवतास्तर्पयेत् पूजासमर्पणादिकं मूलदेवीतर्पणं च विशेषार्घ्यपात्रेणैव तत्रश्रनं
गङ्गस्नमादि पर्यंतमावरणपूजासमर्पणं अर्घ्यदानं सामान्यार्घ्यजलेनैव कुर्यात् इति श्री
पात्रस्थापनविधिः तदनुक्रमेणैव देव्याज्ञामादाय घटसमीपे श्रीगुरुपात्रं ततः शक्तिपा
त्रं भोगपात्रं स्वपात्रं योगिनीपात्रं वीरपात्रं बलिपात्रं पाद्यपात्रं अर्घ्यपात्रं आचमनीयपा
त्रं मधुपर्कपात्रं इत्येतानि एकादशपात्राणि संस्थाप्य चर्वणयुतकारणेन वामहस्तकृत त
त्वमुद्रया श्रीपात्रात् समुद्धृत्य ऐं आनंदभैरवं तर्पयामि नमः ऐं सुरादेवीं तर्पयामि नमः
इति त्रिः स्वललाटमध्ये संतर्पयेत् ततः श्रीगुरुं गुरुपात्रामृतेन स्वशिरसि गुरुमंत्रं पठित्वा
श्रीमच्छ्री कौलश्रुतकानंदनाथ श्रीपादुकां पूजयामि नमः इति त्रिः संतर्प्य एवं श्रीमत्
परमगुरुं तर्पयामि नमः ऐं श्रीमत्परमाचार्यगुरु श्रीमच्छ्री कौलगोविंदानंदनाथ श्रीपादु
कां पूजयामि नमः श्रीमच्छ्री परापरगुरु श्रीमज्ज्योतिष्प्रकाशकौलानंदनाथ श्रीपादुकां
पूजयामि नमः श्रीमच्छ्री परमेष्ठिगुरु श्रीसाहिबकौलानंदनाथ श्रीपादुकां पूजयामि नमः
इति संतर्प्य ततः विशेषार्घ्यपात्रामृतेन मूलं ऐं श्रीमच्छ्री महात्रिपुरसुंदरी साङ्गायुधां सवा

हृनां सपरिकरां समुद्रां तर्पयामि नमः इति स्वहृदि संतर्प्य त्रिः प्रोक्षणीपात्रं संस्थाप्य वि
शेषार्घ्यबिंदुना संस्कृत्यात्मानं संप्रोक्षयेत् तेनैव जलेन यथा ऐं प्रथमकूटं आत्मतत्त्वात्म
ने नमः क्लीं द्वितीयं विद्यातत्त्वात्मने नमः सौः तृतीयं शिवतत्त्वात्मने ऐं क्लीं सौः मूलं सर्वतत्त्वा
त्मने नमः इति स्वात्मानं प्रोक्ष्य मूलेन च यागभूमिमुपकरणानि च प्रोक्ष्य तस्मात् सर्वं ब्रह्म
मयं भवेत् सर्ववस्तुषु धेनुमुद्रां दर्शयेत् इति कलशस्थापनविधिः अथात्मपूजा पुरत
स्त्रिकोणमंडलस्य द्वारे पात्रं संस्थाप्य कलशोदकेनापूर्य विशेषार्घ्यबिंदुं दत्त्वा स्वदेहं
गंधादिनालंकृत्य आत्मानं देवीरूपं भावयन् श्रीगुरुगणेशपरदेवताः प्रणम्य मूलादिब्रह्म
रंध्रांतं कुंडलिनीं बिसतंतुतनीयसीं चंद्रकोटिप्रभां द्रवीमनोलयपर्यंतं ध्यात्वा परानंदनिर्भ
रः तदात्मकत्वेन मूलविद्यामपि मूलादिब्रह्मरंध्रांतं तेजोमयीं विभाव्य तत्तेजसा पूरितं
स्वेष्टदेवतारूपं स्वदेहं भावयन् आत्मपूजां कुर्यात् प्रागुक्तयोगपीठविधिना स्वदेहं सिंहा
सनत्वेन परिकल्प्य शिरसि ऐं श्रीगुरुपादुकामुच्चार्य अमुकानंदनाथश्रीपादुकां पूजया
मि नमः इति संपूज्य मूलाधारे ऐं गं गणपतिश्रीपादुकां पूजयामि नमः इति गणेशं सं

श्री
६६

66

पूज्य योगपीठन्यासक्रमेण मडुकाद्यान्शूलाधारादि तत्तत्स्थानेषु सिंहासनांतान्संपूज्य द
त्तवामांसदत्तवामोरुसर्वांगेषु पंचप्रेतासनं संपूज्य दक्षांसादिषु धर्मादिचतुष्टयं संपूज्य हृदये
मायाविद्ये संपूज्य मध्ये पंचदशफणान्वितं अनंतं ध्यात्वा तन्मध्ये मोलाष्टदलकमलं कामे
श्वरीपीठं ध्यात्वा अनंतपद्मादिपरतत्त्वांतं संपूज्य तत्केसरेषु प्रागादिप्रादक्षिण्येन ॐ मोहिनी
श्रीपादुकां पूजयामि नमः ॐ क्षोभिणी श्रीपादुकां पूजयामि नमः ॐ वज्रिणी श्रीपादुकां पूज
यामि नमः ॐ स्तंभिनी श्रीपादुकां पूजयामि नमः ॐ आकर्षिणी श्रीपादुकां पूजयामि नमः
ॐ द्राविणी श्रीपादुकां पूजयामि नमः ॐ आह्लादिनी श्रीपादुकां पूजयामि नमः ॐ क्लिन्ना श्री
पादुकां पूजयामि नमः इति संपूज्य मध्ये ॐ क्लेदिनी श्रीपादुकां पूजयामि नमः इति संपूज्य
ॐ ह्रीं सर्वशक्तिकमलासनाय नमः इति पुष्पांजलिना स्वदेहं संपूज्य तन्मध्यकर्णिकायां श्री
चक्रं विभाव्य ॐ समस्तप्रकटगुप्तगुप्ततरेत्यादि स्वदेहं संपूज्य प्राग्युक्तयोगिनीपीठन्यासक्र
मेण षडासनपर्यंतं प्राग्विन्यस्तस्थानेषु संपूज्य दक्षांसे ॐ नादशक्ति श्रीपादुकां पूजयामि
नमः दक्षपृष्ठे ॐ बिंदुशक्ति श्रीपादुकां पूजयामि नमः दक्षशंखे ॐ कलाशक्ति श्रीपादुकां पू

जयामिनमः दक्षललाटे धँ ऊँ ज्येष्ठाशक्तिश्रीपादुकांपूजयामिनमः दक्षनेत्रे धँ रौद्रीशक्तिश्रीपा
दुकांपूजयामिनमः दक्षकर्णे धँ वामाशक्तिश्रीपादुकांपूजयामिनमः दक्षनासायां धँ विषघ्नीश
क्तिश्रीपादुकांपूजयामिनमः चिबुके धँ दूतरीशक्तिश्रीपादुकांपूजयामिनमः हृदये धँ सर्वानं
दशक्तिश्रीपादुकांपूजयामिनमः इतिसंपूज्य श्रे १९ केवेगेवेडे. इत्यादिसंः इत्येते शिवशक्तिस
दाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृतिअहंकारबुद्धिमनःश्रोत्र
त्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृ
थिव्यात्मने षड्त्रिंशत्तत्त्वरूपायश्रीमहात्रिपुरसुंदरीयोगपीठायनमः इतिसर्वांगेसंपूज्य हृत्क
मलेभगवतींध्यायेत्तत्तेजसा व्याप्तंस्वदेहंश्रीदेवीरूपंविभाव्य धँ मूलं श्रीमहात्रिपुरसुंदरीश्री
पादुकांपूजयामिनमः तर्पयामिनमः इति शिरसिपुष्पांजलिनात्रिःसंपूज्य पुरःस्थापितपात्रो
दकविंदुभिःसंतर्प्य पुनःप्राग्वन्मूलेनशिरोहृदयगुह्यपादद्वयसर्वांगेषु पंचपुष्पांजलिभिः
संपूज्य संतर्प्य हृदयत्रिकोणेलयांगतिथिनित्याषोडशनित्यागुरुपंक्तित्रयषडंगयुवतीस्तत्तत्
स्थानेषुवक्ष्यमाणविधिनासंपूज्यसंतर्प्य हृदयत्रिकोणपूजायां संहारक्रमेणनवावरणशक्तीः

श्री
६७

शिरस्त्रिकोणपूजायां सृष्टिक्रमेणावरणशक्तीश्चक्रेश्वरीश्च पूजयेत्तर्पयेत् ततः पूर्ववत् पुष्पा
ञ्जलिपंचकं स्वदेहमस्तकादिस्थानेषु विधाय धूपदीपौ निवेद्य अंतर्हवनं कुर्यात् तत्र मूलाधारे
चतुरस्रं चित्कुंडं विभाव्य तन्मध्ये कालाग्निमिव कामाग्निं वासनेंधनज्वलितं प्राणादिसंधुक्षि
तं कुंडलिनीरूपदेवताधिष्ठितं चिदग्निमंडलं विभाव्य धं ॐ धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा
स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा इति पुण्यपापकृत्याकृत्यसंकल्पविक
ल्पधर्माधर्मात्मकं हविः सम्यक् हुत्वा धं प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माधर्म
कलास्नेहपूर्णं वह्नौ जुहोम्यहं स्वाहा अथर्मं जुहोमि स्वाहा इति पूर्णां हुत्वा निरस्ताखिलप्रपं
चो निष्कलब्रह्मरूपः साधकः क्षणं तिष्ठेत् श्रीदेवीरूपमात्मानं ध्यात्वा श्रीगुरुं प्रणम्य शिरसि
अन्नपूर्णां ध्यात्वा शिवपूजावशिष्टं तत्पात्रस्थमुदकं गुरुपादुकामूलविद्याभ्यां कुंडलिन्यात्मक
श्रीपरदेवतामुखे जुहोमीति बुद्ध्या द्वितीयखंडेन सह प्राश्य श्रीपरदेवतारूपमात्मानं ध्यात्वा
प्राणायामादिपूर्वकं मूलं जप्त्वा पुनः प्राणायामादिभिः समर्प्य स्तुत्वा प्रणमेदित्यात्मपूजा
अथ पंचमयागविधिः तत्र साधकः कृतात्मपूजः स्वशिरसि श्रीगुरुपादुकां ध्यात्वा संपूजयि

त्वा प्रणम्य श्रीगुर्वाज्ञामादाय सर्वलक्षणयुक्तां ब्रह्मविद्यादीक्षितां दूतीमामंत्रितां सादरं स्वयंग
त्वा प्रणम्य समाहूयानीय स्वासने पूजास्थाने समुपवेश्य पादौ जलेन प्रक्षाल्य स्वयमुपविष्टां तां
प्रणम्य कृतांजलिः अद्यामुकेत्यादि श्रीपरदेवताप्रीत्यर्थं दूतीयजनमहं करिष्ये इति संकल्प्य प्रा
णायामं करन्यासादिकं रंगन्यासान्विन्यस्य स्ववामभागे दूतीं समुपवेश्य मूलेनाभ्यंगं कृत्वा उद्व
र्तनं मूलेनोष्णोदकेन स्नापयित्वा नीराजनं वक्ष्यमाणं कृत्वांगं प्रोंच्छ्यालंकारान् परिधाप्य के
शान् संमार्ज्य धूपयित्वा संयम्य सर्वशृंगारेण संभूष्य ललाटे सिंदूरतिलकं कृत्वा रत्नेशीवि
द्यया कुसुममालादिभिरलंकृत्य स्ववामे दूतीं स्वासने स्वयं समुपविश्य प्राणायामादि विधा
य दूतीं देवीरूपां विभाव्य प्राक्स्थापितशक्तिपात्रवत् स्वपुरः पात्रांतरं कलशं हेतुना पूर्य सं
स्कृत्य तद्धेतुमुद्धरणपात्रेणोद्धृत्य भोगपात्रेण तद्बिंदुभिः तर्पणं कृत्वा सद्वितीयं भोगपात्रं
तस्यै पुनः पुनर्निवेद्य तत्क्षणोल्लासयुक्तां ज्ञात्वा चक्रस्योत्तरभागे पर्यंकमास्तीर्य तत्र शय्योत्तर
च्छदादि समास्तीर्य तत्र पुष्पाणि विकीर्य तत्र योगपीठं वक्ष्यमाणं संपूज्य तत्र श्रीचक्रं विभा
व्य संपूज्य मेचकस्य पश्चिमे योगिनीबलिं पूर्वे क्षेत्रपालबलिं दक्षे गणेशबलिं उत्तरे वटुक

श्री
६८
68

बलिं दत्वा तदुपरि हृतां पश्चिमाभिमुखीं समुपवेश्य स्वयं पूर्वाभिमुखः प्राणायामादि विधाय
हृती देहे मातृकां विन्यस्य प्रागुक्तवशिन्याद्यष्टकं च विन्यस्य शिरसि ॐ अं ५ रब्लूं वशिनीवाग्दे
वतायै नमः ललाटे ॐ कं ५ क्लीं कामेश्वरीवाग्देवतायै नमः भ्रूमध्ये ॐ चं ५ नव्लीं मोदिनीवा
ग्देवतायै नमः ॐ टं ५ यल्रूं विमलावाग्देवतायै नमः हृदि ॐ तं ५ जम्रीं अरुणावाग्देवतायै
नमः नाभौ ॐ पं ५ हसवलक्षूं जयिनीवाग्देवतायै नमः मूलाधारे ॐ यं ४ झमरयूं सर्वेश्वरीवाग्दे
वतायै नमः मूलाधारादि पादांते ॐ शं षं सं हं लं क्षं ॐ क्ष्म्रीं कौलिनीवाग्देवतायै नमः इति वा
ग्देवताष्टकन्यासः पादयोः ॐ द्रां द्राविणबाणाय नमः मुखे ॐ द्रीं क्षोभनबाणाय नमः ॐ क्लीं
वशीकरणबाणाय नमः ॐ ब्लूं आकर्षणबाणाय नमः ॐ सः मोहनबाणाय नमः इति विन्य
स्य तस्या ललाटे ॐ ह्रीं कामाय नमः ॐ गले क्लीं मन्मथाय नमः हृदि ॐ ऐं कंदर्पाय नमः ना
भौ ब्लूं मकरध्वजाय नमः मूलाधारे ॐ स्त्रीं मीनकेतवे नमः इति विन्यस्य तस्याः शिरसि ॐ सु
भगाय ऋषये नमः मुखे ॐ गायत्री छंदसे नमः हृदये ॐ भगमालिन्यै देवतायै नमः गुह्ये
ॐ ह्रीं बीजाय नमः पादयोः स्त्रीं शक्तये नमः नाभौ ॐ क्लीं कीलकाय नमः इति विन्यस्य पुनः

तस्याः शिरसि त्रिकोणं विभाव्य तत्त्रिकोणमध्ये बालां त्रिपुरां ध्यात्वा ऐं क्लीं सौः श्रीबालादे
वीश्रीपादुकां पूजयामि नमः तर्पयामि नमः अग्रकोणे ॐ क्लीं कामेश्वरीश्रीपादुकां पूजयामि त
र्पयामि नमः वामकोणे ॐ ऐं वागीश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः दक्षकोणे ॐ कुल
गणपतिश्रीपादुकां पूजयामि नमः तर्पयामि नमः इति संपूज्य दक्षस्तने ॐ क्लीं कामदेवश्रीपादु
कां पूजयामि तर्पयामि नमः वामे ॐ वं वसंतश्रीपादुकां पूजयामि तर्पयामि नमः योनौ ॐ श्रीर
तिश्रीपादुकां पूजयामि तर्पयामि नमः नाभौ ॐ श्रीं प्रीतिश्रीपादुकां पूजयामि तर्पयामि नमः
शिरस्त्रिकोणाद्बहिः ॐ गं गणनाथपादश्रीपादुकां पूजयामि नमः ॐ सिंहपादश्रीपादुकां पूज
यामि नमः तर्पयामि नमः ॐ विजयापादश्रीपादुकां पूजयामि तर्पयामि नमः ॐ भुजंगपाद
श्रीपादुकां पूजयामि नमः तर्पयामि नमः ॐ चित्रपादश्रीपादुकां पूजयामि तर्पयामि नमः
ॐ कनकपादश्रीपादुकां पूजयामि तर्पयामि नमः ॐ कनकाध्यक्षपादश्रीपादुकां पूजयामि
तर्पयामि नमः इति परितः संपूज्य त्रिकोणस्य वामकोणे ॐ मां महालक्ष्म्यै नमः दक्षे ॐ सर
स्वत्यै श्री० रोमस्तु ॐ नेदनोद्यानाय श्री० इति संपूज्य शिरस्त्रिकोणमध्ये नवयोन्यात्मक

श्री र्णिकं सकेसरं अष्टदलकमलं त्रिवृत्तचतुर्द्वारयुतं विभाव्य मण्डूकादिपरतत्त्वान्तं योगपीठं संपूज्य
९५ अष्टदलकेसरेषु ॐ मायायै ॐ ज्येष्ठायै ॐ रौद्र्यै ॐ अम्बिकायै ॐ इच्छायै ॐ ज्ञानायै ॐ क्रियायै
ॐ कुब्जिकायै ॐ विद्यायै ॐ विषघ्न्यै ॐ हृतयै ॐ आनन्दायै इति स्वाद्यादिप्रादक्षिण्येन संपूज्य म
ध्ये ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः इति संपूज्य तत्र ऐं क्लीं सौः बालामूर्तिं परिकल्प
यामीति बालामूर्तिं परिकल्प्य पुष्पाञ्जलिं कराभ्यामादाय हृदि बालां ध्यात्वा पुनस्तेजोरूप
तामापाद्य तत्तेजसा सुषुम्णामार्गेण ब्रह्मरन्ध्रं नीत्वा वहन्नासाध्वना बहिर्निःसार्य पुष्पाञ्जलौ
69 संयोज्य ऐं क्लीं सौः भगवति इहागच्छ २ इति हृतीशिरसि पुष्पाञ्जलिं निक्षिप्यावाह्यावाह
नीमुद्रां प्रदर्श्य स्थापिन्यादिपरमीकरणान्तं मुद्रा विधाय प्राणप्रतिष्ठां कृत्वा वरदाभयपुस्तका
क्षमालापाशाङ्कुशधनुर्बाणकपालकमलाख्यमुद्राः प्रदर्श्य ध्याने मूलादिब्रह्मरन्ध्रान्तं विसत
न्तुतनीयसीं भ्रमद्भ्रमरनीलाभधम्मिल्लामलपुष्पिणीं ब्रह्मरन्ध्रस्फुरच्छिन्नमुखरेखाविराजि
तां मुखरेखालग्नरत्नतिलकां भ्रुकुटीज्ज्वलां विभ्रद्दुष्टक्रावज्राढ्यचन्द्ररेखाकिरीटिनीं भ्र
मद्भ्रमरनीलाभनयनत्रयराजितां सूर्यभास्वन्महारत्नकुण्डलालंकृतां परां शुक्राकारस्फु

रत्नमुक्ताहारभूषणभूषितां ग्रैवेयांगदपंक्तालीस्फुरत्कांतिविराजितां गंगातरंगकर्पूरमृ
णालवरविभूषितां श्रीखंडवल्लीसदृशबाहुवल्लीविराजितां कंकणादिलसद्भूषांमणिबंध
लसत्प्रभां प्रवाललतिकाकारपाणिपल्लवशोभितां वज्रवैडूर्यमुक्तालीमेखलांविमलप्र
भां रक्तोत्पलदलाकारपादपल्लवशोभितां नक्षत्रमालासंकाशमुक्तामंजीरमंडितां वामेनपा
णिनैकेनपुस्तकंचापरेणतु अभयंचप्रयच्छंतीसाधकानांवरानने अक्षमालांचवरदंदक्षि
पाणिद्वयेनतु दधतींचिंतयेद्देवींवश्यसौभाग्यवाक्प्रदां क्षीरकुंदेंदुधवलांप्रसन्नांसंस्मरेत्प्रि
ये इतिबालांत्रिपुरांध्यात्वा ऐंक्लींसौः भगवति एतत्ते आसनंनमः ऐं एषतेऽर्घः स्वाहा ऐं एत
त्तेपाद्यंनमः ऐं एतत्तेआचमनीयंस्वधा ऐं एषतेमधुपर्कः स्वधा ऐं एतत्तेस्नानंनमः पुन ऐं ए
तत्तेआचमनीयंस्वधा ऐं एतेतेवाससीनमः ऐं पुनः एतत्तेआचमनीयंस्वधा ऐं इमानितेभूषणा
निनमः ऐं एषतेगंधोनमः ऐं इमानितेपुष्पाणिवौषट् इतिसंपूज्य प्राग्योनिमध्ययोन्योरंतरा
ले ऐं गुरुभ्योनमः ऐं परमगुरुभ्योनमः ऐं परापरगुरुभ्योनमः ऐं इतिगुरुपंक्तित्रयंसंपूज्य योनिमु
द्रांवद्ध्वा हृदि मुखे भ्रूमध्ये ललाटे ब्रह्मरंध्रेसंस्थाप्यदर्शयेत् त्रिकोणस्यवामकोणे ऐं रत्यैनमः दक्षे

श्री
८०

70

क्लीं श्रीं स्ते अग्रे सौः मनोभवाय नमः इति संपूज्य अष्टदलकेसरेषु अग्नौ ईशाने निर्ऋतौ वायौ दे
व्यग्रे पंचांगं तदग्रादिचतुर्दिक्षु अस्त्रं इति षडंगं प्रादक्षिण्येन संपूज्य अष्टकोणांतरालेषु देव्य
ग्रमारभ्य चतुर्दिक्षु प्रादक्षिण्येन द्रां द्राविण्यै नमः ॐ द्रीं क्षोभिण्यै नमः ॐ क्लीं वशीकरिण्यै नमः
ॐ ब्लूं आकर्षिण्यै नमः अग्रे ॐ सः संमोहिन्यै नमः एषु वस्थानेषु ह्रीं कामाय नमः क्लीं मन्मथाय नमः
ॐ ऐं कंदर्पाय नमः ॐ ब्लूं मकरध्वजाय नमः ॐ स्त्रीं मीनकेतवे नमः इति संपूज्य पूर्वाद्यष्टयोनिषु ऐं क्लीं
ब्लूं स्त्रीं सः सुभगायै नमः ॐ भगायै नमः ॐ भगमालिन्यै नमः ॐ भगसर्पिण्यै नमः ॐ अनंगमालि
न्यै नमः ॐ अनंगायै नमः ॐ अनंगकुसुमायै नमः ॐ अनंगमेखलायै नमः इति संपूज्य अष्टदले
ॐ अं असितांगभैरवाय नमः ॐ आं ब्राह्म्यै नमः ॐ इं रुरुभैरवाय नमः ॐ ईं माहेश्वर्यै नमः ॐ उं चंडभैरवा
य नमः ॐ ऊं कौमार्यै नमः ॐ ऋं क्रोधभैरवाय नमः ॐ ॠं वैष्णव्यै नमः ॐ ऌं उन्मत्तभैरवाय नमः ॐ ॡं
वाराह्यै नमः ॐ एं कपालिभैरवाय नमः ॐ ऐं इंद्राण्यै नमः ॐ ओं भीषणभैरवाय नमः ॐ औं चामुंडायै न
मः ॐ अं संहारभैरवाय नमः ॐ अः महालक्ष्म्यै नमः इति संपूज्य अष्टदलांतरालेषु कामरूपाय म
लयाय कोल्लगिरये कुलांतकाय चौहाराय जालंधराय उड्डियानाय देवीकोटाय इति संपूज्य वृत्ते

देवयाग्रादिप्रादक्षिण्येन हेरुकाय धँ त्रिपुरांतकाय धँ वेतालाय धँ अग्निजिह्वाय धँ कालांतकाय धँ क
पालिने धँ एकपादाय धँ भीमरूपाय ईं ईशानयोर्मध्ये धँ हाटकेश्वराय निरृतिवरुणयोर्मध्ये म
लयाय इति संपूज्य तद्बहिः दत्तदिक्षु इंद्रादीन् दशाशाणिच संपूज्य धूपदीपनैवेद्यादीनि निवेद्य तद
भेदबुद्ध्या हृत्ये हेतं समर्प्य स्वदेहे प्राग्वत् क्लीं केदादि मातृकां विन्यस्य स्वशिवे ॐ ह्रीं कं पँ हस पँ सक
लह्रीं शिवाय नमः इति दशार्णविद्यया संपूज्य शिवाग्रे हूं ईशानाय नमः तत्पूर्वे ह्रैं तत्पुरुषाय न
मः दक्षे ह्रुं अघोराय नमः वामे ह्रिं सद्योजाताय नमः तत्पृष्ठे ह्रीं वामदेवाय नमः इति संपूज्य ए
ष्वेव स्थानेषु धँ निवृत्त्यै नमः धँ प्रतिष्ठायै नमः धँ विद्यायै नमः धँ शांत्यै नमः धँ शांत्यतीतायै नमः इति
संपूज्य क्लां क्लीं क्लूं क्लैं क्लौं क्लः इति षडंगं विन्यस्य स्कंधयोर्मध्ये मूलविद्यां नंदिकेश्वराय नमः तस्यै
हेतं दत्वा तदवशेषास्वादनेन स्वयं तरुणोल्लासयुक्तः तस्याः स्तनयोर्मध्ये ऐं ह्रीं चपले चपलचित्ते रे
तो मुंच मुंच ब्लूं क्लीं स्त्रीं हरस्त्रीं इति द्वाविंशी विद्यां त्रिः जपित्वा तस्या हृदि अनंगकुसुमाद्यष्टशक्तिप
रिवृतां कामेश्वरीं रक्तवर्णां रक्तमाल्यानुलेपनवसनालंकृतां इक्षुकोदंडपुष्पबाणधरां चंद्रार्धशे
परिसंस्थाप्य स्वमंत्रेण संपूज्य हुमिति दग्धं दर्भयुगलं आज्योपरि त्रिः परिभ्राम्याग्नौ निक्षिप्य
उत्तराग्रं पवित्रं धृत्वाग्नौ संस्कृत्य नाडीत्रयं ध्यात्वा दक्षादिडयाग्नये स्वाहा इति वामनेत्रे वाम
भागात् पिंगलया वायवे स्वाहा इति दक्षनेत्रे सुषुम्णया सूर्याय स्वाहा इति मध्यात् मिश्री
कृत्य प्रजापतये स्वाहा इति हुत्वा बिल्वादिफलं गृहीत्वा आज्यवीक्षणं कुर्याद्यथा आज्यं ते
जः समुद्दिष्टमाज्यं पापहरं परं आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः दिव्यांतरिक्ष
भौमादिर्यत्ते किल्बिषमागतं तत्सर्वमाज्यस्पर्शेन विनाशमुपगच्छतु आत्मनो वाङ्मनः का
योपार्जितपापनिवारणार्थं श्रीमहात्रिपुरसुंदरीप्रीत्यर्थं इदमाज्यमर्पयामि नमः स्वाहा इत्या
ज्यवीक्षणं कृत्वा ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय साधय स्वाहा

93

इत्याहुतित्रयं दद्यात् दक्षे ब्रह्मासनमास्तीर्य आवाहनं तत्र कृत्वा ॐ कृतैतत्त्रित्यहोमकर्मणि कृ
ताकृतावेक्षकत्वेन त्वं ब्रह्मा भवेति प्रपूज्य वह्नावासनं कुशत्रयं विन्यस्य तत्र श्रीदेवीमावाह्य
तद्यथा मूले श्रीमहात्रिपुरसुन्दरि अत्रागच्छ २ संतिष्ठ २ सन्निधेहि २ सन्निरुध्यस्व २ संमुखी भव २
मम सर्वोपचारसहितां पूजां गृहाण २ वौषट् इत्यग्नौ देवतामावाह्य पाद्यादिभिः सर्वोपचारैः सं
पूज्य मूलेन चरुमभिमंत्र्य वामेन स्रुतमो भव स्वा इत्यग्नौ हा इति चरौ दक्षे सुशीतो भव स्वा
इति चरौ हा इत्यग्नौ पूर्णाहुतिं दद्यात् यथा मूलेन हुतशेषं स्रुचे कृत्वा स्रुवेणाच्छाद्य स्वदे
वताध्यानेपवन् स्वाहान्तेन मूलेन पूर्णाहुतिं हुत्वा ॐ प्राणाय स्वाहा ॐ अपानाय स्वाहा ॐ व्याना
य स्वाहा ॐ उदानाय स्वाहा ॐ समानाय स्वाहा इति पंचाहुतीः हुत्वा मूले वह्निदेव्योरेकीकारं
करोमि स्वाहा इति पंचविंशत्याज्याहुतीः जुहुयात् वह्निदेव्योः नाडीसंधानं करोमि स्वाहा इति
नाडीसंधानार्थं एकादश गणपत्यादीनां होमं कृत्वा प्राणायामऋष्यादिन्यासान् विधाय
मूलेन स्वाहान्तेन षोडशाहुतीः हुत्वा अथ वामकरेण मालां गृहीत्वा दक्षकरेण स्रुवं संगृ
ह्य यथाशक्ति मंत्रहोमं निर्वर्त्य षडंगाहुतीः जुहुयात् यथा ऐं प्रथमकूटं हृदयाय नमः हृ

श्री
९४

95

दयशक्त्यै स्वाहा क्लीं द्वितीये शिरसे स्वाहा शिरःशक्त्यै स्वाहा सौः तृतीये शिखायै वषट्
शिखाशक्त्यै स्वाहा ऐं प्रथमे कवचाय हुं कवचशक्त्यै स्वाहा क्लीं द्वितीये नेत्रत्रयाय वौषट् नेत्रश
क्त्यै स्वाहा सौः तृतीये अस्त्राय फट् अस्त्रशक्त्यै स्वाहा इति हुत्वा आवरणदेवता होमं कुर्यात्
समस्तेत्यादि समष्टिमंत्रेण स्वाहान्तेनैकमाहुतिं जुहुयात् तत्तिथिनित्यायै षोडशनित्याभ्यो
पि जुहुयात् पूर्णाहुतिं दद्यात् यथा आदौ देवीध्यानं पठित्वा मूलं समस्तप्रकटेत्यादि सर्वमं
त्रं पठित्वा न्यूनातिरिक्तमंत्रचक्रात्मनिरस्तु वौषट् स्वाहा इति पूर्णां दत्वा गुह्यातिगुह्यगो
प्त्री त्वं गृहाणावहनं मम इति शिवमस्तु यजमानस्य च्छिद्रं माभूत् कदाचन देवदेव्याः प्र
सादेन रत्नरत्नोस्तु मे भूषणं अनेन मंत्रहोमेन श्रीमहात्रिपुरसुंदरी सांगा सशिवा सायुधा
सपरिवारा सवाहना समुद्रा प्रीयतां प्रीता भवतु ततस्तर्पणं कृत्वा ईशानकोणात् स्रुचा
भस्माहृत्य भस्मतिलकं कुर्यात् यथा ॐ अग्निरिति भस्म ॐ वायुरिति भस्म ॐ जलमिति
भस्म ॐ स्थलमिति भस्म ॐ आकाशमिति भस्म सर्वं भस्म वा भस्मेदं ॐ जमदग्नेः कश्यप
स्य त्र्यायुषं तन्मे अस्तु त्र्यायुषं इति भस्मतिलकं ॐ शिवमस्तु यजमानस्येति पठन् ललाटे भस्म

तिलकं कुर्यात् ॐ फडग्निं विमुंचामि ॐ फडग्निं विमोक्ष्यामि ॐ फडग्निं विसृजामि इत्यग्निं विसृ
ज्य ततो देवतायै श्रीचक्रे स्तुत्वाज्योऽर्घ्यं निवेद्य तत्रविधिवद्ध्यात्वा अग्निं विसर्जयेद्यथा त्वमस्य मं
त्रनाथाय नित्यानेदमयाय च धर्मार्थकाममोक्षाय पुनरागमनाय च इत्यग्नौ पुष्पं दत्वा संहार
मुद्रया बाह्याग्निं स्वात्माग्नौ संयोज्य मूलेन श्रीदेव्यै पुष्पांजलिं निवेद्य श्रीदेवीं प्रणमेदिति नि
त्यहोमविधिः ततः कुरुकुल्लावाराह्योश्च पूजयेद्यथा ॐ क्रुं कुरुकुल्ले ह्रीं मम सर्वजनं वशमा
नय स्वाहा २१ वैं वों वाराहै नमः इति बलिद्वयं दद्यात् अथ वटुकादि बलिः तत्र श्रीचक्रस्य
ईशाने चतुरस्रवृत्तत्रिकोणात्मकं मंडलं विधाय तत्र साधारमर्घ्यपूर्णं सलिलं पात्रं निधाय
वों वटुकाय नमः इति संपूज्य यँ एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभारभास्वर त्रिनेत्रज्वा
लामुख सर्वविघ्नान्नाशय नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहेति वामांगुष्ठानामि
काभ्यां च बलिं दद्यात् इति वटुकबलिः आग्नेये तथैव मंडलं कृत्वा साधारं पात्रं तत्र निधा
य यँ यां योगिनीभ्यो नमः यँ ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले निस्तले वा पाताले
वानले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादि

श्री
९५

केनप्रीतादेव्यः सदानः शुभवलिविधिनापांतुवीरेंद्रवंद्याः योयोगिनीभ्यः सर्ववर्णयोगिनीभ्यो
हुंफट्स्वाहा इतिवामांगुष्ठमध्यमानामाभिः वलिमुत्सृजेत् इतियोगिनीवलिः २ नैऋते
क्षांक्षेत्रपालायनमः ॐ क्षांक्षींक्षूंक्षैंक्षौंक्षः स्थानक्षेत्रपालधूपदीपादिसहितंवलिंगृह्णगृह्ण
स्वाहा योस्मिन्क्षेत्रेनिवासीचक्षेत्रपालाः सकिंकराः सप्रीतोवलिदानेनसर्वरक्षांकरोतुमे
इतिवामांगुष्ठतर्जनीभ्यांवलिमुत्सृजेत् ३ वायव्ये गांगणपतयेनमः ॐ गांगींगूंगैंगौंगः गग
णपतयेवरवरदसर्वजनंमेवशमानयवलिंगृह्णगृह्णस्वाहा सर्वदासर्वकर्माणिनिर्विघ्नंसाध
यन्मम शांतिंकरोतुसततंविघ्नराजः सशक्तिकः इतिवामांगुष्ठमध्यमाभ्यांवलिमुत्सृजेदिति
गणपतिवलिः ४ स्ववामेउत्तरेसर्वभूतेभ्योनमः ॐ ऊँ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः हुंफट्
स्वाहा सर्वभूतेभ्यएषवलिःनमः इतिसर्वांगुलीभिःवलिमुत्सृजेत् इतिभूतवलिः ५ अश
क्तएकस्मिन्पात्रेवावलिपंचकंदद्यात् अस्मिन्नेवावसरेच्छागादिवलिंदद्यात् तत्रमूलेन
पशुंसंस्नाप्य गंधादिभिरलंकृत्य श्रीदेव्यग्रेसंस्थाप्य मूलेनप्रोक्षणीजलेनप्रोक्ष्यास्त्रेण
संरक्ष्य कवचेनावगुंठ्य मूलं धेनुमुद्रयामृतीकृत्य सर्वदेवतारूपिणेवलिरूपायाशुकपश

वेनमः इतिगंधादिनात्रिःसंपूज्य तस्यदक्षकर्णे पशुपाशायविद्महे विश्वकर्णायधीमहि तन्नो
जीवःप्रचोदयात् इतिपशुगायत्रीत्रिःपठित्वा पुरतःखड्गंनिधाय ॐकालिकालिवज्रेश्वरिलोह
दंडायैनमः इतिगंधादिनात्रिरभ्यर्च्य तस्यपृष्ठे ॐवागीश्वरीब्रह्मभ्यांनमः मध्ये ॐलक्ष्मीनारा
यणाभ्यांनमः अग्रे ॐउमामहेश्वराभ्यांनमः इतिसंपूज्य नत्वामंत्रयेत् खड्गायखरनाशायदे
वकार्यार्थतत्परः पशुश्छेद्यस्त्वयाशीघ्रंखड्गनाथनमोस्तुते इत्यभिमंत्र्य गन्धाक्षतजलादिक
मादाय मूलं अद्यामुकमासस्येत्यादि अमुकगोत्रः अमुकशर्मा अमुककामः श्रीमहात्रिपुर
सुंदरि इमंपशुंतुभ्यंसमर्पयामि अहंसंप्रसीद इतिपठित्वापशोःशिरसिनिक्षिप्य तच्छिरोधृ
त्वा यज्ञार्थेपशवःसृष्टायज्ञार्थेपशुघातने अतस्त्वांघातयिष्यामितस्माद्यज्ञेवधोवधः शिवाय
तमिदंपिंडमतस्त्वंशिवतांगतः उद्बुध्यस्वपशोत्वंहिनशिवस्त्वंशिवोसिहि इतिसंबोधयित्वा
करेखड्गमादाय सौंःअस्त्रायफट् छिंधिछिंधिस्वाहा इतिखड्गंतस्यस्कंधेयोजयेत् ततःस्वयंदे
वीरूपोभूत्वा निर्विकल्पएकेनप्रहारेणछिंद्यात् सविकल्पःसन्परहस्तेनकारयेत् अत्रैवब्रा
ह्मणव्यतिरिक्तैःस्वात्मादिबलिंदद्यात् इतिबलिंदत्वा मूलंदेवींसंपूज्य स्वर्णादिपात्रस्थंजल

श्री
९९

96

समस्तीकृत्य मूलेन त्रिरभिमंत्र्य मूलं श्रीमहात्रिपुरसुंदरीश्रीपादुकायै नमः इति सुशीतलस्वच्छ
सलिलं पावनं देवि शीतलं सुमनोहरं मया निवेदितं भक्त्या गृहाण परमेश्वरि इति श्रीदेव्या वामेनि
वेदयेत् मूलं श्रीमहात्रिपुरसुंदरि तृप्तासीति विज्ञाय स्वर्णादिपात्रस्थं जलं समस्तीकृत्य मूलेनाभि
मंत्र्य अमृतापिधानमसि स्वाहा इति श्रीदेव्या हस्ते किंचिज्जलं दत्त्वा तया प्राशितं विभाव्य गतसारं नै
वेद्यमुद्धृत्य नैरृत्यां संस्थाप्य अन्यत्र स्थाने संशोध्य हस्तौ च संशोध्य हस्तक्षालनजलं दत्त्वा सु
गंधादि च दत्त्वा पुनः हस्तक्षालनं च दत्त्वा सुगंधजलेन गंडूषाणि च कारयित्वा चरणौ प्रक्षाल्य
समानीय निवेश्य वस्त्रेण करपादयोः जलमपनीय सुगंधेन करौ सुरभीकृत्य सुगंधानुलेपन
माल्यानि समर्प्य तांबूलं प्राग्वद्दत्त्वा प्रसन्नपूजां कुर्यात् मूलं सुप्रसन्ना श्रीमहात्रिपुरसुंदरी श्री
पादुकां पूजयामि नमः इति पुष्पांजलिभिः संपूज्य मूलं सुप्रसन्नायै श्रीमहात्रिपुरसुंदरीश्रीपा
दुकायै अर्घ्यं कल्पयामि स्वाहा इत्यर्घ्यं दत्त्वा गंधादिपूजां प्राग्वन्निवेद्य इति सुप्रसन्नपूजा ततः
आरात्रिका स्वर्णादिपात्रे सिंदूरादिना अष्टदलं निर्माय तन्मध्ये दलाष्टके च यवपिष्टादिना र
चितानि नव दीपपात्राणि संस्थाप्य घृतेनापूर्य कर्पूरादिवर्तिकानि निक्षिप्य भुवनेश्वरीं प्रज्वाल्य

श्रीं ह्रीं क्लूं स्लूं म्लूं ब्लूं न्लूं ह्रीं श्रीं इति नवरत्नेश्वरीविद्ययात्रिरभिमंत्र्य चक्रमुद्रां प्रदर्श्य रत्नेश्वरीवि
द्यां पुनरुच्चार्य रत्नेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः इति संपूज्य मूले मूलदेवीमारात्रि
कायां संपूज्य पात्रमामस्तकमुद्धृत्योत्थाय श्री समस्तचक्रचक्रेशीयुते देवि नवात्मिके आरा
त्रिकमिदं देवि गृहाण मम सिद्धये इति पठन् देव्या मस्तकोपरि त्रिः भ्रामयेच्छर्वं नवकृत्वा नीरा
जयेदिति आरात्रिकविधिः गणेशसूर्यहरिहरादीनां समर्प्य ततः कुमारीं स्वस्वक्रमेण मूलेन
पूजयेत् तत्रादौ सर्वांगसंपूर्णां कुमारीमानीय तस्याः पादौ प्रक्षाल्य स्वच्छवस्त्रेण मार्जयि
त्वा पूजापीठे समुपवेश्य तस्याः पादौ पुनः प्रक्षाल्य मंत्राक्षरमयीं लक्ष्मीं मातृकारूपधारि
णीं नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहं इति मस्तकोपरि पठित्वा बालाविद्यामुच्चा
र्य श्रीकुमारीश्रीपादुकां पूजयामि नमः इति कुमारीपादौ संपूज्य स्वमूलेन गंधादिदीपांतैः उप
चारैः संपूज्य तत्र श्रीदेवीं ध्यात्वा पुष्पैः ध्यानेन संपूज्य आचमनीयभोजनतांबूलवस्त्रादिदक्षि
णां च समर्प्य तस्यै शक्तिपात्रे निवेदयेद्धि सृजेदिति कुमारीपूजनं श्रीमद्गुरवे गुरुपात्रे तदभा
वे तत्समानाय तदभावे श्रीगुरुपादुकाविद्यां तेन स्वशिरसि निवेदयेदिति श्रीगुरुसंप्रदायः ततो

श्री
९८

97

मूलेन मूलदेव्यै पुष्पांजलिं निवेद्य प्राणायामकरषडंगन्यासान् विधाय स्वात्मानं कामकलारूपं
ध्यायन् स्वशिरसि पंचदशनित्याः संपूज्य अआएकचटतपयषवायुशक्तिश्रीपादुकां पूजयामि
तर्पयामि नमः इईऐखछठथफरसश्रीपादुकां पूजयामि तर्पयामि नमः अग्निशक्तिश्रीपादुकां
पूजयामि तर्पयामि नमः उऊओगजडदबलह इलाशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः
ऋॠऔघझढधभवल अंबुशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ऌॡअंङञणनम
श तः खशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः इति शिरस्येव संपूज्य ओं ह्रीं हंसः सोहं स्वाहा
आत्मने नमः इति स्वात्मानं शिरसि ध्यायन् इत्थमात्मानं संपूज्य श्रीदेवीध्यानं कुर्यात् उद्यत्
हेमरुचिरां रविचंद्रवह्निनेत्रां धनुःशरयुतांकुशपाशान् इति पूर्वोक्तविधिना जपं विधा
य देवीतोदित्यशापहरी संपुटादिकं कुर्यात् इति सामान्यार्घ्यास्तेन श्रीदेव्या वामहस्ते तेजोम
यं जपफलं समर्प्य मालां संपूज्य रहःस्थाने स्थापयेत् ततो मूलेन श्रीदेव्यै पुष्पांजलिं दत्वा क
वचसहस्रनामस्तोत्रपाठं विरचय्य घंटावादनपूर्वं श्रीदेवीस्तोत्रं पठेत् श्रीमच्छ्रीकोशरूद
यं पंचसिंहासनात्मकं फलेकल्पलतानां च चारुरत्नस्फुरत्करं चतुर्थीयतनानां दिचत्वरान्व

यकोशगं निस्तानेदं परंब्रह्मधाम नौमि त्र्यक्षमये गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं दे
वीं मंत्रमयीं नौमि मातृकां पीठरूपिणीं प्रणमामि महादेवीं मातृकां परमेश्वरीं कालहल्लहलो
ल्लोलकलनाशमकारिणीं यदक्षरैकमात्रेण संसिद्धेः स्पर्धते नरः रविताक्ष्येंदुकंदर्पशंकरान
लविष्णुभिः यदक्षरशशिज्योत्स्नामंडितं भुवनत्रयं वंदे सर्वेश्वरीं देवीं मातृकां सिद्धमातृकां य
दक्षरमहासूत्रे प्रोतमेतज्जगत्रयं ब्रह्मांडादिकटाहांतं तां वंदे सिद्धमातृकां यदेकादशमाधा
रं बीजं कोणत्रयोद्भवं ब्रह्मांडादिकटाहांतं जगदद्यापि दृश्यते अकचादिटतोन्नद्धपयशा
क्षरवर्गिणीं ज्येष्ठांगबाहुहृत्पृष्ठकटिपादनिवासिनीं तामीकाराक्षरोद्धारां सारात्सारां
परात्परां प्रणमामि महादेवीं परमानंदरूपिणीं अद्यापि यस्या जानंति न मनागपि देवताः
केयं कस्मात्क्व केनेति सरूपारूपभावनां वंदे तामहमक्षय्यक्षकाराक्षाकाररूपिणीं देवीं कुल
कुलोल्लोलप्रोल्लसंतीं परां शिवां वर्गानुक्रमयोगेन यस्यां मात्राष्टकं स्थितं वंदे तामष्टवर्गोत्थम
हासिद्ध्यष्टकेश्वरीं कामपूर्णजकाराख्यश्रीपीठांतर्निवासिनीं चतुराज्ञाकोशभूतां नौमि
श्रीत्रिपुरामहं एवं द्वादशभिः श्लोकैः स्तवनं सर्वसिद्धिकृत् देव्यास्त्वखंडरूपायाः स्तवनं तव

श्री
९८

98

उद्यतः इति स्तुत्वा पुष्पाञ्जलिमादाय ग्रन्थैश्च वैदिकैः पौराणिकैः स्तवैः स्तुत्वा श्रीदेव्याश्चर
णयोः क्षिपेत् ततः प्रार्थनमुद्रां बद्ध्वा प्रार्थनस्तवं पठेत् किं किं दुःखं दनुजदलनि क्षीयते न
स्मृतायां का का कीर्तिः कुलकमलिनि ख्याप्यते न स्तुतायां का का सिद्धिः सुरवरनुते प्राप्यते ना
र्चितायां के के योगे त्वयि न चिनुते चित्तमालम्बितायां सर्गासंसर्गसंरम्भस्फारिताद्यादिविभ्रमे
चिच्चन्द्रमण्डलान्तस्थे नमस्ते हरवल्लभे जगदाह्लादनोद्योतयोगभोगावियोगिनि स्थितिभाव
स्थिते गौरि नमः स्थाणुप्रियेम्बिके भावाभावपृथग्भावस्वधर्मोदयरूपिणि चैतन्यपञ्चके दे
वि नमस्तुभ्यं हराङ्गने सृष्टिस्थित्युपसंहारप्रत्युद्गतपदोदये चिद्विश्रान्तमहासत्तामात्रे मात्रे
नमोस्तु ते वह्न्यर्कशीतकिरणब्रह्मचक्रान्तरोदिते चतुष्पीठेश्वरी देवि नमस्त्रिपुरसुन्दरि
चराचरमिदं विश्वं प्रकाशयसि पाशय मातृकारूपमास्थाय तस्यै मातर्नमोस्तु ते स्मृता भव
भयं हंसि पूजितासि शुभंकरी स्तुता त्वं वाञ्छितं वस्तु ददासि करुणाकरे भक्तस्य मे नित्यपूजा
युक्तस्य परमेश्वरि वाग्भवादिमहासिद्धिं देहि त्रिपुरसुन्दरि परमानन्दसन्दोहप्रमोदभरनिर्भरे
दुःखत्रयपरिम्लानवदनं पाहि मां शिवे शब्दब्रह्ममये स्वच्छे देवि त्रिपुरसुन्दरि यथाशक्ति जपं

पूजां गृहाण मदनुग्रहात् देवि त्वं पाहि मां नित्यं सदा ज्ञानैकरूपिणि मोहाहिनैव दष्टं च सच्चिदानं
दरूपिणि द्रव्यहीनं क्रियाहीनं विधिहीनं च यद्भवेत् सर्वं तत्कृपया देवि त्वमस्व परमेश्वरि यन्म
या क्रियते कर्म जाग्रत्स्वप्नसुषुप्तिषु तत्सर्वं तावकी पूजा भूयाद्भूत्यै नमः शिवे यन्मयोक्तमिह
ज्ञानात् तन्महत्स्वल्पमेव वा हंत सर्वजगद्धात्रि त्वेतत्क्षमय मेञ्जलिः हेताहेत महामोहशर्वरी
तपण त्नमः भास्वानिव जयत्येको गणेशः शक्तिसंयुतः प्रतिभासागरोल्लासो निशाकर इवाप
रः मूर्तियुक्तः स जयति वटुकः खांडवान्वितः षड्विंशत्तत्त्वभरितं त्वेतेयः पालयत्यलं देवेशं
तमहं नौमि वारुणाख्यं महाबले चतुष्पीठनिवासिन्यो योगीश्वर्यो महाबलाः चतुष्षष्टिप्र
कारस्ता नित्यं वंदे कुलागतः भेदाभेदमहामोहविवर्तपरिमंडितां आश्रयेंती समयां धात्रिं
शारणीं नमाम्यहं इति स्तुत्वा पुष्पांजलिं दत्वा प्रागुक्तगुरुस्तोत्रेण पितृगुरुं स्तुत्वा प्रणम्य
सर्वशक्तिक्रमोद्भूतप्रभुश्रीहमिहात्मिको देवस्य देवतो कोचित्संवित्स्वखमयीश्रये इत्युक्त्वा
स्वनमस्कारमुद्रां प्रदर्श्य प्रदक्षिणीकृत्वा सर्वमंगलमंगल्ये शिवे सर्वार्थसाधके शरण्ये
त्र्यंबके गौरि नारायणि नमोस्तु ते इति श्लोकं सप्तधा पठित्वा साष्टांगं पंचांगं वा प्रणम्य

श्री ॐ विततस्वस्तिककमठमुष्टियोन्याख्याभिः पंचमुद्राभिः प्रणमेत् पुनः साष्टांगंप्रणम्य भूमौस्ख
५५ लितपादानांभूमिरेवावलंबनं त्वयिजातापराधानांत्वमेवशरणंशिवे अपराधोभवत्येवसेव
कस्यपदेपदे कोपरःसहतेलोकेकेवलंस्वामिनेविना अपराधसहस्राणिक्रियंतेहर्निशंम
९१ या समस्तंसविधंसर्वमितिमातःक्षमस्वमे इतिबहुधाप्रणतिपूर्वंक्षमाप्यार्घ्योदकेनचुलकं
पात्रांतरेणादाय ॐ इतःपूर्वंप्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा
वाचाकर्मणापद्भ्यामुदरेणशिश्नायत्स्मृतंयदुक्तंयत्कृतंतन्मद्गुरुदेवसमर्पितमस्तुस्वाहा
मामदीयंचसकलंश्रीमहात्रिपुरसुंदर्यैसमर्पये ॐ ऐं क्लीं सौः ॐ नमः कामेश्वरि इच्छा
कामफलप्रदेसर्ववशंकरिसर्वजगत्क्षोभकरिहूं हूं ह्रां ह्रीं क्लीं ब्लूं सः सौः क्लीं ऐं कामेश्वरीसम
यदेवताश्रीपादुकांपूजयामितर्पयामिनमः ॐ तत्सत् इत्यनेनश्रीदेव्याश्चरणारविंदयोःग्र
हीतोदकदानेनात्मानंसमर्प्य पूर्वोक्तमूलसमयविद्ययाकेवलमूलेनमूलदेवींसमधासपू
ज्य कृतांजलिः यद्दत्तंभक्तिमात्रेणपुष्पंपत्रंफलंजलं निवेदितंचनैवेद्यंतद्गृहाणानुकंपया
आवाहनंनजानामिनैवजानामिपूजनं पूजाभागंनजानामित्वंगतिःपरमेश्वरि कर्मणामन

सा वाचा नास्ति वान्या गतिर्मम अंतश्चारेण भूतानां रक्ता त्वं परमेश्वरि मातर्योनिसहस्रेषु ये
षु येषु व्रजाम्यहं तेषु तेषु च्युता भक्तिरच्युतेस्तु सदा त्वयि देवी दात्री च भोक्त्री च देवी सर्वमि
दं जगत् देवी जयति सर्वत्र या देवी सोहमेव हि यदक्षरपरिभ्रष्टं मात्राहीनं च यद्भवेत् तत्क्षम
स्व देवेशि कस्य न स्खलितं मनः क्षमस्व देवदेवेशि त्रिपुरे परमेश्वरि तव पादाम्बुजे नित्यं नि
श्चला भक्तिरस्तु मे इति क्षमाप्य सर्वयोनिमुद्रया प्रणम्य शंखमुद्धृत्य श्रीदेव्युपरि भ्राम
यित्वा साधु वासाधु वा कर्म यद्यदाचरितं मया तत्सर्वं कृपया देवि गृहाणाराधनं मम इति
श्रीदेव्या दक्षहस्ते शंखजलं किंचिद्दत्वा शंखं स्वस्थाने स्थापयेत् तज्जलं किंचिद्वामहस्ते
निधाय मूलेन सप्तधाभिमंत्र्य स्वात्मानं तेनाभ्युक्ष्य अन्यान् विसामयिकान् प्रोक्ष्य पुष्पांज
लिमादाय रश्मिरूपा महादेव्या अत्र पूजितदेवताः श्रीदेव्यंगलीनास्ताः संतु सर्वशुभाव
हाः इति पुष्पांजलिं निक्षिप्य परिवारगणान् गणेशाद्यानंगदेवताद्वारदेवतासहितान् देव्या
देहे विलीनान् विभाव्य कामकलारूपं स्वात्मानं ध्यात्वा श्रीदेव्याभूषणरूपमायुधं तत्सर्वं निज
देहे विचिंत्य श्रीदेवीरूपमात्मानं ध्यायन् खेचरीमुद्रां बद्ध्वा तद्बीजेन देवीं प्रणम्य ॐ मूलं भग

श्री
१००

वतिश्रीमहात्रिपुरसुंदरिक्षमस्व इतितालत्रयदानेन श्रीदेवींप्रबोध्य तेजोमयींविचिंत्य गच्छग
च्छपरंस्थानंस्वस्थानंपरमेश्वरि यत्रब्रह्मादयोदेवानविदुःपरमंपदं इतितेजोरूपांतांसंहारमु
द्रयानिर्माल्य पुष्पेणतत्तेजःसमुद्धृत्याघ्राय पूरकयोगेनसहस्रदलकमलेप्रापय्य तत्रक्षणंते
जोरूपांध्यात्वा सुषुम्णामार्गेण ऐंहृदयायनमः इतिहृदयकमलमानीय तत्रयथोक्तरूपां
ध्यायन् तिष्ठतिष्ठपरेस्थानेस्वस्थानेपरमेश्वरि यत्रब्रह्मादयःसर्वेसुरास्तिष्ठंतिमेहृदि इतिहृ
दयकमलेसंस्थाप्य तत्रयथोक्तसिंहासनमध्यगतश्रीचक्रमध्यगतांसपरिवारांपरदेवतांमूला
धारेसंस्थाप्य ऐशान्यांजलेनत्रिकोणवृत्तचतुरस्रमंडलेनिर्माय तन्मध्येशेषिकाख्यांनिर्मा
ल्यवासिनींतन्मंत्रेण षडंगन्यासेनसकलीकृत्य मातंगीनवयावकांद्रचरणांप्रोल्लासितकुसुमां
कुशांकीं वीणोल्लासिकरांसमुन्नतकुचांमुक्ताप्रवालावलीं रुद्धांगींसितशंखकुंडलधरांविंबाध
रांसुस्मितां माकर्णालकवेणिमञ्जनयनांध्यायेच्चकुचश्यामलां इतिजगन्मोहिनींनिर्माल्यवासि
नींध्यात्वा मूलदेव्यानिर्माल्येन तदुच्छिष्टभोजिनींतांसंपूज्य धूंऐंनमः उच्छिष्टचंडालिमातं
गिनिसर्ववशंकरिस्वाहा शेषिकाश्रीपादुकांपूजयामितर्पयामिनमः इतिनिर्माल्यपुष्पैःसंपूज्य

तन्निर्माल्योदकादिभिः पाद्यादिदीपांतानुपचर्य नैवेद्यस्य शतांशं सहस्रांशं वा तच्चरणोदकेन नि
र्माल्यमुच्छमादाय लेह्यचोष्यान्नपानादितांबूलं स्रग्विलेपनं निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवा
ज्ञया इति दत्त्वा तालत्रयपूर्वकं प्रणिपत्य तां विसर्जयेत् इति निर्माल्यवासिनीं संपूज्य तालत्रयं दत्त्वा
देवनाथ गुरुस्वामिन् देशिकस्वात्मनायक त्राहि त्राहि कृपासिंधो पूजां पूर्णतरां कुरु इति श्रीगुरुं
प्रणम्य प्रार्थ्य श्रीगुरुपात्रमामस्तकमुद्धृत्य शिरस्थाय श्रीगुरवे समर्प्य तत्पात्रं दक्षकरे निधा
य ॐ श्रीगुरुपादुकाविद्योते श्रीपादुकां पूजयामि तर्पयामि नमः इति त्रिः संतर्प्य शिरसि तत्पा
त्रं स्वस्थाने स्थापय ततः जले किंचित् पात्रांतरे निधाय ऐं प्रथमकूटे आत्मतत्त्वाय नमः क्लीं द्वि
तीये विद्यातत्त्वाय नमः सौः तृतीये शिवतत्त्वाय नमः ऐं क्लीं सौः समस्तमूले सर्वतत्त्वाय नमः इति
तत्रजले विन्यस्य तज्जलं पुनः पात्रांतरेणोद्धृत्य चुलकेनादाय त्रैलोक्यलिप्तं निक्षिप्य ॐ प्रकृतिबुद्ध्य
हंकारमनःश्रोत्रत्वक्चक्षुःजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्व
ग्निसलिलपृथिव्यात्मकम् षड्चतुर्विंशतितत्त्वसहितं ग्रं ह्रँ ऐं प्रथमकूटे आत्मतत्त्वात्मकस्थूलदे
हं शोधयामि स्वाहा ॐ मायाविद्याकलारागकालनियतिपुरुषात्मकम् षड्द्वादशमतत्त्वसहितं कं ॐ

श्री
१०१

क्लीं द्वितीयकूटं विद्यातत्त्वात्मकं सूक्ष्मदेहं शोधयामि स्वाहा ४ँ शिवशक्तिसदाशिवेश्वरशु
द्धविद्यात्मकपंचतत्त्वात्मकसहितं यं रं ४ सौः तृतीयं शिवतत्त्वात्मकं परदेहं शोधयामि स्वाहा
४ँ शिवशक्तिसदाशिवेत्यादिसलिलपृथिव्यात्मकशुद्धमिश्राशुद्धषट्त्रिंशतत्त्वसहितं अं आं
५ ऐं क्लीं सौः मूलं सर्वतत्त्वसहितं स्थूलसूक्ष्मपराख्यदेहरूपाभिमानं जीवात्मानं शोधयामि
स्वाहा इति कुलकवचतर्पणं स्वीकृत्य तत्पात्रं कराभ्यामादाय मूलं श्रीगुरुपादुकां चोच्चार्य प्र
काशाकाशहस्ताभ्यामवलंब्योन्मनीस्त्रुचं इति तज्जलमश्नीयात् ततः कराभ्यां मूर्धादिपादां
तं षट्त्रिंशत्तत्त्वात्मकतां भावयन् स्वदेहं स्पृशेत् ततः स्वसामयिकैः सह पात्रवंदनं कुर्या
त् तत्रादौ अलिपात्रमिदं तुभ्यं दीयते पिशितान्वितं अंगीकुरुष्व हे देवि विद्यां कीर्तिं च देहि
मे आयाहि वरदे देवि मंडलोपरि सत्वरं १ ज्ञां गृहाण देवेशि त्वत्कृपाभाजनस्य मे चिद्वृंदमं
डलीयोगात्सामरस्यस्वरूपदायात् गृहाणामृतपात्रं त्वं प्रथमं बिंदुवारुणीं १ वज्रेश्वरि वज्र
हस्ते द्वितीयं पात्रमुत्तमं द्वितीययान्वितं गृहाण भद्रे भद्रकरे परे २ अद्वितीये गृहाणेदं तृतीयं पा
त्रमीश्वरि तृतीययान्वितं साक्षात्सहजानंददायिकं ३ भगमालिनि वर्णानां स्वर्गापवर्गदा

यिनि भवानि भरितं पात्रं गृहाण देवि चतुर्थकं ४ वीरत्वभ्यं मया दत्तं पीत्वा शेषं कुलामृतं
तव शत्रून्हनिष्यामि सर्वाभीष्टं ददामि ते ५ अलिपात्रं मया दत्तं गृहाण साधकोत्तम तव श
त्रुविनाशार्थं सर्वसिद्धिप्रदायकं ६ अलिपात्रमिदं तत्वं दीयते वीरपुंगव स्वीकृत्य सच्चिदानंदं
भज स्वस्त्ययनं महत् अलिपात्रमिदं वीरत्वयानेदकलात्मकं स्वीकृत्य सच्चिदानंदं भज स्व
स्त्ययनं महत् वीरभद्रा भद्रवीरा तत्रागच्छत साधकाः अलंकर्त्तं वीरसभा सपर्या प्रतिगृह्य
तां वीरेभ्यः साधकेभ्योस्तु भैरवेभ्यो नमो नमः अनुग्रहेण भवतां पूजाफलमवाप्नुयात् तथा
पूर्णं तथा पात्रमानंदेश्वरपूजितं तर्पयामोऽद्य यतस्तृप्यंतां कोटिभैरवाः इति प्रार्थनमुद्घोक्
त्वा पठेत् श्रीभैरव उवाच अधुना देवि वक्ष्येहं पात्रवंदनमीश्वरि तत्काले यद्धरानंद पात्रं देवैश्च
वंदितं पूजायां पात्रमानंदभरितं परमेश्वरि गुरुणा दत्तमभ्यर्च्य प्रणमेच्छिरसा तदा श्रीम
द्भैरवघोरवरप्रविलसच्चेष्टामृतप्लावितं देवी श्रीश्वरयोगिनीगणमहासिद्धैः समाराधितं आनं
दार्णवकं महात्मकमिदं साक्षात्त्रिखंडामृतं वंदे श्रीप्रथमं करांबुजगतं पात्रं विशुद्धिप्रदं हस्ता
भ्यां पात्रं धृत्वा इदं ते पात्रसनविज्ञमिदं पिवः वाममेनाशात्कृत पूर्णं हवो मदिरस्यमधाय विश्वा

श्री
१०२

यययदभिहर्यंतिदेवाः इदंताःपात्रसंभृतमहंतापरमामृतं पराहंतामयेवह्नौजुहोमिशिवरू
पिणि इदंपवित्रममृतंपिबामिभवभीषजं पशुपाशसमुच्छेदकारणंभैरवोदितं चिन्नेस्वातंत्र्य
सारत्वात्तस्यानंदमयत्वतः तन्मयत्वाच्चभावानांभावार्चांतर्दितारसे स्वस्वातंत्र्यविकासायस्व
रसःस्वेनपीयते तस्मादिमांस्वधारूपांशून्यगींहंतापिबाम्यहं ओं इंज्वलतिज्योतिरहमस्मिज्यो
तिर्ज्वलतिब्रह्माहमस्मिअहमस्मिब्रह्माहमस्मियोहमस्मिब्रह्माहमस्मिसोहमस्मिब्रह्माहम
स्मिअहमेवाहंमांजुहोमिस्वाहा अपिच शंखत्रिशूलशरचापकरांत्रिनेत्रांतिग्मेतरांशुकल
याविकसत्किरीटां सिंहासनामसुरसिद्धनुतांचदुर्गांहवींनिभांदुरितदुःखहरींनमामि उद्यद्दि
नेशायुतसन्निभाभांशाशांककलेखामुकटांचतुर्भुजां रक्तांबरामग्निरवींदुलोचनांतांशैलपुत्रीं
वरदांस्मराम्यहं ततः ओं १६ मूलं प्रकृतिमनोबुद्ध्यहंकारेतिचतुर्विंशतितत्त्वसहितंस्थूलदे
हमात्मतत्त्वंशोधयामिस्वाहा इतिमंत्रानपठित्वा कुंडलिनीमिष्टदेवतास्वरूपमाजिह्वांते वि
भाव्य मूलमुच्चरेत् श्रीगुरुपादुकांचस्मृत्वा शिवोहमितिभावयन् हस्ताभ्यांपात्रंधृत्वा
जुहोमीतिगुरुशक्तिसाधकेभ्यःआज्ञांगृहणीयात् तेचजुषस्वपरमामृतमितिब्रूयुः आ

त्मतत्त्वंशोधयामिस्वाहा इतिकुलकुंडलिनीमुखेजुहुयात् १ हेमंसिंधुरसावहंदयितयादत्तं
चषेयादिभिः किंचिच्चंचलरक्तपंकजदृशासानंदमालोकितं वामेस्वांडविमुद्रमुद्रितशकलेपा
णौनिधायकेवंदेपात्रमहंद्वितीयमधुनानंदैकसंवर्धनं विद्यातत्त्वंशोधयामिस्वाहा द्वितीयेत्रि
पुरापात्रेशिवोहमितिचिंतयेत् दग्धासर्वाणिपापानिरुद्ररूपःप्रजायते कमलासिवराभयायु
धांशशिवक्रांशशिशेखरांशिवो अरुणाभरणोत्रिलोचनोहृदयेतोभजब्रह्मचारिणीं मनोज्ञा
तिःज्वषतोश्राज्येविच्छिन्नेयत्तेसमिन्धयात यासुष्टाउषसोनिम्नोजग्धतासांहविषादयामिहुते
नस्वाहा कं शं मायाकलाविद्यारागेत्यादिमुद्रामुद्रसमतत्त्वसहितंस्वात्मदेहंविद्यास्वरूपगुरु
तत्त्वसहितंशोधयामिस्वाहा स्वात्ममूलत्रिकोणस्थेसूर्यकोटिसमप्रभे कुंडल्याकृतिचिद्रूपे
कुलेद्रव्यंसमत्रकं इदंतापात्रसंभूतमितिउच्चार्यपूर्ववत्सर्वं २ सर्वाम्नायकलाकलापकलितंकौ
तूहलोद्योतनं चंडोपेंद्रमहेंद्रपद्मभुवरुणब्रह्मादिभिःसेवितं ध्यातंदेवगणैःपरेशमुनिवरैःमोक्षा
र्थिभिःसर्वदा वंदेपात्रमहंतृतीयमधुनास्वात्मावबोधक्षमं शिवतत्त्वंशोधयामिस्वाहा तृतीये
भैरवीपात्रेवीरवेशोमहाहविः दुष्करःप्रलयेयांतिरत्नांकुर्वंतिदेवताः बालांशशांकयुतभूर्णव

श्री
१०३
103

क्रांत्रिलोचनांस्मेरमुखींप्रसन्नां पंचाब्जपाशामृतकुंभहस्तां तांचेदहृद्यैःहृदये स्मरामः आधा
यस्वसमेतत्वेविमृतःसोमहृस्ये भवावाजस्यसंगाद्ये यं ॰ शिवशक्तिसदाशिवेतिशुद्धविद्यापं
चतत्वसहितंशिवतत्वात्मकंपरंकारणदेहंशिवशक्तितत्वेशोधयामिस्वाहा इदंतापात्रसंभृतंपू
र्ववत् ३ मद्यमीनरसाबहेहरिहरब्रह्मादिभिःसेवितं मुद्रामैथुनधर्मकर्मनिरतंत्वाराज्ञतिक्ता
प्रियं आचार्याष्टकसिद्धभैरवकलाधीशेनसंशोधितं पायात्पंचमकारतत्वसहितंपात्रंचतुर्थो
त्तमः चतुर्थंसोमपात्रेतुचंद्रसूर्यौविचिंतयेत् समुद्राः शोषिताः सर्वेसर्वंतिष्ठतिकेवलं
कृष्णांङ्गीशशिशेखरांत्रिनयनांशुंडंकृपाणंवरं बिभ्राणामभयंकरैश्चस्वदंतीनीलांबुदाभांभजे
कांचीप्रेतकरैश्चरक्तवसनामुन्मुक्तकेशावलिं शत्रूणांनिचयेनिहंतिभजतांध्यातैवयास्वोष्मणा
यं ॰ शिवशक्तिसदाशिवेतिशुद्धविद्यात्मकपंचतत्वसहितंभैरवतत्वेनकारणदेहंशोधयामि
स्वाहा इदंतापात्रसंभृतमितिपूर्ववत् ४ आधारेभुजगाधिराजवलयेपात्रंमहीमंडले द्वीपेसप्त
समुद्रवारिपिशितंचाष्टौचदिग्दंतिनः सोहंभैरवमर्चयन्प्रतिदिनंताराग्रणैरक्ततेरादित्यमु
खैःस्वरास्वरगणैराज्ञाकरैःकिंकरैः धर्माधर्मकलास्वधारसयुतंवेदैःश्रवैःसंस्तुतं हृतीया

गकुलाष्टसंभ्रमतरंगमेरहस्यास्तुतं आनंदोद्भवनादबिंदुकलयायोगस्थलंसद्भैरवैः पीतंब्रह्मरसंम
होदयकरंपात्रंभजेपंचमं गणेशंपंचमेपात्रेसिद्धिबुद्धिप्रदायकं गंधपुष्पार्चितंकृत्वागंगयाक्षालि
तनिर्मले सिताब्जकोटिस्फुरदास्यशोभांत्रिलोचनांकुंकुमपीतवस्त्रां सिंहासनोनागमुखोदितु
ण्डांभजेहृदिस्कंधयुतांभवानीं अतिविमलसुवस्त्रांरौप्यपात्रस्थमंत्रे स्खलितदधिखंडेपाणि
नादक्षिणेन कलशममृतपूर्णंवामहस्तेदधाना तरुणतरुणिभासामन्नपूर्णांनमामि इदंतापा
त्रसंभूतमिति ५ सच्छत्रामलभद्रपीठपरमानंदोदयादायकं रम्यंराज्यकरंसदासुखकरंसाम्रा
ज्यसाम्राज्यदं नानाव्याधिभयापकारहरणेजन्मांतरध्वंसनेश्रीमद्भैरवभैरवीप्रियतरंपात्रंचषष्ठंभ
मः षष्ठेचैवाग्निपात्रेस्याद्मूलमंत्राभिमंत्रिते भस्मीकरोतिशत्रूणांपुत्रपौत्राभिवर्धने सहस्रक
रदीप्तांगीत्र्यक्षारक्तांबरोज्वला चतुर्भुजांशिवगतांनौमिकात्यायिनींशिवां मनस्तत्त्वशोधया
मिस्वाहा यादेवीशिवकेशिकादिजननीयावैजगद्रूपिणी याब्रह्मादिपिपीलकांतजनतानं
दैकसंधायिनी यापंचप्रणमत्सुरेश्वरशिरःपीठेषुसंस्थासदा सापात्यात्परमेश्वरीभगवती
श्रीराजराजेश्वरी इदंतापात्रसंभूतमितिपूर्ववत् ६ जाग्रत्स्वप्नसुषुप्तितुर्यपरतश्चैतन्यसाक्षि

श्री प्रदं विद्युद्भास्करचंद्रजित्स्वधनंधांज्योतिष्कलाव्यापितं येडापिंगलमध्यगात्रिवलयातस्याः
१०४ प्रबोधोद्धृतं पात्रेसप्तमसुरगणेनतरुणानंदप्रदंपातुमां बुद्धितत्त्वंशोधयामिस्वाहा सप्तमेसा
104
गराः सप्तसप्तद्वीपावसुंधरा सप्तव्याहृतयः सप्तसप्तैसप्तापिसप्तयः नवांबुदाभोरविचंद्रवह्नि
नेत्रोगदांभोजकरोहसंती पीतांबरोभुजगकंचोज्ज्वलांगी श्रीकालरात्रीहृदयेस्मरामः अरुण
किरणभासेरत्नकेयूरहार स्फुरितस्तनभवयष्टिं पात्रदर्वीकराब्जा मणिमुकुटमरीचिस्फीतबा
लांत्रिनेत्रा मधुरमधुपिवंतीमत्तघूर्णांनमामि इदंतापात्रसंभूतमिति मूलतत्त्वंशोधयामिस्वा
हा ७ खड्गंश्रीगुरुपादुकांचतिलकंकंठेपिसारस्वतं शास्त्रोवाग्बलशौर्यबुद्धिहरणंदेहस्थि
तेःकारणं वांछासिद्धिकरेमनःस्थितिकरंवश्यजगद्योषितां पात्रेचाष्टमसष्टसिद्धिकरणंप्रो
छप्रसन्नंभजे अहंकारतत्त्वंशोधयामिस्वाहा धैर्यौदार्यविचारहर्षजननेसंमोहनेयोषितां स
र्वापद्विनिवारणंविमलधीसंदीपनेवाक्प्रदं चेतःस्थैर्यकरेमनोभिलषितावाप्तेर्निमित्तंमहत्
पात्रेचाष्टमसष्टसिद्धिफलदंवंदेप्रतापालयं अष्टमेसिद्धयःचाष्टौवसवोष्टौवसुप्रदाः दिक्पा
लाःदिग्गजाश्चाष्टौभवेदैश्वर्यमुत्तमं उद्यदर्कसमानाभांसितांशुभ्रकुटांशिवां चतुर्भुजांत्रिनय

नां महागौरीं भजाम्यहं इदं तात्पात्रसंभृतमिति आईं ज्वलति पूर्ववत् पठन् ८ सर्वानंदकरं स
दाशिवपदं सर्वार्थसंपत्प्रदं साम्राज्यार्थकरं समस्तसुखदं चाज्ञानविध्वंसनं आयुःकीर्तिय
शोविवर्धनकरं संसारमोहच्छिदं पात्रं लक्षगुणात्मकं च नवमं प्रोढप्रतापं भजे शक्तितत्त्वे शो
धयामि स्वाहा नवमे सा महासिद्धिः दुर्गादेवी प्रकीर्तिता ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशि
वः पूज्यतां सेव्यतां चात्र ते समं साधकोत्तमैः नवसिद्धिप्रजायेत कौलिको मुक्तिभाग्भवेत् शा
शंकविंबद्युतिशुभ्रलाञ्छी शतमचामीकरगात्रयष्टिं सितांबरं प्रेतगतां त्रिनेत्रां श्रीसिद्धिदात्रीं
द्विभुजां भजेहं समस्तमूलमन्त्राय इदं तात्पात्रसंभृतमिति आईं ज्वलति पूर्ववत् ९ ब्रह्मविष्णु
महेशानां देवानां च विशेषतः दुर्लभं पावनं पात्रं दशमं प्रणमाम्यहं १० अरिशंखकृपाणखेट
बाणान् सुधनुश्शूलकतर्जनीर्दधाना भवतां महिषोत्तमांगसंस्था नवदूर्वासदृशी श्रिये स्तु
दुर्गा भैरवतत्त्वे शोधयामि स्वाहा १० पापघ्नं शान्तिशुभदं दिव्यं स्वादु सुखोलयं पात्रमेकाद
शं वंदे गुरुसेवासुखागतं सिंहस्था शशिशेखरा मरकतप्रख्याचतुर्भिर्भुजैः शंखं चक्रध
नुश्शरांश्च दधती नेत्रैस्त्रिभिः शोभिता आमुक्तांगदहारकंकणरणत्कांचीक्वणन्नूपुरा दुर्गा

दुर्गतिहारिणीभवतमेरत्नोल्लसत्कुंडला अथारूढांमृगेंद्रंसलिलजटधरश्यामलांहस्तप
श्री
१०५ द्मैः शूलंबाणंकृपाणंस्त्वरिजलजगदाचापपाशान्वहंतीं चंद्रोत्तंसांत्रिनेत्रांचतसृभिरसिना
खेटकेबिभ्रतीभिः कन्याभिःसेव्यमानांप्रतिभटभयदांशूलिनींभावयामि कालाभ्राभांकटा
क्षैररिकुलभयदांमौलिबद्धेन्दुरेखां शंखंचक्रंकृपाणंत्रिशिखमपिकरैरुद्वहंतींत्रिनेत्रां सिं
हास्कंधाधिरूढांत्रिभुवनमखिलंतेजसापूरयंतीं ध्यात्वादुर्गांजयाख्यांत्रिदशपरिवृतांसेवि
तांसिद्धिकामैः दूर्वानिभांत्रिनयनांविलसत्किरीटांपंखाब्जखड्गशरखेटकशूलचा
पान् संतर्जनींचदधतींमहिषासनस्थांदुर्गांनवार्णकुलपीठगतांभजेहं ॥ अथपात्रप्रशं
सा पात्रेकृत्वाकरेमंत्रीसर्वकर्मलभेत्सखी इहलोकेप्रियेभुक्त्वादेहांतेभैरवोभवेत् पूर्णंय
द्वैतकलातिगंपरकलाव्याप्तंतथासंभृतं पूर्णानंदनिधानमेतुजभवोपेंद्रस्वरेंद्रादिभिः देवे
शैःसमुपासितंमुनिवरैःपूज्यंनरेंद्रैःनुतं प्रोष्ठोल्लासकरंकराब्जनिहितंपात्रंनमोद्वादशे सु
द्धातत्वंशोधयामिस्वाहा १२ सत्वेतांतरतत्वसाररसदंस्वातंत्र्यलीलाहृतं त्रैरूप्यंत्रिदशा
श्रितंत्रिभुवनेस्तत्त्वसंचितत्वात्मकं तुर्योल्लासलसत्रयोदशविधिंआर्णोदरंत्र्यक्षरं तेजःस्तोमि

परंत्रयोदशमिदंपात्रंजगत्तर्पणं मंत्रतत्त्वंशोधयामिस्वाहा १३ चातुर्वर्ण्यसमसिद्धसाधनप
रंवेदैश्चतुर्भिःस्वरैः संगीतंचतुराननेनविमलैःवक्त्रैर्विभूतिप्रदं मीमांसादिचतुर्दशात्मक
महाविद्यानिधिंसन्मयं चित्पीयूषधरंचतुर्दशमिदंपात्रंप्रपद्येपरं श्रीचक्रतत्त्वंशोधयामिस्वा
हा १४ पूर्णांपंचकलात्मपंचदशभिःकामेश्वरीपूर्विका चिद्रूपाभिरभीष्टदाभिरभितोनि
त्याभिरास्वादितं नित्यंपंचदशीकलामृतधरंप्रोच्चापवर्गाःप्रदं पात्रंपंचदशंप्रमोदकरणंवंदे
प्रसन्नात्मकं श्रीदेवीतत्त्वंशोधयामिस्वाहा १५ चित्तेचिन्मयताप्रयाकरमिदंचेचत्करोंभो
जगं जाग्रद्दोषसुधाकरंजनिजरामृत्याघवस्थाहरं श्रीमच्छ्वेतकिरीटषोडशकलासिक्तं
महाषोडशी श्रीविद्यासमुपासकेष्टममलंपात्रंभजेषोडशं कुलकौलतत्त्वंशोधयामिस्वाहा
१६ सच्चिद्रूपममेययापरमयादेव्यामयासंश्रितं याव्योतात्मनिरामयापरकलापूर्णापिस
प्तादशी कृत्याकृत्यस्वतोस्वतोतिगदशंधामात्मकंप्रोद्भटं प्रोच्चांतोल्लसनेनमामिपरमं
पात्रंचसप्तादशं श्रीमूलतत्त्वंशोधयामिस्वाहा १७ गुरुदैवतमंत्रात्मचक्राणामैक्यकार
णं कारणामृतसंपूर्णंपात्रमष्टादशंभजे पंचतत्त्वंशोधयामिस्वाहा १८ ब्रह्मादिदेवता

श्री
१०६

106

सिद्धमुनिभूदेववंदितं आह्लादपात्रमेकोनविंशं वंदे महाद्भुतं दशेंद्रियतत्त्वं शोधयामि स्वाहा
१९ श्रीनाथदत्तं भवपाशमुक्तौ प्रोद्धारकं भक्तजनस्य सम्यक् विंशोकमेतत्परमे प्रशस्तं पात्रं
प्रशंसामि परेशरूपं पंचतन्मात्रतत्त्वं शोधयामि स्वाहा २० वर्यैर्वीरवरैस्सुसाधकतमैः स
त्सिद्धये साधितं त्वेकं सर्वगतं सदासमरसं ध्येयं महायोगिभिः बाह्याभ्यंतरवैरिवर्गदलनं
श्रीमेत्रवीर्याश्रयं पात्रं पाणियुगेन संधृतमिदं नौम्येकविंशं शिवं अंतःकरणतत्त्वं शोधया
मि स्वाहा २१ श्रीकौलार्णवमहिविकशिववरिप्रोद्गाहनोन्मुद्रितं द्वाविंशात्तरविद्ययावि
लसितं विद्यादिदेवार्थितं साम्नायोत्तरसारसंमदभरं तं श्रीकालिकाकल्पदं सत्पात्रं समुपा
स्महे स्मरतधरं द्वाविंशमेश्वर्यदं मातृकातत्त्वं शोधयामि स्वाहा २२ त्रिसंध्यासु देवैस्त्रिभिः से
वितं तत्त्रिलोकीप्रशस्यं त्रयीसारमिष्टं त्रिशक्तिप्रभावं तुरीयप्रबोधं त्रयोविंशमीडे प्रमोदा
ढ्यपात्रं आम्नायतत्त्वं शोधयामि स्वाहा २३ प्रकृत्यादितत्त्वात्मकं कौलिकेष्टं मुदा सत्त्वदा
भासकं भास्वरूपं सदासं स्वयोगेयं चतुर्वर्णसाध्यं चतुर्विंशकं स्तौमि पात्रं मनोज्ञं प्रकृतित
त्त्वं शोधयामि स्वाहा २४ भूव्योमादिकतत्त्वपंचकवियोसर्गादिकृत्संमतं तत्पंचीकृति

पंचकञ्चुकपरमंस्तत्वाश्रितंमोहदं मात्राद्वादशभेदकं सुनिमतं यस्योन्मनोल्लासकं वंदे पात्र
कमुन्मनाम्रतरसं तत्पेच विंशाद्वयं पुरुषतत्त्वं शोधयामि स्वाहा २५ ब्राह्मीमंदिरमिंदिरा प्र
द्मिदं पद्मालयेनाश्रितं पद्मानाथनुतं गणाधिपनुतं गौरीगिरीशात्मकं प्राप्तं सद्गुरुशासनेन
शमितक्लेशं जगत्पावनं षड्विंशं धिषणाप्रसादकरणं सेवे महापात्रकं नियतितत्त्वं शोध
यामि स्वाहा २६ सप्तांभोधिप्रसूतो यः स्वधौ यः सप्तर्षीणां सममोल्लासरूपः तेनापूर्णं स
न्नसन्नेस्रुसारात्पात्रे सेवे समविंशं प्रसिद्धं देवैर्दैत्यैरब्धिमथ्याद्विकृष्टं पात्रे त्वष्टाविंशसी
डेगरिष्ठे कालतत्त्वं शोधयामि स्वाहा २७ कारणं सत्क्रियासिद्धौ प्रपन्नार्तिनिवारणं
स्वधानेदमयं पात्रमेकोनत्रिंशकं मुहुः कलातत्त्वं शोधयामि स्वाहा २८ विविधविधिना
विद्यातत्त्वप्रसाधनसाधनं सकलकमलशतुद्वाधेप्रभाकरभास्वरं वरदविभुधाभेदो
पासानिमित्तमभीप्सितं सदमृतभृतं पात्रे त्रिंशं भृशं समुपास्महे मायातत्त्वं शोधयामि
स्वाहा ३० सम्यक्शंभवशासनार्णवसरत्पीयूषहर्षोदयं स्वांतेंदीवरसोममाणवम
लप्रांतं सनेकारणं मंत्रेशाभिमतं सुमंगलकरं माहेश्वरैरर्चितं विद्येशप्रणतं प्रणौमि

श्री
१०७

चषकं चैकाधिकत्रिंशकं ब्रह्मतत्त्वं शोधयामि स्वाहा ३१ वेदाद्यर्चितविद्ययापरिचितं चिं
तागरोद्गारकं गंधाढ्यं गणपालरुद्रजिततत्त्वं संघं मानवार्पं सितं संवंद्यं वटुकेन वासवमुखैराशा
पिपैर्वांछितं वंदे पात्रमभेदसिद्धिसदनं द्वात्रिंशमीशात्मकं विष्णुतत्त्वं शोधयामि स्वाहा ३२
त्रैलोक्ये त्रिदशातिगं त्रिकशिवैकत्वाश्रितत्वाश्रयं यच्छ्रेयात्रिपुरांतरीयविषयास्पृष्टं तयासंत
तं अत्यच्छेवकतत्त्वनिष्ठमतुलं तापत्रयोद्धारकं त्रिस्त्रिंशत्रिदशीश्रितं परिभजे पात्रं त्रयस्त्रिं
शकं रुद्रतत्त्वं शोधयामि स्वाहा ३३ वंदे ष्टात्मसदाशिवेष्टमनघं स्वच्छादिदेवार्थितं संज
ष्टसकलामरीवरगणैः स्वांतोत्थचेष्टानलं साक्षात्सारनिजेष्टशार्वविभवव्याभासकं स्वेष्टदं
श्रेष्ठपात्रमनिष्टनाशकमहं सेवे चतुस्त्रिंशकं ईश्वरतत्त्वं शोधयामि स्वाहा ३४ सदाशिवस
दाशिवेश्वरहरात्मभूकेशवैः सशक्तिभिरुपासितं बहललालसोपार्जितं परामृतशिवो
ल्वणं परशिवास्वयाचर्चितं परं चषकमर्चयाम्यधिकपंचकत्रिंशकं सदाशिवतत्त्वं शोध
यामि स्वाहा ३५ धर्माधर्मशुभाशुभात्मकविषाभोक्तृप्रभोगं पंथने दीप्तिभूतमलौघधूमविष
देस्वानंदशुद्धोज्ज्वले स्फूर्जच्छक्तिशिखास्पदे परशिवात्माग्नौ जुहोम्युन्मने षट्त्रिंशंप

त्रिपूर्णपात्रमचलाग्रांते शिवाद्ये शिवे शिवशक्तितत्त्वं शोधयामि स्वाहा ३९ ततः अंत
र्निरंतरनिरिंधनमेधमाने मायांधकारपरिपंथिनि संविदग्नौ कस्मिंश्चिदद्भुतमरीचिविका
सभूमौ विश्वं जुहोमि वसुधादिशिवावसानं अन्तरपरशिवतत्त्वं शोधयामि स्वाहा इत्यु
क्तं ते महेशानि पात्राणां वंदनं परं षट्त्रिंशत्तत्त्वसंख्यानां साधनं भोगमोक्षयोः वीराणां सा
धकानां च शीघ्रं सिद्धिकरं कलौ देयं शिष्याय भक्ताय नाभक्ताय कदाचन इत्येष पटलो गु
प्तः सर्वतंत्रेषु सङ्गतः अभक्तेभ्योऽपि पुत्रेभ्यो न प्रकाश्यं कदाचन इति श्रीरुद्रयामले तंत्रे
पात्रवंदनपटलः पात्रं कृत्वा करे मंत्री सर्वकर्म लभेत् सुखी इहलोके श्रियं भुक्त्वा देहांते भै
रवो भवेत् करे पात्रं सुवेस्तोत्रमानंदो हृदयांबुजे भक्तिर्गुरुपदांभोजे स्मरणं किमतः प
रं एकेन शुष्कवटुकेन घटं पिबामि वापीं पिबामि सह हंसालवणाई केन आस्वाद्य मांसम
ल्लिरोहितम्भेडरखंडेङ्गं गोपिबामि घमुना सह सागरेण करेमालां सुखेहालावामेरामा स्व
कोमला हृदये त्रिपुरा बाला यागशाला गृहे गृहे पात्रं भैरव पात्रं गोत्रं श्रीनाथपादुका
गोत्रं शास्त्रं संविच्छास्त्रं ज्ञानं तत्त्वावबोधकं ज्ञानं अलिपिशितपुरंध्रीभोगपूजापरोहं

श्री
१०८
108

बहुविधकुलमार्गारंभसंभावितोऽहं पशुजनविमुखोऽहं भैरवीमाश्रितोऽहं गुरुचरणरतोऽहं भैर
वोऽहं शिवोऽहं वामे रामा रमणकुशला दक्षिणे चालिपात्रं मध्ये मुद्राश्चणकवटुकाः सूकरस्योष्ण
शुद्धिः स्कंधे वीणा सरसकविता सत्कथा सद्गुरूणां कौलो मार्गः परमगहनो योगिनामप्यगा
म्यः वामे चेन्दुमुखी मुखे च मदिरा पात्रं करांभोरुहे मूर्ध्नि श्रीगुरुचिंतनं भगवतीध्यानास्पदं मान
से जिह्वायां जपसाधनं परिणतिः कौलक्रमाध्यासने ये संतो नियतं पिबंति सुरसं ते भुक्तिमुक्ती
गताः पीत्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले उत्थाय च पुनः पीत्वा भूयो जन्म न विद्यते
धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं प्रकाशा
काशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माधर्मकलास्नेहपूर्णां वह्नौ जुहोम्यहं यावन्न चलते
दृष्टिर्यावन्न चलते मनः तावत्पानं प्रकर्तव्यं पशुपानमतः परं इत्थं पात्रपूजा समाप्ता ततः
स्वसामयिकान्यथाशास्त्रं श्रीगुरूपदिष्टविधिना संपूज्य संतर्प्य पूर्वस्थापितबलिपात्रस्थ
मन्नादिकमेकस्मिन्पात्रे कृत्वा तद्गृहादुत्थाय सोदकपात्रहस्तः सन्बहिर्गत्वा जलेन शु
चौ देशे चतुरस्रवृत्तत्रिकोणात्मकं मंडलं कृत्वा तत्र गदादिडमरुपात्रहस्तं त्रिलोचनं कृत्वा

भंभैरवंध्यायेत्सर्वविघ्नविनाशनं इतिउच्छिष्टभैरवंध्यात्वा गंधादिनासंपूज्य ॐउच्छिष्टभैर
वएह्येहिबलिंगृह्ण२ ह्रूंफट्स्वाहा इतिपात्रस्थंबलिद्रव्यंतत्रमंडलेविसृज्य तत्पात्रंहस्तोपा
दौप्रक्षाल्याचम्य तत्पात्रंप्रक्षाल्यजलेनापूर्य पूजागृहद्वारंगत्वा उदयोस्तत्त्ववन्नुतःप्रविश्य
स्वासनेसमुपविश्य तत्पात्रस्थजलेविशेषार्घ्यजलबिंदुंदत्वा तेनजलेनस्वात्मानमभिषिं
चन्स्नातिस्तोत्रंपठेत श्रीगुरवेशिवायनमः नश्यंतुप्रेतकूष्मांडानश्यंतुदूषकानराः
साधकानांशिवाःसंतुत्वाम्नायपरिपालिनां जयंतुमातरःसर्वाजयंतुयोगिनीगणाः जयं
तुसिद्धडाकिन्योजयंतुगुरुपंक्तयः नंदंतुत्वणिमासिद्धानंदंतुभैरवादयः नंदंतुदेवताःस
र्वाःसिद्धविद्याधरादयः येचाम्नायविशुद्धाश्चमंत्रिणःशुद्धबुद्धयः सर्वदानंदहृदयानंदंतुम
मभक्तितः नंदंतुज्ञाणिगृहस्थायोगाःकरणाश्चतथापरे सर्वेतेसुखिनोयांतुमासाश्चतिथयस्तथा
त्रयंतुपितरःसर्वेक्रूरतवोवत्सरादयः भूचराःखेचराश्चैवतृप्यंतुममभक्तितः अंतरिक्षचराये
चयेचान्येदेवयोनयः सर्वेतेसुखिनोयांतुसर्वानयाश्चपक्षिणः पशवस्तरवश्चैवपर्वताःकं
दराग्रहाः ऋषयोब्राह्मणाःसर्वेशांतिंकुर्वंतुमेसदा तीर्थानिपशवोगावोयेचान्येपुण्यभूमयः

श्री
१०९
109

हृष्टाःपतिव्रतानार्यःशिवंकुर्वंतुमेसदा शिवंसर्वत्रमेचास्तुपुत्रदारधनादिषु राजानःस्तुवि
नःसंतुतेममार्गोस्तुमेसदा शुभामेदिवसायांतुमित्राश्लिष्टंतुमेशिवाः साधकाजयिनः
संतुशिवाश्लिष्टंतुपूजकाः संपूजकानांप्रतिपालकानांयतींद्रयोगींद्रतपोधनानां दे
शस्यराष्ट्रस्यकुलस्यनित्यंकरोतुशांतिंभगवान्कुलेशः येयेचापथियःस्वभूषणरताःस
न्निंदकाःपूजने देवाचारविसर्गनष्टहृदयादुष्टाश्चयेबाधकाः दृष्ट्वाचक्रमपूर्वजातहृदया
येकौलिकद्वेषिकास्तेतेयांतुविनाशमत्रसमयेश्रीभैरवस्याज्ञया द्वेष्टारःसाधकानांचसदै
वाम्नायदूषकाः डाकिनीनांमुखेयांतुसर्वास्ततत्पिशितैःस्तुताः शत्रवोनाशमायांतुम
मनिंदाकराश्चये द्वेष्टारःसाधकानांचविनश्यंतुशिवाज्ञया येनिंदकास्तेविलयंप्रयांतुये
साधकास्तेप्रभवंतुसिद्धाः सर्वत्रदेवीकरुणावलोकापुरःपरेश्रीममसन्निधत्तां इतिशां
तिस्तोत्रंपठित्वा अथान्यप्रकारेणशांतिस्तोत्रंलिख्यते श्रीभैरवउवाच देविवक्ष्यामि
पूजांतेशांतिस्तोत्रमनुत्तमं वीरायेनपरानंदपदेप्राप्यंत्वनामयं योगिनीचक्रमध्यस्थंमा
त्मंडलवेष्टितं नमामिशिरसानाथंभैरवंभैरवीप्रियं अनादिघोरसंसारव्याधिध्वंसैक

हेतवे नमः श्रीनाथवैद्याय कुलौषधप्रदायिने आपदो दुरितं रोगाः समयाचारलंघनात् ये
सर्वे त्वपोहन्तु दिव्यचक्रस्य मेलनात् आयुरारोग्यमैश्वर्यं कीर्तिर्लाभः सुखं जयः कांतिर्मनोरथा
श्चास्तु पांतु सर्वाश्च देवताः नेदं तु साधककुलान्वयदर्शिकाये स्वच्छाद्यनाद्यवचतुरुक्रमहान्व
याये नेदं तु सर्वकुलकौलरताः परे ये त्वन्ये विशेषपदभेदकशोंभवाये नेदं तु सिद्धगुरवः स्वगुरु
क्रमौघाज्येष्ठानुगाः समयिनो वटुकाः कुमार्यः षड्योगिनीप्रवरवीरकुलप्रसूता नेदं तु भूमिप
तिश्रो द्विजसाधुलोकाः नेदं तु नीतिनिपुणा निरवद्यनिष्ठा निर्मत्सरा निरुपमा निरुपद्रवाश्च
नित्या निरंजनरता गुरवो निरीहा क्षमाश्च शांतमनसो हतशोकशंकाः नेदं तु योगनिरताः कुल
योगयुक्ता आचार्यसामयिकसाधकपुत्रकाश्च गावो द्विजा युवतयो यतयः कुमार्यो धर्मे भवंतु निर
ता गुरुभक्तियुक्ताः नेदं तु साधककुला अणिमादिनिष्ठाः प्राणापते तु समयद्विषि योगिनीनां
साशंभवी स्फुरतु कापि समाद्यवस्था यस्यां गुरोश्चरणपंकजमेव लभ्यं याश्चक्रक्रमभूमिका
वसनयो नाडीषु याः संस्थिता याः कायद्रुमरोमकूपनिलया याः संस्थिता धातुषु उच्छ्वासो
र्मिमरुत्तरंगनिलया निःश्वासवासाश्च यास्ता देव्यो रिपुभक्षभक्षणपरास्तर्प्यन्तु कौलार्चिताः

श्री यादिव्यक्रमपालिकाः क्षितिगतायादेवतास्तोयगाः यानित्यंप्रथितप्रभाः शिखिगतायामात
११० रिश्वाश्रयाः याव्योमामृतमण्डलामृतमयायाः सर्वगाः सर्वदास्ताः सर्वाः कुलमार्गपालनपराः शान्तिं
110
प्रयच्छन्तु मे ऊर्ध्वब्रह्माण्डतोवादिविगगनतलेभूतलेनिष्कलेका पातालेवानलेवासलिलपवनयो
र्यत्रकुत्रस्थितावा क्षेत्रेपीठोपपीठादिषुचकृतपदाधूपदीपादिकेन प्रीतादेव्यःसदानःशुभबलि
विधिनापान्तुवीरेन्द्रवन्द्याः ब्रह्माश्रीशेशरुद्रागौगुहबटुकगणाभैरवाःक्षेत्रपाला वेतालादिरुक
द्रयक्षरक्षोमनुसिद्धाप्सरोगुह्यकाद्याः भूतागन्धर्वविद्याधरऋषिपितृयत्नामरादिप्रभृता योगी
गणश्चारणाःकिम्पुरुषमुनिवराश्चक्रगाःपान्तुसर्वे देहस्थाखिलदेवतागजमुखाःक्षेत्राधिपाभै
रवाः योगिन्योबटुकाश्चयक्षपितरोभूताःपिशाचाग्रहाः अन्येभूचरदिक्चराश्चखचरावेताल
काश्चेटकास्तृप्ताःस्युःकुलपुत्रकस्यपिबतःश्रीवीरसंतर्पणात् सत्यंचेद्गुरुवाक्यमेवपितृदेवा
प्रेशाषवद्योगिनी प्रीतश्चेत्परदेवताश्चयदिचेद्वेदाःप्रमाणंचचेत् शाक्तेयंयदिदर्शनंभवतिचेदा
ज्ञेयमेषास्तिचेत्संत्यत्रापिचकौलिकाश्चयदिचेत्स्यान्मेजयःसर्वदा १९ तृप्यन्तुमातरःसर्वाः स
मुद्राःसगणाधिपाः योगिन्यःक्षेत्रपालाश्चममदेहेव्यवस्थिताः शिवाद्यवनिपर्यन्तंब्रह्मादिस्तंभ

संयुतं कालाग्न्यादिशिवांतंचजगद्यत्तेनतत्पठेत् पठित्वेदंनमेद्धीरान्वीरवंदनमाचरेत् स्तवेद्धीरान्नमे

द्धीरान्मंत्रसिद्धिःप्रजायते इत्थंश्रांतिस्तोत्रंपठित्वा वीरवंदनस्तोत्रंपठित्वा ॐश्रीदेव्यैसिद्धिदायि

न्यैनमः जगत्त्रयाभ्यर्चितशासनेभ्यःपरार्थसंपादनकोविदेभ्यः समुद्धृतक्लेशमहोरगेभ्योनमोनमः

साधकनायकेभ्यः १ प्रहीनसर्वाश्रयवासनेभ्यःसर्वार्थतत्त्वोदितसाधनेभ्यः सर्वप्रजाभ्युद्धरणोद्यते

भ्योनमोनमःसाधकनायकेभ्यः निस्तीर्णसंसारमहार्णवेभ्यस्तृष्णालतोन्मूलनतत्परेभ्यः जरारु

जामृत्युनिवारकेभ्योनमोनमःसाधकनायकेभ्यः सद्धर्मरत्नाकरभाजनेभ्यो निर्वाणमार्गोत्तमदेशि

केभ्यः सर्वत्रसंपूर्णमनोरथेभ्योनमोनमःसाधकनायकेभ्यः लोकानुकंपाभ्युदिताद्रेभ्यःकारुण्य

मैत्रीपरिभावितेभ्यः सर्वार्थचर्यापरिपूरकेभ्योनमोनमःसाधकनायकेभ्यः विध्वस्तनिःशेषकुवास

नेभ्यो ज्ञानाग्निनादग्धमलेंधनेभ्यः प्रज्ञाप्रतिज्ञापरिपूरकेभ्योनमोनमःसाधकनायकेभ्यः सर्वार्थिता

शापरिपूरकेभ्यो वैनेयपद्माकरबोधकेभ्यः विस्तीर्णसर्वार्थगुणाकरेभ्योनमोनमःसाधकनायके

भ्यः अनंतकर्मार्जितशासनेभ्यो ब्रह्मेंद्ररुद्रादिनमस्कृतेभ्यः परस्परानुग्रहकारकेभ्योनमोनमः

साधकनायकेभ्यः विमग्नभूतादिमहाभयेभ्यो मपंचकाचारपरायणेभ्यः समस्तसौभाग्यकला

श्री
१११

करेभ्यो नमो नमः साधकनायकेभ्यः विमग्नदुष्कर्मजवासनेभ्यः समंततोज्जुष्टमहायशोभ्यः लम्पाम
लज्ञानकृतास्पदेभ्यो नमो नमः शांभविशांभवेभ्यः सर्वागमांभोधिमहास्रवेभ्यः श्रीचक्रपूजार्थपरायणे
भ्यः श्रीवीरचर्याचरणक्षमेभ्यो नमो नमः शांभविशांभवेभ्यः श्रीमंत्रकोटिद्युतिभूषणेभ्यो ह्राविशद्ध
ह्यासदशातिगेभ्यः अद्वैततत्त्वामृतभाजनेभ्यः नमो नमः शांभविशांभवेभ्यः षट्त्रिंशतालक्षणभू
षितेभ्यः प्रोत्फुल्लपद्माकरलोचनेभ्यः प्रतप्तचामीकरविग्रहेभ्यः नमो नमः शांभविशांभवेभ्यः संबोध
संभारसुसंस्थितेभ्यः संसारनिर्वाणनिदर्शनेभ्यः महाकृपावेष्टितमानसेभ्यो नमो नमः शांभविशांभ
वेभ्यः परैकविज्ञानरसाकुलेभ्यो वामाश्रिताचारभयानकेभ्यः स्वातंत्र्यविध्वस्तजगत्तमोभ्यो नमो
नमः शांभविशांभवेभ्यः श्मशानचर्याप्तमहाफलेभ्यो मोहांधकारापहृतिक्षमेभ्यः परस्पराज्ञा
परिपालकेभ्यो नमो नमः शांभविशांभवेभ्यः विधूतकेशालिकपालिकेभ्यः स्वरासवासक्तविलोच
नेभ्यः नवीनकांतारततत्परेभ्यो नमो नमः शांभविशांभवेभ्यः विभूतिलिप्तांगदिगंबरेभ्यश्चिता
ग्निधूमालिभयानकेभ्यः कपालपात्रामृतपानकेभ्यो नमो नमो भैरविभैरवेभ्यः सिद्धाष्टकादान
महागुनिभ्यः श्रीभैरवाचारकृतास्पदेभ्यः स्वाधीनतान्यक्कृतनिर्जरेभ्यो नमो नमो भैरविभैरवेभ्यः

प्रशांतशास्त्रार्थविचारकेभ्यो निहतनानारसकाव्यकेभ्यः निरस्तनिःशेषविकल्पनेभ्यो नमो नमो
भैरवविभैरवेभ्यः स्वात्मैकभावांतरिताशयेभ्यः साम्राज्यसाम्राज्यसुखाकरेभ्यः श्रीसच्चिदानंदि
तविग्रहेभ्यो नमो नमः भैरवविभैरवेभ्यः पराप्रसादास्पदमानसेभ्यो ब्रह्माद्वयज्ञानरसाकुलेभ्यः शि
वोहमित्याश्रितचेतनेभ्यो नमो नमो भैरवविभैरवेभ्यः सर्वथा सर्वदा सार्वं सर्वं चरपदादिमत् जगज्ज
नितविस्तारं ब्रह्मेदमिति विश्वाहं अहमेव परो हंसः शिवः परमकारणं मत्प्राणे सत्स्वरूपस्यात्माली
नः समरसीगतः सच्चिदानंदनिलयं परापरमकारणं शिवाद्वयप्रकाशाढ्यं शमामलं धामधीमहि
अनेन वीरस्तवकीर्तनेन समुद्धृतक्लेशसवासनोहं संसारकांतारमहार्णवेस्मिन्निमज्जमानं ज
गदुद्धरेयं इति श्रीदेवीरहस्ये तंत्रे शांतिस्तोत्रं वीरवंदनाख्यं स्तोत्रं नामैकविंशः पटलः समाप्तः
इति शांतिस्तोत्रं वीरवंदनाख्यं स्तोत्रं च पठित्वा सर्वान्सामयिकानभिषिंच्य विशेषार्घ्यपात्रमु
द्धृत्य शिरःस्थाय श्रीगुरवे प्राग्वत्समर्प्य तथैव तत्पादुकां त्रिः समभ्यर्च्य मूलविद्यां श्रीगुरु
पादुकाविद्यांते च स्वाहा इति स्वमूलाधारकुंडलिन्यात्मकपरदेवतामुखे हवनबुद्ध्या तज्जलं
पात्रांतरे कृत्वाश्नीयात् शेषं प्रियशिष्याय प्रसादबुद्ध्या किंचिद्दद्यात् सोपि स्वपात्रे कृत्वात

श्री
११२

112

जले श्रीश्रीयादित्यार्घ्यप्रतिपत्तिः ततः स्वगुरूपदेशविधिना शेषं कृत्वा निर्वर्त्तं समापयेत् तत
स्नानादिना देहं गन्धपुष्पाक्षतान्वितं जलमादाय ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे
नमः सर्वजगत्सवित्रे कर्मदायिने ह्रां ह्रीं सः सूर्याय एष तेऽर्घः स्वाहा इति सूर्यायार्घ्यं दत्त्वा कृता
ञ्जलिः यन्मयाच्छिद्रं तत्पच्छिद्रं यच्छिद्रं पूजने मम सर्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः
इत्यच्छिद्रमवधारयेत् ततो मूलेन प्राणायामं करषडङ्गन्यासान् विधाय षडासन
वाग्देवताष्टकन्यासान् विधाय प्रातःकृत्यगुरुस्तोत्रं पठित्वा श्रीगुरुं प्रणम्य मूलविद्यया द्विती
यकूटेन निर्माल्यं शिरसि धृत्वा मूलविद्ययैव चरणोदकं स्वीकृत्य श्रीपरदेवताभक्तेभ्यो नैवेद्या
दिकं विभज्य दत्त्वा स्वयमपि स्वसहायवजनैः सार्धं भुक्त्वा स्वात्मानं कामकलारूपं विभावयन्
सुखं विहरेदिति श्रीपरदेवताया नित्यपूजाविधिः एवं बिन्दुचक्रमारभ्य चतुरस्रान्तं वा पूजयेत्
एषा संहारसृष्टिपूजा इति विस्तारातिविस्ताराभ्यां पदत्रयमित्थं नित्यक्रमेण पूजयितुः सर्व
सिद्धिः स्यात् अमंगलमपि मंगलं स्यात् विस्ताराशक्तो संक्षेपतो नित्यपूजां कुर्यात् तत्र शुचिर्भू
त्वा शुद्धासने समुपविश्य श्रीगुर्वादिवंदनपूर्वकं भूतशुद्धिं मातृकान्यासं योगपीठन्यासं प्राणा

यामऋष्यादिकरषडंगन्यासं करशुद्धिषडासनषडंगयुवतीवाग्देवताष्टकचतुष्टीन्यासा
दिकं चकृत्वा अत्राप्यशक्तौ प्राणायामऋष्यादिकरषडंगचतुरासनवाग्देवताष्टकात्मकं
न्यासत्रयं वा कृत्वा मुद्रादर्शनं यथाशक्तिचासनपूजां विधाय संक्षेपतः सामान्यार्घ्यश्रीपात्रं
चस्थापयित्वात्मपूजां विधाय पीठपूजां कृत्वा श्रीचक्रेपूर्ववन्मूलदेवीमावाह्य षोडशभिर्द
शभिः पंचभिरुपचारैर्वा पूजयित्वा यथाशक्तिप्राग्वन्नित्यामंडलादिषडंगयुवतीसंपूज्य नवा
वरणदेवताः पूजयेत् अशक्तौ चतुरस्रमारभ्य विंदुचक्रांतमावरणनवकं पूजयेत् ततोय
थाविधिशेषं समापयेदित्यनुकल्पः तत्राप्यशक्तावष्टारमारभ्य विंदुचक्रांतमावरणत्रयं पू
जयित्वा शेषं समापयेदित्यनुकल्पः तत्राप्यशक्तौ षडंगयुवतीपूजांते त्रिकोणे विंदुचक्रं
यथाविधि पूजयेदिति परमापत्कल्पः प्रवासे पथि दुर्गमे स्थाने परचक्राद्यागमे सिंहचौराद्यु
पद्रवे कारागृहप्रायोपवेशनादिसंभवे मनोभये जाते स्थानपूजनासनाद्यलाभे स्नानादिकं
निर्वर्त्य न्यासादिकमपि यथाशक्ति विधाय यथाविधिध्यात्वावाह्य पूजाविधिनैवार्घ्यसाध
नपीठपूजापुरःसरं मानसीमेव श्रीचक्रपूजां यथाविधि विधाय जपहोमादिकमपि यथाशक्ति

श्री कृत्वासमापयेदितिमानसपूजासमयोविधिश्च इतिसंक्षेपपूजाविधिः महामाहेश्वराचार्यैः सा
११२ हिब्कौलाभिधाश्रमे अवतीर्णैःसमालोक्यभूरितन्त्राणिशङ्कितः नाविस्तरातिविस्तारासेषापद्ध
113 तिरर्थितैः अनुग्राह्यजनैःश्रीमच्छ्रीविद्यायाविनिर्मिता इतिश्रीमहामाहेश्वराचार्यवर्यसाहि
बकौलानंदनाथपादुकाविहितश्रीविद्यानित्यपूजापद्धतिः संपूर्णसमाप्ताशुभदावोभवीत्व
सदासाधकानां श्रीगुरवेशिवायोनमः ॥

ॐ श्री गुरवे शिवाय नमः श्रीदेव्यै सदा सफलदायिन्यै नमः श्रीदेव्युवाच भगवन्करुणाम्भोधे शास्त्रां
भोनिधिपारग दासी परमभक्तास्मि वरं दातुमिहार्हसि श्रीभैरव उवाच कथयस्व महेशानि कमि
तो वरमिच्छसि यत्किंचिन्मनसीष्टं स्यात्तद्दातुं ते त्वमोस्म्यहं श्रीदेव्युवाच कामेश्वरस्य देवेश क
वचं देवदुर्लभं शीघ्रं मे दयया ब्रूहि यद्यहं प्रीयसी तव श्रीभैरव उवाच शृणुष्व परमेशानि कवचं
मन्मुखोदितं महाकामेश्वरस्यास्य नदेयं परमाद्भुतं यं धृत्वा पठित्वा च यं श्रुत्वा कवचोत्तमं त्रै
लोक्याधिपतिर्भूत्वा सुखितोस्मि महेश्वरि तदेवं वर्णयिष्यामि तव प्रीत्या वरानने रहस्यं परमं त
त्वं न दातव्यं दुरात्मने अस्य श्रीकामेश्वरकवचमंत्रस्य श्रीदक्षिणामूर्तिऋषिः पंक्तिश्छंदः श्री
कामेश्वरो देवता श्रीं बीजं ह्रीं शक्तिः क्लीं कीलकं चतुर्वर्गफलप्राप्त्यर्थं कवचपाठे विनियोगः
अथ ध्यानं उद्यच्चंद्रसमानदीप्तिममृतानंदैकहेतुं परं चिद्रूपं भुवनैकसृष्टिप्रलयोद्भूतैकरक्षा
परं कोटीचंद्रगलत्सुधाद्रुतं हारादिभूषोज्ज्वलं शूलं खड्गवरौ तथाभयकरं कामेश्वरं भाव
ये ऐं के कामेश्वरः पातु क्लीं शिवो मे ललाटकं सौः मे कर्णौ च कामेशः तारं मे लोचनद्वयं श्रीं ग
डौ मे महाकालो ह्रीं नासां चंद्रचूडकः हं मे ओष्ठौ त्रिपुरेशः सं मे दंतौ च भैरवः लं मे जिह्वां पातु दे

श्री
११४

114

वोमहाकामेश्वरः परः संमोहनंसदापातुमहावटुकभैरवः यंमेस्कंदौसदापातुमहामृत्युंजय
स्तथा हुंमेभुजौसदापातुश्रींदेवस्त्रिपुरांतकः संमेहस्तौत्रिलोकेशःहेंनखान्पातुसुंदरः ह्रेंद
तःपातुशंमेशोमंकुक्षिंकृत्तिकावरः लंपार्श्वौपातुमेबालावंनाभिंब्रह्मभूषकः रंवस्तिंपातु
मेदेवोयंपृष्ठंविश्वरूपकः हुंशिश्नंपातुविश्वेशःअमृतेश्वरभैरवः यंमेऊरूपातुमेरुद्रोरंगुह्यं
गुह्यकेश्वरः लंकटिंपातुमेनित्यंशिवःपरमकारणः वंऊरूत्रिपुराध्यक्षंलंजानूदेवपालकः
मंजंघेपातुमहिमायंगुल्फौसूर्यस्वरूपकः श्रींजठरंहरःपातुह्रींमनोग्रहसुंदरः ॐबुद्धिंपातुमे
रुद्रःसौंःरसंदक्षप्रजापतिः ह्लींरक्तंपातुमेदेवःऊर्ध्वंचवह्निरूपधृक् ऐंमांसंगुह्यकःपातुमेरुः
पशुपतिस्तथा अस्थिमेगिरिजानाथोमज्जांमेनीलकंठकः शुक्रंभूतेश्वरःपातुमूर्धानंशंक
रोवतु पादौश्रीसुंदरीशानोदेवःकालांतकःप्रभुः पादादिशिरःपर्यंतमघोरःपातुसर्वदा
शिरसःपादपर्यंतंसद्योजातोममावतु प्रौढरूपःसदापातुस्वाहामेसकलंवपुः कामेश्वरः
प्रभातेव्यान्मध्याह्नेकालभैरवः सायंपातुकुलेशानोनिशीथेनिष्कलेश्वरः अर्धरात्रेवामदे
वोनिशांतेसुमहोदयः सर्वदासर्वतःपातुऐंक्लींसौंबीजरूपधृक् पूर्वेमामसितांगोव्याद्दिशि

रुरुभैरवः पश्चिमे पातु चंडेशो ह्युत्तरे क्रोधभैरवः ऐशान्यां पातु चोन्मत्तः कपालेशस्तथाग्निके नैरृ
त्यां भीषणः पातु वायौ संहारकोऽवतु ऊर्ध्वे मे कालरुद्रश्च पाताले परमेश्वरः मध्ये सदाशिवः पातु वि
श्वेशः सदाऽवतु दशदिक्षु सदा पातु महाकामेश्वरोऽवतु विस्मारितं च यत्स्थानं यत्स्थानं नाम व
र्जितं तत्सर्वं पातु मे देवस्त्रिपुरः पतिरीश्वरः गृहे शर्वः सदा पातु बहिः पायाद्वृषध्वजः पथि त्रिपु
रसंदर्पः पातु सर्वत्र सर्वदा रणे राजकुले दुर्गे दुर्भिक्षे शत्रुसंसदि द्यूते मारीभये राष्ट्रे विप्लवे वादि
नोकुले कामेश्वरः सदा पातु भयस्थाने च सर्वदा इत्येतत्कवचं गुह्यं त्रिषु लोकेषु दुर्लभं मूलमंत्र
मयं दिव्यं त्रिलोकीसारमुत्तमं अदातव्यमभक्तेभ्यः कवचं गुह्यमीश्वरि अदृष्टव्यमश्रोतव्यं दीक्षा
हीनाय मंत्रिणे परदीक्षाय शिष्याय पुत्राय शठजन्मने नदातव्यं नश्रोतव्यमित्याज्ञा मामकी स्फु
टं परं श्रीमहिमानं च स्मरणं चास्य वर्मणः अदीक्षितो यदा मंत्री विद्यां गृह्णुः पठेदिदं सदीक्षि
तश्चेति ज्ञेयो मांत्रिकः साधकोत्तमः गुरुं पूज्य विधायाथ विधिवत्प्रपठेत्ततः कवचं त्रिः सकृद्वा
पि यावज्ज्ञानं च वा पुनः एतच्छतार्धमावर्त्य त्रैलोक्यविजयी भवेत् यः पठेन्मनसा तस्य रात्रौ ब्रा
ह्ममुहूर्तके पूजाकाले निशीथे तु तस्य हस्तस्थसिद्धयः ॐ स्वप्ने बंधने चौरे कांतारे सागरे भये

श्री
११५

115

रजःसत्वतमोरूपवर्मकामेश्वरस्यतु कांतंतेमनसायद्यतन्नत्प्राप्नोतिसाधकः महाकविर्भवेन्
मासात्सर्वसिद्धीश्वरोभवेत् कुंकुमेनलिखित्वावैभूर्जेत्वचिरवोदिने प्रातःकालेशुभेर्दचस्र
णिस्कंधेधारयेद्यदि शिखायांदक्षिणेवाहोकंठेवाधारयेद्बुधः यद्यदिष्टंभवेत्तत्तत्साधकोलभते
चिरात् यत्रहेवर्ततेवर्मश्रीकामेश्वरदैवतं विद्याकीर्तिर्धनारोग्यंलक्ष्मीर्हिदिनेसंशयः विनाव
लिंनसंरक्ष्यंकवचंसाधकोत्तमैः चेद्रक्ष्यंतत्स्तान्दारान्प्राणुभंतियोगिनी वलिंदत्वापठेद्धर्मधार
येन्मूर्भिसाधकः पुत्रवान्धनवान्श्रीमान्नानाविद्यानिधिर्भवेत् इहभोगान्समश्नातिपरत्रमुक्ति
भाग्भवेत् ब्रह्मास्त्रादीनिशस्त्राणितद्गात्रस्पर्शनात्ततः नाशमायांतिसर्वत्रकवचस्यास्यधारणात्
मृतवत्सावामवाहोकवचस्यास्यधारणात् वहुपत्याजीववत्साभवत्येवनसंशयः रणेधृत्वाचरेद्यु
द्धंहत्वाशत्रून्जयंलभेत् जयंकृत्वागृहंदेविसंप्राप्स्यतिसुखीनरः महाभयेमहाघोरेमहामारीभ
येतथा दुर्भिक्षेशत्रुसंग्रामेपठेत्कवचमादरात् सर्वंतत्प्रशमंयातिकामेश्वरप्रसादतः कवच
स्यास्यदेवेशिवर्णितंनैवशक्यते महिमानंमहादेविजिह्वाकोटिशतैरपि इदंकवचमज्ञात्वायोज
पेतमंत्रंशिवे सप्तलक्षप्रजप्तापितस्यविद्यानसिद्ध्यति अदातव्यमिदंवर्ममंत्रगर्भरहस्यकं अ

वक्तव्यं महापुण्यं सर्वसारस्वतप्रदं अदीक्षिताय नो दद्यात् कुचैलाय दुरात्मने नदीयं परशि
ष्येभ्यो भक्तेभ्योपि विशेषतः शिष्येभ्यो भक्तियुक्तेभ्यः प्रदेयं भावनावशात् इति श्रीदेवदेवेशि
वर्मकामेश्वरस्य तत् गुह्यं गोप्यतमं गोप्यं कथितं तव भक्तितः इत्येष पटलो देवि परमाद्भुतका
रणः कथितो देवदेवेशि तव भक्तिवशान्मया न वक्तव्यो न दातव्यो दीक्षाहीनाय पार्वति यथा
वद्गोपनीयोसौ सिद्ध्यष्टकफलो मतः यावत्कालं भवेद्गुप्तस्तावत्तत्फलदायकः न चेद्गुप्तो भ
वेद्देवि सिद्धिहानिर्भवेद्ध्रुवं रहस्योद्घाटनाद्यस्मान्महिमा हीयतात्मनोः तस्मात्सर्वत्र गोप्तव्यः
साधकैः पटलोत्तमः यथेष्टकामदेश्चैह परत्र मोक्षदः प्रिये इति श्रीविश्वसारतंत्रे पार्वतीपर
मेश्वरसंवादे श्रीकामेश्वरकवचं संपूर्णम् ॥ ॥

ॐ श्रीगुरवे शिवाय नमः कैलासशिखरे रम्ये सुखासीनं महेश्वरं गिरीशं गिरिजा नत्वा प
र्यपृच्छत्कृतांजलिः रहस्यं रत्नाकरं सर्वसंपत्समृद्धिदं सर्वसौभाग्यदं नित्यं किंवा लोके म
हेश्वर श्रीईश्वर उवाच एतत्सौभाग्यकवचं रहस्यमतिदुर्लभं सर्वसिद्धिप्रदं देवि शृणु सौभाग्य

देयं शिवायांसततंपातुमहात्रिपुरसुंदरी शिरःकामेश्वरीपातुतन्मूर्धंभगमालिनी नित्य
क्लिन्नापातुदक्षेभेरुंडापश्चिमंशिरः वह्निवासीचतद्वामेविद्येश्वर्यंकोस्तथा शिवादूतीलला
टेचत्वरितातत्स्यदक्षिणं तद्वामपार्श्वमवतुतथैवकुलसुंदरी नित्यापातुभ्रुवोर्मध्येभ्रुवौनील
पताकिनी वामभ्रुवंचविजयानयनेसर्वमंगला ज्वालामालिनीवामेचचित्रारक्षतुनासिकां
दक्षश्रोत्रेचगणपःसव्यंपातुमहोद्यमः दक्षनासापुटंदुर्गातदन्यंपातुभारती अणिमादक्षि
णपुटंमहिमाचतदन्यतः ईशितामूर्ध्निदंतांश्चवशिताचेतरांस्तथा कुर्द्धोष्ठंप्राप्तिसिद्धिश्चप्रा
काम्याचाधरोष्ठकं रससिद्धिस्तुरसनांमोक्षसिद्धिस्तुतालुकं तालुमूलद्वयंब्राह्मीमाहेश्व
र्यैचरक्षतु कौमारीचिबुकंपातुतदधःपातुवैष्णवी कंठंरक्षतुवाराहीचेंद्राणीरक्षताद
धः चंडिकांपातुचामुंडामहालक्ष्मीस्तुसर्वदा सर्वसंक्षोभिणीमुद्रास्कंधंरक्षतुदक्षिणं त
दन्येद्राविणीमुद्रापायादंसद्वयंक्रमात् आकर्षिणीवशिनीचमुद्राचोन्मादिन्यपाथ भुजेम
हांकुशावामंखेचरीदक्षकुक्षिकं वामकुक्षिंबीजमुद्रायोनिर्दक्षिणबाहुकं ममत्रिखंडिनीमु
द्रावामबाहुंप्रपालयेत् कामाकर्षिणिकामुद्रारक्षतांदक्षकूर्परं कूर्परंवाममवतुबुद्ध्याक

र्षिणिका तथा अहंकाराकर्षिणी तु प्रकोष्ठं पातु दक्षिणं शब्दाकर्षिणिका वामं तु स्पर्शाकर्षिणि
का वतु प्रकोष्ठं दक्षिणे पातु रूपाकर्षिणिके तरं रसाकर्षिणिका पातु मणिबंधं च दक्षिणं गं
धाकर्षिणिका वामं चित्ताकर्षिणिका वतु स्मृत्याकर्षिण्य सौ पाणिं नामाकर्षिणि दक्षिणं बी
जाकर्षिण्यंगुः पायात् सततं दक्षिणांगुलीः आत्माकर्षिणिका मावा अमृताकर्षिणी नखान् शा
रीराकर्षिणी वामनखान् रक्षतु सर्वदा अनंगकुसुमा शक्तिः पातु दक्षस्तनोपरि अनंगमेखला
चान्यः स्तनोर्ध्वं पातु सर्वदा अनंगमदनारक्षेत् स्तनौ तच्चूचुके तथा रक्षतादनिशं देवी ह्यनंगमद
नातुरा अनंगवेगिनी क्रोडमनंगांकुशावतु अनंगरेखा वामं तु वक्षोजे तस्य चूचुकं अनंग
मालिनी पायाद्धृदः स्थलमहर्निशं सर्वसंक्षोभिणी शक्तिरूपा सर्वद्राविणी परा कुक्षिं सर्वाक
र्षिणी तु पातु पार्श्वं च दक्षिणं आह्लादिनी वामपार्श्वं मध्यं सम्मोहिनी चिरं सर्वदा स्तंभिनी पृष्ठं ना
भिं वै सर्वजंभिनी वशंकरी वस्तिदेशे जंभिणी सर्वदा कटिं उन्मादिनी विशेषेण पायाज्जघन
मंडलं सर्वार्थसाधिनी शक्तिर्नितंबं रक्षतादियं दक्षस्फिजे सदा पातु सर्वसंपत्तिरूपिणी स
र्वतंत्रमयी शक्तिः पातु वामस्फिजं मम पायात् कुकुत्स्थलं हृद्धे सर्वद्वंद्वक्षयंकरी सर्वसि

श्री ११८

117

द्धिप्रदा देवी पातु दक्षिणवक्षः सर्वसंपत्प्रदा देवी तदन्यं पातु वक्षःणं सर्वकामप्रदा देवी पातु स्कंधं च द
क्षिणं पायात्तदन्यमवतु सर्वदुःखविमोचिनी सर्वमृत्युप्रशमनी देवी पातु गुदं मम पातु देवी देह
मध्यं सर्वविघ्ननिवारिणी सर्वांगसुंदरी देवी रक्षतां दक्षसक्थिकं वामसक्थितलं पायात्सर्वसौ
भाग्यदायिनी अष्ठीवं मम सर्वज्ञा देवी रक्षतु सर्वदा अन्याष्ठीवं सर्वशक्तिर्देवी पातु चिरं मम
सर्वैश्वर्यप्रदा देवी रक्षजानु सदावतु सर्वज्ञानमयी देवी तदन्यं जानु रक्षतु आव्याधिर्यं दक्षजंघां
सर्वव्याधिविनाशिनी तदन्यं पातु मे देवी सर्वाधारस्वरूपिणी सर्वपापहरा देवी गुल्फं रक्षतु द
क्षिणं सर्वानंदमयी देवी वामगुल्फं सदावतु पार्ष्णिं मे दक्षिणं पातु सर्वरक्षास्वरूपिणी अन्या
त्वन्यां सदा पार्ष्णिं सर्वेप्सितफलप्रदा दक्षांघ्रिं पातु वशिनीर्वाग्देवता मम करोतु जृंभिणी
शक्तिस्त्रैलोक्याकर्षणं मम मोहिनी रक्षतादिक्षु कोदंडं भंगमौर्विकं तनोतु सततं पाशो वशी
करणमुत्तमं मे दक्षपादतलं सर्वेश्वरी वाग्देवतावतु वामपादतलं पायात्कौलिनी देवता मम नि
दद्यादंकुशं नित्यं स्तंभने शत्रुसंकटे पीठं मेवतु कामाख्या पातु कामेस्वधाम मम सदा पूर्णगिरेः
पीठं पायादर्थं मेहेंद्रकं जालन्धरस्य जालन्ध्रीपीठं रक्षतु मे सदा सायुज्यं तनुतां सद्यः श्रीपीठं श्री

करं तथा कामेश्वरी चात्मतत्त्वं रक्षेद्वज्रेश्वरी तथा विद्यातत्त्वं पातु शिवतत्त्वं श्रीभगमालिनी कामं
छिंद्यान्महाशत्रुमस्तार्णवमासनं क्रोधं बोधापहं हन्याद्रत्नोत्पोतांबुजासनं लोभं देव्यासनं
भिंद्याद्देव्यात्मादिव्यरूपवान् मोहं संहरतां चक्रमदं मे ज्ञासनं मम मात्सर्यं नाशयेन्नित्यं मम साध्या
सनं जवात् आधारं त्रिपुरालक्ष्मीः स्वाधिष्ठानं सुरेश्वरी मणिपूरं मम ध्येयं पायात्त्रिपुरसुंदरी इडां
पुराभगवती पिंगलां पुरभैरवी इडां मे त्रिपुरासिद्धा त्रिपुरांबा च पिंगला सुषुम्णां पातु मे नि
त्यं महात्रिपुरसुंदरी त्रैलोक्यमोहनं चक्रं रोमकूपांश्च पातु मे सर्वाशापूरकं चक्रं सप्तधातूंश्च रक्ष
तु सर्वसंक्षोभणं चक्रं प्राणाद्यं वायुपंचकं सौभाग्यदायकं चक्रं नागाद्यनिलपंचकं सर्वार्थ
साधकं चांतःकरणानां चतुष्टयं सर्वरक्षाकरं चक्रं रक्षतां मे गुणत्रयं सर्वरोगहरं चक्रं पायात्
पुर्यष्टकं च मे सर्वसिद्धिप्रदं चक्रं ममाव्यात्कोशपंचकं सर्वानंदमयं चक्रमायुः कीर्तिं च रक्ष
तु सौंदर्यं मन्मथः पातु रतिश्चापि रतिं मम प्रीतिं मे पातु सा प्रीतिरुत्साहं च वसंतकः संक
ल्पं कल्पकोद्यानं महालक्ष्मीर्मम श्रियं कार्तिकपालिनी रक्षेन्मंदिरं मम मंडपं पुत्रान्श्चैव
निधिः पायाज्ज्ञानार्थं पद्मनिधिस्तथा मार्गं मां भैरवी रक्षेन्मातंगी शुक्रं तथा अष्टदिक्षु महे

द्राद्याःसायुधाःपान्तुमांसदा पायादूर्ध्वदिशंब्रह्माविष्णुश्चक्रायुधोप्यधः अनाहतानिस्थाना
निकवचेनत्वयानितु तानिरक्षंतुसततंशिवायागुरवोमम इदंसौभाग्यकवचंस्वकरेयस्तुधा
रयेत् त्रिसंध्यंपठतिप्रीत्याश्रृणुयाद्वासमाहितः तस्यशीघ्रेणसिध्यंतिसिद्धयस्त्वणिमादयः
गुटिकापादुकाद्यष्टसिद्धयःसंभवंतिच वशादीन्यष्टकर्माणियोगसाष्टांगमेवच ब्रह्मविष्णुगि
रीशेंद्रकंदर्परविभिःसमं विचरत्यखिलांल्लोकान्सिद्धगंधर्वसेवितः तस्यस्मरणमात्रेणग्र
हभूतपिशाचकाः कीटवत्प्रविलीयंतेकूष्मांडभैरवादयः तस्यांघ्रितोयपतनात्प्रणश्यंति
महारुजः तत्पादकमलासक्तरजोलेपाभिमर्षणात् वशंभवतिशीघ्रेणत्रैलोक्यंसचराच
रं आबालमहिलाभूयःकिमुमायाविमोहिताः वीणाधरयाविद्रुमशोणाधरयास्तुविस्मितां
मुकया श्यामलयाकोमलयाचेतसिलीनाशिवाज्ञयापायात् इतिश्रीमदुमामहेश्वरसंवादे
श्रीमत्त्रिपुरसुंदर्याःसौभाग्यकवचंसंपूर्णम् ॥ ॐशिवकमलाशिवशंभुपदाब्जविलसद्रुद्रस्वरे
स्वैरंमिहितपादसरोजकेसरश्चलिरात्मविशुद्धये विदितविस्तृततेवैभवाभवभावनीरधिपारदा
भवतुनिर्मलनिश्चलोदयसारदाममशारदा श्रीमन्महामाहेश्वराचार्यवर्यश्रीसाहिबकौलपा

दानामियंकृतिः ॥ ॥

ॐ श्रीदेव्यै सत्सिद्धिदायै नमः श्रीभैरवः अथतेनवदुर्गाणांपूजापद्धतिमीश्वरि वक्ष्यामि परमप्री
त्यागद्यपद्यैकरूपिणी तत्रादौ ब्राह्मे मुहूर्ते उत्थाय बद्धपद्मासनो मुखशुद्धिं विधाय स्वशिरसि सह
स्राराधोमुखकमलकर्णिकान्तर्गते श्वेतालंकारमंडिते स्ववामस्थशक्त्या सहिते निजगुरुं ध्यात्वा मा
नसैरुपचारैः संपूज्य तत्र देवीं दुर्गां मनस्यावाह्य मानसैरुपचारैः संपूज्य मनसा गायत्रीमुच्चार्य
स्वमूलेन यथाशक्त्या जप्त्वा श्रीगुरुदेव्यै जपं समर्प्य संहारमुद्रया हृदि विसृज्य बहिरागत्य मल
मूत्रादि संत्यज्य वर्णिकं शौचं च कृत्वा दंतान् मूलेन विशोध्य यथोक्तं स्नानसंध्यादिकं निर्वर्त्य
यागमंडलमागच्छेदिति तत्र पादौ प्रक्षाल्य यज्ञवेदिमास्थाय तत्रासने उपविश्य आसनं शोध
येत् अस्य श्री आसनशुद्धिमंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो देवता आसनशोधने वि
नियोगः ॐ ह्रीं पृथिव्यै नमः ह्रीं श्रीं वसुंधरायै नमः पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृ
ता त्वं च धारय मां देवि पवित्रं कुरु चासनं अं अनंताय नमः पं पद्माय नमः आं आधारशक्त्यै

श्री
११९
119

नमः कं कूर्माय नमः ॐ सः सहस्रदलकमलकर्णिकायै नमः इत्यभ्यर्च्य तालत्रयं कुर्यात् अथ स
र्पितेभूता इति मंत्रेण तालत्रयं दत्वा नाराचमुद्रां प्रदर्शयेत् इत्यासनशुद्धिं विधाय पूर्वस्यां दिशि य
ज्ञवेदीमीषन्मात्रां विधाय चतुर्हस्तविस्तृतां विस्तृतत्रसम्पक्रयासंलिप्य मूलेन फट् स्वाहेत्याशाः
संवस्थ्य श्रीचक्रं चतुर्द्वारमष्टपत्रं षडस्रं त्रिकोणं बिंदुविराजितं सिंदूरेण वेद्यां विलिख्य तत्र मंडुका
य नमः श्रीं पृष्ठ्यै नमः सौः सुधार्णवाय नमः रं रत्नद्वीपाय नमः क्लीं सौः सरोवराय नमः क्लीं क
ल्पवनाय नमः तन्मध्ये पद्मवनाय नमः कल्पवल्लीमूलवेद्यै नमः यं योगपीठाय नमः इति सं
पूज्य चतुरस्रं पूजयेत् ॐ सौः क्लीं ऐं सर्वाशापूरकाय नमः इति पुष्पांजलिं दत्वा ॐ ऐं इंद्राय नमः
ॐ यं धर्मराजाय नमः ॐ वं वरुणाय नमः ॐ क्लीं कुबेराय नमः इति गंधाक्षतपुष्पैः संपूज्य
ॐ सं संहाराय नमः कं कालरुद्राय नमः विं विकरालाय नमः क्लीं करालाय नमः कं काला
ग्न्यै नमः रुं रुरुभैरवाय नमः सौः स्वच्छभैरवाय नमः श्रीं उन्मत्तभैरवाय नमः इत्यभ्यर्च्य
षट्कोणं पूजयेत् मूलं सर्वसंमोहनाय नमः इति पुष्पांजलिं दत्वा ॐ ह्रीं भुवनेश्वर्यै नमः ॐ
ऐं सौः बालायै नमः ॐ क्लीं बगलायै नमः ॐ ह्रीं सौः सरस्वत्यै नमः ॐ सः क्रीं छिन्नमस्तायै न

मः ॐ श्रीं श्रीपद्मावत्यै नमः इति षट्कोणावरणं संपूज्य त्रिकोणं पूजयेत् ईशाने ॐ गं गंगा
यै नमः ॐ यं यमुनायै नमः ॐ सौः सरस्वत्यै नमः ततो बिंदौ ॐ मूले दुर्गायै नमः मूले शिवायै नमः
मूलं नवदुर्गाभ्यो नमः इति गंधाक्षतधूपदीपनैवेद्यतांबूलच्छत्रचामरारात्रिकादिभिः संपूज्य मू
लं फट् स्वाय फडिति दिग्बंधनं विधाय तत्र यज्ञवेद्यां श्रीदेवीं ध्यात्वा विदित्वा मूलेन कांडात्कां
डादिति वाणान् संस्थाप्य मूलेन यवपात्रं सप्तधाभिमंत्र्य श्रीचक्रोपरि ॐ ह्रूं फट् स्वाहेति वा
पयेत् मूले घटं नूतनमच्छिद्रं दिव्यमालानुभूषितं सौवर्णं राजतं ताम्रं मृण्मयं चेति विश्रुतं त
त्र घटं मालाढ्यं करेष्टूत्वा श्रीचंदांशं देववेणुणा मापूर्य श्रीं ॐ ह्रीं श्रीं दुं दुर्गायै नमः इति सप्तधा
श्रीं फट् स्वाहेति बिंदौ घटं समर्पयेत् तत्र श्रीतीर्थजलमानीय मू नवदुर्गाभ्यो नमः मू ॐ दुर्गा
यै नमः इति यागवस्तूनि संशोध्य ॐ इं इंद्राय नमः पृष्ठे ॐ गं गणेशाय नमः घटस्य पुरस्तात्
ॐ वं वरुणाय नमः अधः ॐ क्रौं कुबेराय नमः वामे ॐ श्रीं धर्मराजाय नमः घटस्य दक्षिणे ॐ ह्रीं
हौं कुमाराय नमः मध्ये इत्यभ्यर्च्य घटमध्ये नवदुर्गाः पूजयेद्यथा ॐ ह्रीं श्रीं ऐं सौः सौः ऐं श्रीं ह्रीं ॐ
शैलपुत्र्यै नमः १ ॐ श्रीं ह्रीं क्लीं सः ब्रह्मचारिण्यै फट् स्वाहा २ ॐ क्लिं सः श्रीं ह्रीं ऐं सौः चंद्रघंटा

श्री यैनमः ३ ॐश्रींह्रींक्रींकूष्मांड्यैनमः ४ ॐह्रींश्रींहौंःस्कंदमात्रेहूःहःफट्स्वाहा ५ ॐह्रींका
१२० त्यायन्यैनमःस्वाहा ६ ॐश्रींह्रींह्रींश्रींॐकालरात्रिक्लींऐंसः फट्स्वाहा ७ ऐंसौंःश्रींश्रूंमहागौ
120 र्यैनमः ८ ॐऐंक्लींसौंःश्रींह्रींदेवहूतिश्रींफट्ठःठःठःस्वाहा ९ एषाविद्यामहाराज्ञीनवदुर्गा
त्मिकाशिवे जपेहोमेर्चनेदेविसिद्धिदासाधकेश्वरि कुर्याद्देवितत्तोमंत्रीशैलपुत्र्याःस्वपूजने स
शाक्तिकस्तत्रकुंभेपूजयेत्साधकःशिवां अस्यश्रीशैलपुत्रीपूजामंत्रस्य श्रीमहाकालभैरवऋ
षिः त्रिष्टुप्छंदः श्रीशैलपुत्रीदेवता ह्रींबीजं सौंःशक्तिः नमोदिग्बंधने ॐकीलकं धर्मार्थ
काममोक्षार्थंकुंभपूजायां कुमारीपूजनेहोमेपाठेचविनियोगः तत्रादौविघ्नोत्सार्य घंटाशं
खस्यदंगधूनिविधाय पूजामारभेत् ॐगंगणेशायनमः पूर्वे सौंःसरस्वत्यैनमः दक्षिणे गंगं
गायैनमः पश्चिमे ॐयंयमुनायैनमः उत्तरे वंवटुकायनमः ऊर्ध्वे यांयोगिनीभ्योनमः अधः
इतिचतुःसंपूज्य प्रणवेनप्राणायामत्रयंविधाय तत्त्वत्रयेणाचम्य देवींपूजयेत् ततः ॐह्रींसौंः
देविशैलपुत्रिवरदेऽस्मिन्नेहि२ इहसन्निधिंकुरु२ ॐश्रींस्वाहेत्यावाह्य मूलेनपाद्यार्घ्यादिनिवेद्य
तत्रासनंदत्वापूजयेत् ॐह्रींश्रींदुंदुर्गायैनमः रुंजयायैनमः रुंविजयायैनमः रुंरत्यैनमः रुंप्री

त्यै नमः ऊँ कान्त्यै नमः ऋँ स्थित्यै नमः ॠँ भूत्यै नमः इति दिक्षु विदिक्षु च दलस्य मध्ये मातृकान्तैरभ्य
र्च्य मूलं त्रिपुरायै नमः मूलं सिद्धलक्ष्म्यै नमः मूलं सरस्वत्यै नमः मूलं तारायै नमः मूलं नीलस
रस्वत्यै नमः मूलं तोतलायै नमः मूलं तारायै नमः मूलं समया श्रीशैलपुत्र्यै नमः इति मध्ये इति
गन्धाक्षतपुष्पदीपधूपनैवेद्याचमनीयादीनि निवेद्य कुमारीं पूजयेत् तत्र पूर्वं वह्नेदारवं विधाय देवीं
ध्यायेत् उद्यद्दिनेशायुतसन्निभाननां शशांकलेखामुकुटां चतुर्भुजां रक्तांबरामग्निरवीन्दुलोच
नां तां शैलपुत्रीं वरदां स्मरामहे इति ध्यात्वा पूर्वाभिमुखीं कुमारीं पूजयेत् धर्मार्थे पूजयेत् पूर्वे चा
ग्नेये धनलब्धये दक्षिणे शत्रुनाशाय नैऋते वश्यकर्मणि पश्चिमे पुत्रलाभाय वायव्ये रोगशान्तये
उत्तरे राज्यलाभाय चैशाने मोक्षलब्धये इति यथाभिलषिताशामुखाः कुमारीः संस्थाप्य
ह्रीं फट् स्वाहेति दिशो बद्ध्वा स्वाहेति पादौ प्रक्षाल्य स्ववस्त्राद्यो गसंपूर्णैः शुभमाल्याद्यलंकृताः
ताः पंचनववर्षाद्याः पूजयेत् कन्यकाः शिवे तत्र महासनानि दत्त्वा कुमारीः पूजयेत् ॐ ह्रीं श्रीं
दुं दुर्गायै नमः इति शिरसि ॐ ह्रीं श्रीं ऐं सौः सौः ऐं श्रीं ह्रीं ॐ शैलपुत्र्यै नमः तत्रैव महाकालाय
नमः मुखे ह्रीं संहाराय नमः दक्षांसे श्रीं कालरुद्राय नमः दक्षभुजे ॐ विकरालाय नमः दक्ष

श्री स्तने सौः करालायनमः दक्षपार्श्वे सौः कालाग्नयेनमः २ दक्षजानौ ऐं रुरवेनमः दक्षजंघायां
१२१ श्रीं स्वप्नायैनमः दक्षगुल्फे ह्रीं उन्मत्तायनमः दक्षपादे ॐ चिद्रूपायैनमः दक्षांगेषु ॐ मूलं शै
लपुत्र्यैनमः मुखे मूलं शारदायैनमः वामांसे मूलं बगलायैनमः वामभुजे मूलं छिन्नशी
र्षायैनमः वामस्तने मूलं पद्मावत्यैनमः वामपार्श्वे मूलं इंद्राक्ष्यैनमः हृदये मूलं अन्नपूर्णा
यैनमः कुक्षौ मूलं शारिकायैनमः नाभौ मूलं वैरव्यैनमः वामजानौ मूलं त्वर्यैनमः वामजं
घायां मूलं राजमातंगिन्यैनमः वामगुल्फे मूलं योगीश्वर्यैनमः वामपादे मूलं भुवनेश्वर्यैन
मः वामांगेषु मूलं ब्राह्म्यैनमः मूलं वैष्णव्यैनमः मूलं शांभव्यैनमः मूलं कौमार्यैनमः मूलं
अपराजितायैनमः मूलं वाराह्यैनमः मूलं नारसिंह्यैनमः मूलं ऐंद्र्यैनमः इतिगंधाद्यैरभ्य
र्च्य तत्र मूलं दिव्याभरणमाल्यादिसमर्प्य नानानैवेद्यंनिवेद्य ॐ ह्रीं श्रीं इतित्रिराचम्य च
ढाग्रे यथाशक्ति जपेत् कवचसहस्रनामादिपाठंविधाय होमवेदीमाश्रयेत् तत्रसिंदूरेणत्रि
कोणकुंडमेकहस्तमात्रायतंविभाव्य तत्रहोममारभेत् ॐ ह्रीं विघ्नोत्सारिण्यैनमः इतिवि
घ्नानुत्सार्य हसौः इतिमूलेनारणिंकुंडेनियोज्य रं ह्रीं सः वैश्वानरायनमः ॐ रां रः अरणिंनि

मध्य तत्राग्निमानीय मूलेन वह्निसंस्कारं विधाय ॐ ह्रीं श्रीं रं ह्रीं सः वैश्वानर त्रिनेत्र ज्वालामुख
एह्येहि इह सन्निधिं कुरु २ ह्रीं सः स्वाहा इत्यावाह्य मूलेनाज्यं मंत्रयित्वा रं अग्नये फडिति मंत्रेणा
ज्यपात्रमग्नौ निधाय ह्सौः इत्यवतार्य मूलं दशांशकलापरिमिताहुतीर्दत्वा तत्र रं वैश्वानरा
य पावकाय ह्रीं सः फडित्याहुतित्रयं दत्वा तत्र पश्चिमे श्वेतसंभूतं छागमेकवर्णं वानीय मूलं कुंभा
ग्रे निवेद्य ॐ ह्रीं देवि इदं बलिं गृह्ण २ ह्रीं फट् स्वाहा इति बलिं निवेद्य दशांशं होमं कुर्यात् ज
पाद्दशांशतो होमस्तद्दशांशेन तर्पणं मार्जनं तद्दशांशेन तद्दशांशेन भोजनमिति होमं निर्वर्त्य
ब्राह्मणान् भोजयेत् तत्र मूलेन संहारमुद्रया विसर्जयेदिति विधिः अनेन विधिना देवि साधको
योऽर्चयेच्छिवां नवाहानि तथा कन्याः पूजयेद्भक्तिपूर्वकं तस्य लक्ष्मीर्भवेद्दासी निश्चला वंशसेवि
ता आयुर्वर्षसहस्राणि संततिः पुत्रपौत्रिकी धर्मार्थकामसिद्धिश्च भैरवस्याष्टसिद्धयः यं यं काम
यते कामं साधकः परमेश्वरि तं तं प्राप्नोति देवेशि हेलया भैरवोपरः इति श्रीरुद्रयामले तंत्रे सम
यपूजाकल्पे नवदुर्गापूजासंग्रहे शैलपुत्रीपूजाविधिः समाप्तः ॥
तत्रापरेऽहनि पूर्ववत् स्नानादिकं विधाय यागगेहमेत्यासनशुद्ध्यादि कृत्वा ब्रह्मचारिणीं पूजयेत्

श्री
१२२
122

अस्यश्रीब्रह्मचारिणीमंत्रस्य भैरवऋषिः अनुष्टुप्छंदः श्रीब्रह्मचारिणीदेवता श्रींबीजं ह्रीं
शक्तिः क्लींकीलकं सौंः दिग्बंधनं श्रीधर्मार्थकाममोक्षार्थे पूजायांविनियोगः ह्रींमितिषडंगंवि
धाय तत्त्वत्रयेणाचम्य प्राणायामंविधाय त्रिर्घटंपूजयेत् ॐह्रींविघ्नोत्सारिण्यैनमः इतिविघ्नानुत्
सार्य ॐगंगणेशायनमः इतिघटंपूर्ववत्संपूज्य मातृकादेवैश्चदेवींपूजयेत् ॐह्रींसौंःदेविब्र
ह्मचारिणिसपरिवारेघटेस्मिन्नेत्यैहि इहसन्निधिंकुरु२ पूजांगृहाण२ श्रींॐस्वाहेत्यावाह्य मू
लेनपाद्यार्घ्यादिनिवेद्य तत्रासनंदत्वापूजयेत् ॐह्रींश्रींदुर्गायैनमः ह्रँजयायैनमः ह्रँविजया
यैनमः ह्रँरत्यैनमः ह्रँप्रीत्यैनमः एवंकीर्त्यैनमः स्थित्यैनमः ह्रँभूत्यैनमः इतिदिक्षुविदिक्षुघटम
ध्ये मूलं बालासरस्वत्यैनमः कुब्जिकायैनमः करालिन्यैनमः रक्तमुख्यैनमः मातंग्यैनमः मनो
न्मन्यैनमः मदोत्कटायैनमः मूलं रत्नेश्वर्यैनमः ॐह्रींश्रींक्लींसः ब्रह्मचारिण्यैफट्स्वाहा ब्र
ह्मचारिण्यैनमः इतिमध्येसम्पूज्यागंधादितांबूलांतैः समर्प्य पूर्ववत्कुमारीहोमंचकुर्यात् देवीं
ध्यायेत् कमलासिवराभयायुधांशशिवक्त्रांशशिशेखरांशिवां अरुणाभरणांत्रिलोचनांहृ
दयेतांभजब्रह्मचारिणीमितिध्यात्वा घटाग्रेजपंनिर्वर्त्य जपाद्दशांशतोहोमः एवंविधायविस

र्जयेत् इति श्रीरुद्रयामले तंत्रे ब्रह्मचारिणीपूजाविधिः समाप्तः ।२॥ ॥

तत्र ब्राह्ममुहूर्ते उत्थाय स्नानादिकं विधाय यज्ञवेदीमाश्रित्य विष्टरं संशोध्य पूर्ववत् संकल्पं कुर्यात् अस्य श्रीचंडघंटामंत्रराजस्य श्रीभैरवऋषिः अनुष्टुप्छंदः श्रीचंडघंटादेवता क्लीं बीजं सः शक्तिः श्रीं कीलकं नमो दिग्बंधनं श्रीचंडघंटापूजायां विनियोगः क्लामिति न्यासः ॐ ह्रीं विघ्नोत्सारिण्यै नमः इति विघ्नानुत्सार्य प्रणवेन प्राणायामं कुर्यात् ततस्त्रयेणाचम्य घटे वाग्भ्यां मातृकाद्यैरभ्यर्च्य श्रीदेवीमध्ये पूजयेत् ॐ ह्रीं सौः देवि चंडघंटे घंटे अस्मिन्नेहि २ सन्निधिं कुरु कुरु पूजां गृहाण २ श्रीं ॐ स्वाहेत्यावाह्य मूलेन पाद्यादि निवेद्य तत्रासनं दत्त्वा पूजयेत् मध्ये मूलं काल्यै नमः मूलं शिवायै नमः कामिन्यै नमः भद्रकाल्यै नमः श्मशानवासिन्यै नमः कुरुकुल्लायै नमः महोदर्यै नमः सनातन्यै नमः ॐ क्लीं सः श्रीं ह्रीं ऐं सौः चंडघंटायै नमः इति समभ्यासं पूज्य इति गंधादीन् समर्प्य कुमारीं पूजयेत् देवीं ध्यायेत् बालां शशांकायुतपूर्णवक्त्रां त्रिलोचनां स्मेरमुखीं प्रसन्नां शंखाब्जचापास्त्रकं भहस्तां श्रीचंडघंटां हृदये भजामि कुंभाग्रे कुमारीपूजनं जपपाठहोमादिकं निर्वर्त्य मूलेन विसर्जयेत् इति चंडघंटापूजाविधिः समाप्तः ।३ ॥ ॥

श्री १२३ 123

ततोन्येद्युः प्रातः कृत्यं विधाय यागस्थलीमेत्यासनशुद्ध्यादिकं संपाद्य संकल्पं कुर्यात् अस्य श्रीकु
ष्मांडीमंत्रस्य ब्रह्माऋषिः अनुष्टुप्छंदः श्रीकुष्मांडीदेवता ह्लींबीजं स्त्रींशक्तिः प्रणवः कीलकं
नमोदिग्बंधनं चतुर्वर्गफलप्राप्त्यर्थे विनियोगः क्रमितिन्यासः पूर्ववदाचम्य प्राणायामत्रयं वि
धाय घटेमातृकावर्णैरभ्यर्च्य ॐ ह्रींसः देवि कुष्मांडि एह्येहि सन्निधिं कुरु २ पूजां गृहाण २ श्रीं ॐ स्वा
हेत्यावाह्य मूलेन पाद्यादि निवेद्य घटं बहिः संपूज्य मध्ये पूजयेत् मूलं कामेश्वर्यै नमः मूलं कांता
यै नमः कृशोदर्यै नमः कलावत्यै नमः काल्यै नमः चंडिन्यै नमः त्रैत्रिकायै नमः मूलं परमपरायै
नमः ॐ श्रीं ह्रीं क्लीं कुष्मांड्यै नमः इति समभ्यर्च्य गंधादिनैवेद्यं निवेद्य ध्यानं उद्यद्दिनेशाननो चंद्र
चूडो पंचास्यस्थो त्रिदशैः प्रपन्ना शंखाब्जविघ्नासनैः शोभिहस्ता श्रीकुष्मांडी लसत्सरोजे भजे
हं घटाग्रे पूर्ववत्कुमारीपूजनं जपपाठादिकं निर्वर्त्य क्षीरपायसखंडाद्यैर्वस्त्रैराभरणोज्वलैः
दक्षिणाभिः स्तवैर्देवि तोषयेत्कन्यकाः सुधीः अयुतं तज्जपं देवि तद्दशांशं महेश्वरि अतो दशां
शतो होमः कार्यः साधकसत्तमैः एवं विसर्जयेत् इति कुष्मांडीपूजाविधिः समाप्तः ॥ ४ ॥ -ॐ- ॥
ततो ब्राह्मे मुहूर्ते उत्थाय प्रातः कृत्यादिकं विधाय संकल्पं कुर्यात् अस्य श्रीस्कंदमातृमंत्रस्य

श्रीभैरवऋषिः त्रिष्टुप्छंदः श्रीस्कंदमातादेवता ह्रींबीजं ह्रौंशक्तिः हुःकीलकं ममाभिष्टसिद्ध्य
र्थे चतुर्वर्गप्राप्त्यर्थे विनियोगः ह्रामितिन्यासः प्राणायामत्रयं कृत्वाचम्य चक्रे मातृकान्तरे
रभ्यर्च्य देवीमावाहयेदर्चयेत् तत्र ॐ ह्रीं स्कौं स्कः स्कंदमातरेहि इहि इह अस्मिन् सन्निधानं कुरु २
ह्रौं हुः हुः फट् स्वाहेत्यावाह्य मूलेन पाद्यादिनिवेद्य पूजयेत् मूलं सत्यै नमः स्थित्यै नमः प्रीत्यै
नमः कीर्त्यै नमः कान्त्यै नमः मत्यै नमः सत्यै नमः उमायै नमः मूलं हैमवत्यै नमः ॐ ह्रीं श्रीं ह्रौं
स्कंदमात्रे हुः हुः फट् स्वाहेत्यष्टधोच्चार्य मध्ये इति गन्धादिलोक्लोकान्ते समर्प्य पूर्ववत् कुमारीपूजा
दिकं समर्प्य देवीं ध्यायेत् सिंहांशुकोटिस्फुरदास्यशोभां त्रिलोचनां कुंकुमपीतवस्त्रां सिंहास
नां नागमुख्यादिपूज्यां भजेऽहं दिस्कंदपूतां भवानी श्रीदेवीं विसर्जयेत् इति स्कंदमातृपूजावि
धिः समाप्तः ॥५ ॥
ततो ब्राह्मे मुहूर्ते उत्थाय आह्निकं कर्म निर्वर्त्य यागगेहमागत्य विघ्नस्तम्भाद्यादि विधाय संकल्प्य
पूर्ववत् पूजामारभेत् अस्य श्रीकात्यायनीमन्त्रस्य श्रीसदाशिवऋषिः अनुष्टुप्छंदः श्रीका
त्यायनीभगवतीदेवता क्लींबीजं ॐ शक्तिः स्वाहाकीलकं ममाभिष्टसिद्ध्यर्थे धर्मार्थकाममोक्ष

श्री
१२४
124

र्थे विनियोगः ह्रामितिन्यासः तत्त्वत्रयेणाचम्य प्रणवेन प्राणायामत्रयं कृत्वा घटे मातृकादीन्
समभ्यर्च्य ॐ ह्रीं कात्यायन्यै इहि पूजां बलिं गृहाण २ संस्थितिं कुरु २ ह्रीं ॐ स्वाहा इत्यावाह्य मूलेन पा
द्यादि निवेद्य मध्ये पूजयेत् मूले कामिन्यै नमः २ कुलजायै नमः कलावत्यै नमः कनकेश्वर्यै नमः
कीर्तिमत्यै नमः कीर्तिदायै नमः कीलिन्यै नमः मूले कौतुकिन्यै नमः ह्रीं कात्यायन्यै नमः इति त्रिशै
थादीन् समर्च्य देवीं ध्यायेत् सहस्रकरदीप्ताङ्गीं त्र्यक्षां रक्ताम्बरोज्ज्वलां चतुर्भुजां शवगतां नौमि का
त्यायनीं शिवां इति ध्यात्वा घटाग्रे जपादिकं पूर्ववत् कुमारीपूजनं च देवीं विसर्जयेत् इति का
त्यायनीपूजाविधिः समाप्तः ॥ ६ ॥ ॥

तत्रापरेऽह्नि प्रातः कृत्यादिकं समाप्य यज्ञवेदीमाश्रित्यासनशोधनादिकं विधायाचम्य प्रा
णायामं संकल्पं च पूर्ववत् कृत्वा अस्य श्रीकालरात्रीमन्त्रस्य श्रीभैरवऋषिरनुष्टुप्छन्दः श्रीका
लरात्रीदेवता श्रीं बीजं ह्रीं शक्तिः ॐ कीलकं श्रीं क्लीं दिग्बंधने धर्मार्थकाममोक्षार्थे विनियो
गः श्रीं ह्रामित्यादिन्यासः ॐ ह्रीं विघ्नोत्सारिण्यै नमः घटे पूजयेन्मातृकाभिः ॐ श्रीं ह्रीं क्लीं दे
वि कालरात्रि घटेऽस्मिन्नेह्येहि पूजां गृहाण २ सन्निधिं कुरु २ ऐं सः फट् स्वाहा इत्यावाह्य पूजयेत्

ॐ ह्रीं श्रीं क्रं त्यै नमः रँ कुल्लायै नमः रँ कुरुकुल्लायै नमः रँ कुलेश्वर्यै नमः कुलाचारायै नमः कात्स
वत्यै नमः कुब्जायै नमः कुलरूपिण्यै नमः ॐ श्रीं ह्रीं ह्रीं श्रीं ॐ कालरात्रि क्लीं ऐं सः फट् स्वाहा इति
सप्तधोच्चार्य कुमारीपूजाहोमादिकं संपाद्य देवीं ध्यायेत् नवांबुदाभां मिहिरेन्दुवह्निनेत्रां गदां भो
जकरां हसन्ती पीतांबरां भूरिककचोज्ज्वलांगीं श्रीकालरात्रीं हृदये भजामि इति ध्यात्वा च रात्रे क
वचसहस्रनामादिकं पाठं विधाय श्रीदेवीं विसर्जयेत् इति कालरात्रीपूजाविधिः समाप्तः ॥ ॥
ततोऽन्येद्युर्मौलिसूर्यं त्युत्थाय बद्धपद्मासनः श्रीगुरुदेवं ध्यात्वा स्नानादिकं विधाय यागस्थ
लीं पूजामारभेत् प्राणायामासनशुद्धिं कृत्वा संकल्पं कुर्यात् अस्य श्रीमहागौरीमंत्रस्य श्रीका
लभैरवऋषिः अनुष्टुप् छंदः श्रीमहागौरी देवता ऐं ॐ बीजं ॐ सौः शक्तिः ॐ ॐ कीलकं ॐ शूं दिग्बं
धनं चतुर्वर्गफलप्राप्त्यर्थे विनियोगः गामिति न्यासः षडंगमातृकाः संपूज्य देवीं पूजयेत् ॐ ऐं सौः
देवि महागौरि एह्येहि संनिधिं कुरु २ पूजां बलिं गृहाण २ गां गीं फट् स्वाहेत्यावाह्य मूलेन पाद्यार्घ्या
दि निवेद्यासनं दत्वा पूजयेन्मातृकाभिः मध्ये मूले महालक्ष्म्यै नमः माहेश्वर्यै नमः महाचामुं
डायै नमः महाभीमायै नमः महामत्तायै नमः महोदर्यै नमः मधुमत्यै नमः महाविद्यायै नमः

श्री
१२५
125

मूलं श्रीं ॐ ऐं सौः गौं श्रं महागौर्यै नमः सप्तधोच्चार्य गंधादीन्निवेद्य कुमारीं पूजयेत् घंटां वादयित्वा
श्रीदेवीं ध्यायेत् उद्यदर्कसहस्राभां सितांशुमुकुटांशिवां चतुर्भुजां त्रिनयनां महागौरीं भजाम्यहं
जपपाठादिकं विधाय होमादिकं विधाय श्रीदेवीं विसर्जेत् इति गौरीपूजासमाप्ता ८ ॥
ततो ब्राह्ममुहूर्ते उत्थाय नित्यकर्म विधाय यागगेहे विघ्नशोधनं कृत्वा तत्त्वत्रयेणाचम्य प्राणा
यामसंकल्पादि कुर्यात् अस्य श्रीदेवहूतिकामंत्रस्य भैरवऋषिः अनुष्टुप्छंदः श्रीदेवहूतीदेव
ता क्लीं बीजं सौः शक्तिः श्रीं कीलकं श्रीं इति दिग्बंधनं चतुर्वर्गप्राप्त्यर्थे विनियोगः क्लामिति
न्यासः षट्मातृकाभिरभ्यर्च्य श्रीदेवीं पूजयेत् ॐ ह्रीं श्रीं देवहूति घटेऽस्मिन्सन्निधेहि सन्निधिं कुरु २
पूजां गृहाण २ श्रीं फट् ठः ठः ठः स्वाहेत्यावाह्य आसनपाद्यादि दत्वा पूजयेत् ॐ श्रीं ह्रीं देवमा
त्रे नमः मूलं देवप्रियायै नमः देवहूत्यै नमः गणेश्वर्यै नमः दात्तायण्यै नमः दुर्लभायै नमः
दुःखहारिण्यै नमः ॐ श्रीं ह्रीं दुरितहारिण्यै नमः ॐ श्रीं ह्रीं मूलं ॐ ऐं क्लीं सौः श्रीं ह्रीं देवहूति
श्रीं फट् ठः ठः ठः इति सप्तधा पूजयेत् गंधादीन्निवेद्य कुमारीं पूर्ववत्पूजयेत् देवीं ध्यायेत् प
द्मांकबिंबद्युतिमुत्पलाक्षीं प्रतप्तचामीकरगात्रयष्टिं सितांबरां प्रेतगतां त्रिनेत्रां श्रीदेवहूतीं

हिमुजांभजेहमितिध्यात्वा मंत्रंजपेत् होमतर्पणादिकृत्वा देवींसंहाररुद्रयाविसर्जयेत् मं
देवसाधकेति गुह्येति प्रातः प्रभृतिश्राद्धान्ते यन्मात्राविंङ्कविंहेति तमापुष्पाणिदत्वामूले
ग्रंथंयंवांकुरैः श्रयेन्नग्धोत्क्षिपेत् इत्येवंयोमहादेविनवदुर्गार्चनंचरेत् चैत्रीमासेषमासेवासाध
कोभीष्टसिद्धये तस्यवित्तर्द्धिविभवोधनायुःसंपदासदा अश्वमेधसहस्राणिवाजपेयशतानि
च नवरात्रिदिनार्चायाःकलांनार्हंतिषोडशीं इतिश्रीरुद्रयामलेतंत्रेनवदुर्गाकल्पेनवरात्रि
पूजासंपूर्णासमाप्ताचेति शिवायवोभवीतलेखकपाठकसाधकानामोम् ॥

ॐश्रीगुरवेशिवायोनमः श्रीदेव्युवाच भगवन्सर्ववेत्तात्वंजगतामुपकारक देवातिदेवदे
वेशत्रैलोक्याभयदायक शक्रस्यासुरसंग्रामेमह्यंदत्तोवरस्त्वया तदद्यकृपयाशंभोसंप्रदा
तुंत्वमोभव श्रीभैरवउवाच देविसत्यंवरोदत्तोदेवदानवसंगरे यत्तेमनस्यभीष्टंतत्त्वंवद
स्वसुव्रते श्रीदेव्युवाच भगवन्सर्वधर्मज्ञसकलागमपारग देवदेवीमहादेवीमहात्रिपु
रसुंदरी त्रिकूटाषोडशीदेवीश्रीविद्याब्रह्मरूपिणी तस्याःपंचांगमखिलंसारात्सारोत्तमो

श्री
१२६
126

न्नमं वदशीघ्रंमहादेवयद्यहंप्रीयसीतव श्रीभैरवउवाच लक्षवारसहस्राणिवारितासिपुनः
पुनः देवदेविमहादेविपुनस्त्वंपरिपृच्छसि अद्याहंकृपयादेवितवप्रीत्यामहेश्वरि महात्रिपु
रसुंदर्याःपंचांगंतद्ब्रवीम्यहं श्रीविद्यात्रिपुरादेवीजगच्चैतन्यरूपिणी त्रिकूटाषोडशीविद्याम
हाश्रीषोडशाक्षरी यादेवदेवीजगतांसृष्टिस्थितिलयात्मिका सामहाषोडशीविद्यामहा
त्रिपुरसुंदरी राज्यंदेयंशिरोदेयंदेयासंपत्सदार्थिने वस्तुपूर्णंगृहंदेयंनदेयाषोडशाक्षरी गो
प्यगोप्यतमाविद्यागुप्ताचशारजन्मनः गुह्यातिगोप्यंगोप्तव्यंसाधकाग्रेनगोपयेत् त्रिपुरेशी
महाविद्याप्रभावसहिताकलौ अवस्थारूपिणीविद्याबालायुवतिप्रौढिका सुंदरीत्रिपुराबा
लाप्रौढापंचदशाक्षरी देवीत्रिकूटाश्रीविद्यामहाश्रीषोडशाक्षरी महाश्रीषोडशाक्षर्याःपंचां
गंवच्मिसादरं महाश्रीषोडशाक्षर्यामंत्रोद्धारंब्रवीम्यहं लक्ष्मीःपरामदनवाग्भवशक्तियुक्ता
तारंचभूतिकमलाकथितापिविद्या शक्त्यादिकंतुविपरीततयातुप्रोक्तः श्रीषोडशाक्षरवि
धिःशुभदोस्तुपूर्णः अस्याःश्रीषोडशाक्षर्याश्यान्यदोषोनजायते मंत्रोत्कीलनदोषोवा
मंत्रसंजीवनस्यच संपुटस्यविनादेविविनाशःस्यात्क्रियातथा गुरुहस्तेनवादेविसाधकस्य

करेणवा पुरश्चर्यां प्रकुर्वीत वर्णलक्षं जपावधि नकदाचित्प्रकुर्वीत स्वहस्तेनच साधकः न
तिथिर्नचनक्षत्रं नोगन्यासस्य संविरणं नवारदोषो नो विघ्नो नशौचे नियमो नच साक्षाद्दस्तत्रु
पायेमंत्रः श्रीषोडशाक्षरः ऋषिः स्याद्दक्षिणामूर्तिः पंक्तिश्छंद उदाहृतः देवताचमयाप्रोक्ता म
हात्रिपुरसुंदरी लक्ष्मीबीजं पराशक्तिः कामराजस्तु कीलकं चतुर्वर्गेतु विद्यायां विनियोगः प्र
कीर्तितः यंत्रोद्धारं प्रवक्ष्यामि सर्वाशापरिपूरकं सर्वसंमोहनं यंत्रं सर्वसिद्धिप्रदायकं बिंदुत्रि
कोणवसुकोणदशारयुग्ममन्वश्रनागदलसंगतषोडशारं वृत्तत्रयंच धरणीसदनत्रयंच श्री
चक्रराज उदितः परदेवतायाः अथध्यानं प्रवक्ष्यामि सर्वतंत्रेषु गोपितं सारं त्रिपुरसुंदर्याः सर्व
स्वं मम पार्वति येन ध्यानेन ब्रह्मांडं कटाहांते विलीयते उद्यत्सहेमरुचिरां रविचंद्रवह्निनेत्रां ध
नुःशरयुतांकुशकामपाशान् रम्यैर्भुजैस्सुदधतीं शिवशक्तिरूपां कामेश्वरीं हृदि भजामि धृतें
दुलेखां इतिध्यानं अनेनध्यानमात्रेण ब्रह्मविष्णुहराः प्रिये ब्रह्मादयः सुरगणा जातानिस्पं
दचक्षुषः कथयाम्यद्य देवेशि स्तंभनादिविधिं परं यं विधाय महेशानि साधको योगवान् भ
वेत् स्तंभने मोहने चैव मारणाकर्षणे तथा वशीकारोच्चाटने च शांतिके पौष्टिके तथा सां

श्री
१२२ तानिकं मौक्तिकंच प्रयोगा दशा कीर्तिताः स्तंभनं रविवारे तु स्नात्वा जप्त्वा मन्त्रं प्रिये यस्योच्चार्य
भवेन्नृणां स्तंभनं त्वरितं कलौ तारं रमां परां तारं कूटत्रयमुदीरयेत् तारं परां रमां तारं फट् स्तंभ
नकरो स्त्ययं गतेः सूर्यस्य चंद्रस्य वह्निवातादिपाथसां विषसैन्यादिदस्यूनां स्तंभनं जायते
127 ध्रुवं इति स्तंभनं रवौ स्नात्वा नदीतीरे जपेन्मूलं महेश्वरि यस्योच्चारणमात्रेण मोदमेष्यति
भैरवः तारं कामः शरस्तारं कूटत्रयमतः परं शरतकामं पुनस्तारं फट् मोहनमन्त्रः स्मृतः प्रका
शः ॐ क्लीं सौः ॐ कएईलह्रीं हसकहलह्रीं सकलह्रीं सौः क्लीं ॐ फट् देवानांच नरेशानां स्त्री
णामप्सरसां तथा सद्यो दर्शनमात्रेण मोहनं जायते ध्रुवं इति मोहनं रवौ श्मशाने मन्त्रमाज
पेत्त्वा महेश्वरि आनीय भस्ममुष्टिं च क्षिपेच्छत्रुगृहे पथि सप्ताहान्म्रियते शत्रुः साधक
स्य न संशयः तारं कालीं च कूटं च त्रिकूटां पदमुच्चरेत् कूर्चं कालीं तथा तारं फट् मारणमन्त्रः स्मृ
तः ॐ क्रीं श्लूं नृपो वान्यो महत्यो वा विप्रो वा क्षत्रियोऽपि वा शत्रुः कालसमानोऽपि मृत्युमेष्य
ति भैरवि रवौ मन्त्रं जपेत् प्रातः कामी साधकसत्तमः रंभाद्यप्सरसो देवि भवेदाकर्षणं तथा तारं
मारं वाग्भवं च कूटत्रयमुदीरयेत् चंद्रं मारं तथा तारं फडाकृष्टिमन्त्रः स्मृतः श्लं अस्योच्चार

णमात्रेण सकृदाकर्षणं भवेत् रंभा स्वर्गस्थिता वापि प्रातः प्रादुर्भविष्यति रवौ मध्याह्नसमये
स्नात्वा मूलं जपेच्छिवे जप्त्वा शीघ्रं वशं याति त्रैलोक्यं सचराचरं तारं परं स्मरं स्तारं कूटत्रयं महे
श्वरि तारं स्मरः परं तारं फट् वशीकारकः स्मृतः मूले अस्योच्चारणमात्रेण देवास्त्वापि महेश्वरि
सद्यः किंकरतां याति किं पुनः क्षुद्रभूमिपः इति वशीकरणं रवौ गत्वा श्मशाने तु जपेन्मंत्रं म
हेश्वरि यज्जपेन्न भवेच्छत्रोरुच्चाटनमरिंदमे तारं भूर्जे शरत्कामः कूटत्रितयमुच्चरेत् कामः श
क्तिः स्मरं तारं फडुच्चाटनकः स्मृतः मूले दशवारं प्रजप्तेन मंत्रेण परमेश्वरि रिपुमुच्चाटयेद्दे
विशार्दं मोममपि प्रिये इत्युच्चाटनं रवौ जपेन्मंत्रं देवि दशवारं यथाविधि त्रिवारं सर्वरोगा
णां सद्यः शान्तिर्भविष्यति तारं परं स्मरः कामः कूटत्रयं समुच्चरेत् कामः परः शरत्तारं फट् शान्
तिककरः स्मृतः मूलं रोगानामतिदुष्टानां ग्रहाणां ज्वरवंदिते उपद्रवस्य सर्वस्य सद्यः शांति
र्भविष्यति इति शान्तिकं रवौ स्नात्वा जपेन्मूलं दशवारं महेश्वरि पिपासांकितदिनभावेम
हावृष्टिः प्रजायते तारं मारं स्मरं स्तारं कूटत्रयं महेश्वरि तारं स्मरो मारं स्तारं फट् वृष्टिककरः
स्मृतः मूलं दुर्वलानां नराणां च पितृणां च दिवौकसां सकृदुच्चारमात्रेण महावृष्टिः प्रजाय

श्री
१२८

128

ते इतिपौष्टिकं रबीजं जपेन्मनुं देवि साधको देवतागृहे येन जप्तेन वंध्यायामस्तत्पुत्रा स्युरेश्वरि
पुत्रा भवंति भूमीशाः स्वकुलैकप्रदायकाः इति सांतानिकं रबीजं प्रातर्जपेन्मंत्रं तत्वरूपं महेश्व
रि यस्योच्चारणमात्रेण मौक्तिकं जायते ध्रुवं तारं रमां रमां तारं कूटत्रयमुदीरयेत् तारं रमां रमा
तारं फट् मौक्तिककरो स्त्ययं इति मौक्तिकं इदं हि मम सर्वस्वं रहस्यं त्रिदिवौकसां गोप्यं गुह्यत
मं देवि न प्रकाश्यं कदाचन इति दशप्रयोगाः अथुना देवि वक्ष्यामि पूजापटलमीश्वरि श्रीदेव्याः
षोडशार्णायाः पूजां मानसिकीं चरेत् स्तनके मस्तके वापि पद्मे वा कांतरमंडले ^ मनसैव चरेत्पूजां
त्रिकूटायां महेश्वरि स्मरणं त्वं भक्तिभावेन यथावत्तर्पयेत मया उत्थाय शयनाद्देवि ब्राह्मे दिव्यमु
हूर्तके प्रक्षाल्य मुखहस्तादीनाचम्य त्रिर्महेश्वरि प्राणायामत्रयं कृत्वा गुरुं ध्यात्वा सशक्तिकं
देवीं कामेश्वरांकोपविष्टां कामेश्वरीं स्मरेत् ध्यात्वा पूर्वं षडङ्गदीर्घैर्न्यासं कृत्वा यथाविधि जपे
न्मूलं च गायत्रीं गुरवे च समर्पयेत् आगत्य बहिरोंकारं जपन्नारण्यभूमिषु तत्र मूत्रादि संत्यज्य व
र्णी कंपौ च समाचरेत् रमाबीजेन संशोध्य दंतान् स्नापकसत्तमः मायाबीजेन गंडूषत्रयं कुर्यान्म
हेश्वरि मूलेन देवतीर्थानि तदा वाह्य तु सिद्धये ॐ गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे

त्रैकूमौ चकारायां संकटे रणमंडले ^

सिन्धोकावेरिजलेस्मिन्सन्निधिंकुरु इत्यावाह्यमहादेविदेवीमावाहयेत्ततः मूलेनत्रिःसमुत्सृज्यन
द्यंभसिमहेश्वरि ततोमूलंजपेन्मंत्रीगायत्रींचविशेषतः सूर्यायार्घ्यत्रयंदद्याद्देवदेवोक्तमेवच ॐत्रि
पुरेदेविविद्महेआदिकूटसमन्विते कामेश्वरिधीमहिचद्वितीयकूटभूषिते तृतीयकूटंपूर्वंचततःक्लि
न्नाप्रचोदयात् ३ जलादारुह्यवासोसिपरिधाय्यचसाधकः संध्यास्तुमनसाकृत्वाचाघमर्षणपूर्वकं
संध्यांनिवर्त्यदेवेशियागगेहंततोव्रजेत् ततोद्वारार्चनंकृत्वाकुर्यादासनशोधनं भूतशुद्धिंततःकृत्वा
प्राणार्पणंततःविधिं षोडशन्याससभागेनदेहंदेवमयंचरेत् मनसावर्णभागेनकेश्रीचक्रंतत्रभावये
त् विभाव्यतत्रश्रीचक्रंहृदयेसाधकोत्तमः योगपीठंततोभ्यर्च्यहृत्स्थेयेरलवेइति विंदौकामेश्वरां
कोपविष्टांकामेश्वरींभजेत् पात्राणिस्थापयेत्तत्रत्रिकोणेजलनिर्मिते चतुरस्रंमंडलंचविधायग
धकांबुभिः सामान्यार्घ्यत्रिकूटायामंडलेपूजयेच्छिवे चतुरस्रेमंडलेचसमभ्यर्च्याचरेत्ततः ॐअस्त्रा
यफडितिवंसंस्थाप्यात्रत्रिपादिकां तत्रास्त्रक्षालितेशंखंसमभ्यर्च्यतयास्तुधीः तत्रार्कमंडलेदे
विसोमवह्न्योश्चमंडले संपूज्यमूलमंत्रेणकलास्तेषांसमर्चयेत् मूलाष्टमंत्रितेदेविविधायतीर्थ
वारिच तेनापूर्यपिवेशंखंशंखमुद्रांनिवेद्यच तीर्थमावाह्यदेवेशिमुद्रांतत्रैवभावयेत् सा

श्री
१२५
129

मान्यार्घ्यस्य वामेतु शोभितं कलशं शिवे अग्रे चैव षडस्रं च वृत्तं तद्बाह्यमंडलं पुष्पाद्यैः सम
भ्यर्च्य तत्र कूटत्रयेण च षडंगन्यासभागेन समभ्यर्च्य षडस्रकं चतुरस्रे तथाभ्यर्च्य संस्थाप्याथ त्रि
त्रिपादिकां कलाः सूर्येंदुवह्नीनां समभ्यर्च्य यथाविधि कलशेस्मिन्महादेवि देवीं संपूजयेत्स
रां आनंदभैरवं चैव देवि कूटत्रयेण च मायारमाकामबीजैर्धेनुमुद्रां प्रदर्शयेत् मत्स्यमुद्रादिना
च्छादि सामान्यार्घ्यस्य दक्षिणे कलशाद्धि मंडले च विधायास्ये महेश्वरि शक्तिपात्रं समाधाय मूले
नाष्टाभिमंत्रितं तत्रैव प्रोक्षणीपात्रं तथा वटुकपात्रकं गुरुपात्रादिषु तेष्वं तीर्थशंखोदयोप्ययः
पंचाकारेण देवेशि पात्राणि स्थापयेत्ततः पाद्यार्घ्यमधुपर्काचमनीयपात्रपूजनं विधायत
त्र श्रीदेव्या न्यासं षडंगपूर्वकं मणिपूरे ब्रह्मरंध्रे मूलाधारादिके शिवे शिवशक्त्योः सामरस्यं
विभाव्य साधकेश्वरः ततः कामकलारूपं त्रिपुरीकृतविग्रहः शिवशक्त्योः पादुकां च तर्पया
मि नमस्तत समस्थादेवि संतर्प्य ततः कूटत्रयेण च सर्वतत्त्वान्यच्छत्राद्याः पूजनीयाश्च तर्पणैः
समर्पयेत्कुहूंस्तत्र दिशोचादीन्महेश्वरि तत्वत्रयेण चाचम्य शिव एव भवेत्स्वयं श्रीचक्रदेवदे
वीश्च रूपं ध्यात्वा त्रिवर्णकं स्थापनं सन्निधानं च संमुखीकरणं शिवे मुद्राभिः साधकः कु

त्वा देवीस्पृष्टाय श्रद्धया देव्यै देवाय शूलेन प्राणानुदत्वा महेश्वरि शिवशक्त्योः परं रूपं ध्यात्वा पूजां
समाचरेत् तत्रादौ देवदेवयोश्च पाद्यार्घ्यादीन् निवेदयेत् मधुपर्कं निवेद्यापि नैवेद्याचमनीयकं
नानालंकारवस्त्राणि निवेद्य साधकोत्तमः दीपधूपादि संभाव्य परमान्नं निवेद्य च तांबूलं च शुभे दे
दत्वा ह्युच्छृंखलायाश्च तर्पयेत् पुष्पांजलिं च श्रीचक्रे दत्वा पूजां समाचरेत् आदौ कामेश्वरीं नि
त्यां पूजयेद्भगमालिनीं नित्यक्लिन्नां च संपूज्य भेरुंडां च महेश्वरि श्रीवह्निवासिनीं नित्यां महावि
द्येश्वरीं ततः शिवदूतीं महेशानि त्वरितां पूजयेत्ततः श्रीकुलसुंदरीं नित्यां नित्यानित्यां ततः परं
ततो नीलपताकां च विजयां च महेश्वरि श्रीसर्वमंगलां नित्यां ज्वालामालां ततः परं चित्रां नि
त्यां महेशानि त्रिकूटां पूजयेच्छिवे पुनः पुष्पांजलिं दत्वा श्रीविद्याष्टष्टभागके गुरुपंक्तित्रयीं पू
ज्य तर्पणीयाः पृथक् पृथक् गुरुपूजां विधायाथ त्रिपुरां पूजयेत्ततः त्रिपुरां पूजयाम्यद्य तर्पयामि
नम इति तत्रादौ पूजयेद्देवि ऐं क्लीं सौः त्रिपुरीश्वरीं त्रिपुरसुंदरी देवि ततस्त्रिपुरवासिनीं त्रिपुरां
पूजयेन्मंत्री ऐं क्लीं त्रिपुरमालिनीं ह्रीं श्रीं सौः त्रिपुरासिद्धां पूजयेत्त्रिपुरांबिकां पूजयेन्मात्रिको
मंत्रैर्महात्रिपुरसुंदरीं इति श्रीचतुरस्त्रादिवेदवांतेषु पूजयेत् नवचक्रेषु देवेशि नवचक्रेश्वरीं

श्री
१३०
130

पुनः पूजनीयाश्च योगिन्या वामावर्त्तेन पार्वति अणिमाद्यास्तथा सिद्धीः पूजयेत् साधको
त्तमः ब्रह्माद्या मातरः पूज्या रेखोस्व परमेश्वरि सर्वसंक्षोभिणीत्याद्या नवमुद्राः प्रपूजयेत् त
तो मूलेन श्रीविद्यां संतर्प्य परमेश्वरि पुष्पांजलिं च श्रीचक्रे दत्वाष्टदले चर्चयेत् सर्वाशापूर
काया त्रश्रीचक्राय महेश्वरि दद्यात् पुष्पांजलिं दिव्यं ततः संपूजयेच्छिवे ह्रीं श्रीं कामाकर्षि
णी च नित्या कलापदांचिता अं आं बुद्ध्याकर्षिणी च तथा हंकारकर्षिणी ईं ईं शब्दाकर्षिणी च त
था उं स्पर्शाकर्षिणी ऊं रूपाकर्षिणी नित्या ऋं रसाकर्षिणी तथा ॠं गंधाकर्षिणी नित्या लृं चि
त्ताकर्षिणी तथा लॄं धैर्याकर्षिणी नित्या एं स्मृत्याकर्षिणी तथा ऐं नामाकर्षिणी नित्या ओं बीजा
कर्षिणी तथा औं आत्माकर्षिणी नित्या अमृताकर्षिणी तथा अः शरीराकर्षिणी नित्या षोडशा
रे पूजयेत् मूलदेवीं महादेवि संतर्प्य साधकोत्तमः सर्वसंक्षोभके चक्रे दत्वा पुष्पांजलिं ततः
अनंगकुसुमा देवी अनंगमेखलीति च अनंगमदना देवी अनंगमदनातुरा संपूज्यानंगरेखा च
संपूज्यानंगवेगिनी अनंगांकुशा संपूज्य संपूज्यानंगमालिनी संपूज्याष्टदले देवि मूलदेवीं च त
र्पयेत् शिवशक्ती साधकेशः प्रणमेद्योनिमुद्रया इत्येतच्चक्रचितयं ध्यायेच्चंद्रस्वरूपकं सर्व

सौभाग्यदायात्रश्रीचक्राय महेश्वरि दत्वा पुष्पांजलिं मंत्री पूजयेत्साधकोत्तमः सर्वसंक्षोभिणीशा
क्तिः सर्वविद्राविणी तथा श्रीसर्वाकर्षिणीशक्तिः सर्वाह्लादनकारिणी सर्वसंमोहिनीशक्तिः सर्व
स्तंभनकारिणी श्रीसर्वजृंभणीशक्तिः सर्ववशंकरी तथा श्रीसर्वरंजनीशक्तिः सर्वोन्मादनरूपि
णी सर्वार्थसाधनीशक्तिः सर्वसंपत्प्रपूरिणी सर्वमंत्रमयीशक्तिः सर्वद्वंद्वक्षयंकरी संपूज्याः सा
धकैरेता वामावर्तेन पार्वति कामेश्वरीं च संतर्प्य प्रणमेद्योनिमुद्रया सर्वार्थसाधकायाथ चक्रा
य साधकोत्तमः पुष्पांजलिं ततो दद्यात्पूजयेत्सिद्धिदेवताः सर्वसिद्धिप्रदां देवीं सर्वसंपत्प्रदां त
था सर्वप्रियंकरीं देवीं सर्वमंगलकारिणीं सर्वकामप्रदां देवीं सर्वसौभाग्यदायिनीं गेयात्ततः स
मभ्यर्च्य तर्पयेन्मूलदेवतां सर्वरक्षाकरायात्र चक्राय परमेश्वरि दत्वा पुष्पांजलिं देवि पूजयेत्सा
धकोत्तमः ह्रीं श्रीं सर्वज्ञता देवी सर्वशक्तिस्ततः परं सर्वैश्वर्यप्रदा देवी सर्वज्ञानमयी ततः तत
संपूजनीया च सर्वव्याधिविनाशिनी सर्वाधारस्वरूपा च सर्वपापहरा तथा सर्वानंदमयी देवी
सर्वरक्षास्वरूपिणी महादेवी महादेवी सर्वेप्सितफलप्रदा इति गेयात्ततः पूज्या मूलदेवी च तर्प
येत् संतर्प्य सशिवां देवीं प्रणमेद्योनिमुद्रया एतद्द्वितीयचक्रं तु सर्वयंत्रस्वरूपं स्मरेत्ततः सर्वरोगह

श्री

१३।

।३।

रायात्रचक्रायनवरूपिणे दत्वापुष्पांजलिं देवि पूजयेद्देवताष्टकं वशिनीवाग्देवतादौ कामेश्व
रीततःपरं मोहिनीवाग्देवताचपूज्यासर्वेश्वरीप्रिये कौलिनीवाग्देवताचपूज्यास्ताःस्तर्पयाम्य
हं गंधाक्षतप्रसूनाद्यैर्मूलदेवींचतर्पयेत् वामचक्रेणसंपूज्यप्रणमेद्योनिमुद्रया वाग्देवताष्ट
केपूज्यंरक्तपुष्पैर्विशेषतः श्रेतरालायचक्रायदत्वापुष्पांजलिंततः दत्वाधोहस्तकमलेदेव्याः
पश्चिमभागके जृंभणान्कामबाणांश्चवामाधोहस्तभागके मोहनंकामधनुश्चदक्षिणेदे
वितत्करे वशीकारंकामपाशंकामांकुशंचस्तंभनं चतुर्षुकरपद्मेषुपूजयेदायुधानिच स
र्वसिद्धिप्रदायात्रश्रीचक्रायमहेश्वरि दत्वापुष्पांजलिंपूजामारभेत्साधकोत्तमः कामेश्वरींच
वज्रेश्वरींपूजयेद्भगमालिनीं कूटत्रयेणदेवेशि त्रिकोणेसाधकोत्तमः इतिसंपूज्यसंतर्प्यमूलेनमूल
देवतां सर्वानंदमयायात्रश्रीचक्रायसुविंदवे दद्यात्पुष्पांजलिंदेवि साधकःसर्वसिद्धये मूलवि
द्यांसमुच्चार्यसप्तवारंमहेश्वरि पूजयेत्साधकोभक्त्यामहात्रिपुरसुंदरीं इतिसंपूज्यसंतर्प्यगंधा
क्षतप्रसूनकैः धूपदीपादिभिश्चैवनैवेद्यैश्चमहत्तरैः तथाश्रीवटुकायापिदद्याद्बलिमनुत्तमं दत्वा
देव्यैपुनर्देविनैवेद्यान्यमनीयकं तांबूलचामरच्छत्रारात्रिकादीन्निवेदयेत् संक्षोभद्रावणाकृष्टि

वशोन्मादमहांकुशः खेचरीबीजयोन्याख्या नवमुद्राः प्रदर्शयेत् सौभाग्यबीजन्यासेन स्वदेहं व्या
पयेच्छिवे देव्यग्रे च जपं कृत्वा पादं कृत्वा ततः परं वर्मसहस्रेनाम्नां तु स्तोत्रराजस्य पार्वति पाव
शक्त्यो मह्या देवि जपं तत्र समर्पयेत् गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देवि
त्वत्प्रसादान्महेश्वरि गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं देवीं मंत्रमयीं ध्यायेन्मातृकापीठ
रूपिणीं ध्यात्वा न्यासं चरेद्देवि देवदेवं विसर्जयेत् प्रातःप्रभृति सायांतं सायादि प्रातरंततः यत्क
रोमि जगद्योने तदस्तु तव पूजनं संहारमुद्रया देवि देवदेवं विसृज्य च स्वयं सदाशिवो भूत्वा शिवश
क्तिस्वरूपकः त्रैलोक्यं साधको देवि सुखं च विहरेदिति प्रयोगांश्चैव वक्ष्येऽहं मंत्रोपवर्तनेदिनि उपचा
रेव्रवीम्यद्य न चाख्येयं दुरात्मने स्तंभने मोहने चैव मारणाकर्षणे तथा वशीकारं तथोच्चाटं शांति
कं पौष्टिकं तथा एतेषां साधने वक्ष्ये जगतां हितकाम्यया श्रमक्षायनदातव्येन दृष्टव्यं कदाचन रवा
वुत्थाय शयनाद्गत्वा प्रेतगृहे होतिके मूले साधक एवाष्टजपेदयुतसंख्यया होमजातीफलैः पीतैः उ
षैश्च घृतमिश्रकैः शत्रुसैन्यादिदस्यूनां वादिनां स्तंभनं भवेत् इति स्तंभनं सोमे मध्याह्नसमये स्ना
त्वा कूपजलेन तु कूपांतिके मंत्रं जप्त्वा साधको युतसंख्यया होमयेद्घृतमिश्रं च माहिषं दधि शर्करं

भस्मनातिलकंकुर्यान्मोहयेद्भुवनत्रयं इतिमोहनं भौमेर्धरात्रसमयेचतच्छ्मशानगतःसुधीः अयु
तंवाजपेन्मूलंहोमयेद्घृतपायसं रक्तचंदनमिश्रंचस्त्रीकेशैश्चसमन्वितं शत्रुःकालसमानोपि
मृत्युमेष्यतिनान्यथा इतिमारणं बुधेनिशावसानेतुगत्वाशून्यालयंजपेत् अयुतंमूलमंत्रंतुहो
मयेद्घृतशर्करां कर्णिकारसहस्राणिबिल्वयुक्तानिपार्वति रंभाद्यप्सरसोवापिभवेदाकर्षणं
ध्रुवं इत्याकर्षणं गुरौसूर्योदयेगत्वानदीतीरेचसाधकः मूलमंत्रंमहादेव्याजपेदयुतसंख्यया
होमःसर्पिर्दधिक्षीरमल्लिकामालतीयुतैः श्रीफलैःसहसादेविवशयेद्भुवनत्रयं इतिवशीकरणं
शुक्रेनिशामुखेगत्वावटमूलेजपेन्मनुं अयुतंसाधकोभक्त्याहोमकार्यस्तुसर्पिषा दधिद्राक्षावि
मिश्रेणगोमूत्रेणचपायसैः शत्रोर्मित्रस्यदेशस्यस्थानस्यभवत्युच्चाटनंध्रुवं इत्युच्चाटनं शनौप्रभातस
मयेकृत्वाकर्माह्निकंसुधीः आगत्यार्चनशय्यांतुजपेन्मंत्रमयुतंशिवे होमयेत्सर्पिरंभोजस
हस्राणिचतुर्दश ग्रहाणांदेवकोपानांपक्षिणांरक्षसामपि उपद्रवाणांसर्वेषांभयानांनृपतेस्त
क्रूराणामतिदृष्टीनांमहाशांतिःप्रजायते इतिशांतिकं सर्वकार्येषुसर्वत्रजपेन्मंत्रंतथायुतं होम
येत्सर्पिरत्नोटमिश्रंचंदनमिश्रितं पायसंतक्रमिश्रंचमीनमांससमन्वितं देवतानांमनुष्याणां

भोगार्तानां महेश्वरि ब्रह्मादीनां त्वपादीनां महापुष्टिः प्रजायते इति पौष्टिकं इतीदं पटलं गोप्यं प्रय
भोगं महेश्वरि सारं त्रिपुरसुंदर्या रहस्यं स्वपुत्रवत् गुह्यं गुह्यतमं गोप्यं गोपनीयं स्वयोनिवत्
इति श्रीमद्रुद्रयामले तंत्रे भैरवभैरवीसंवादे श्रीमहात्रिपुरसुंदर्याः पटलः समाप्तः ॥

ॐ श्रीगुरुपादुकाभ्यो नमः अथ पुरश्चरणविधिः तत्रादौ भूमौ परिग्रहं कृत्वा पुरश्चरणप्राक्तती
यदिवसे क्षौरादि विधाय विदिक्षु चतुर्दिक्षु कोणं कोणद्वये वा देवं चतुरस्रमाहारादि विहारार्थं प
रिकल्प्य तत्रैव कूर्मचक्रानुसारेण मंडपं विधाय एकभक्तं कुर्यात् ततः परदिने स्नानादिकं विधाय
शुद्धः सन् अश्वत्थोडुंबरप्लक्षाणामन्यतमस्य वितस्तिमात्रान् दशकीलान् वेदिकायां ये चात्र वि
घ्नकर्तारो भुवि दिव्यंतरिक्षगाः विघ्नभूताश्च ये चान्ये मम मंत्रस्य सिद्धिषु मयैतत्कीलितं तेजं परि
त्यज्य विहरंतः अपसर्पंतु ते सर्वे निर्विघ्ना सिद्धिरस्तु मे इत्यनेन ॐ अस्त्राय फडिति मंत्रेण अष्टोत्त
रशताभिमंत्रितान् दशदिक्षु निखन्य तेषु ॐ नमः सुदर्शनास्त्राय फडिति मंत्रेण सूत्रे संपूज्य इंद्रादिलो
कपालान् भूर्भुवः स्वरित्यतो लोकपालाश्च आगच्छंतु इत्यावाह्य पंचोपचारैः पूजयेत् ततो मध्यस्थाने

श्री
१३३

क्षेत्रपालं वास्तोशं संपूज्य सर्वविघ्ननिवारणार्थं गणपतिं पूजयेत् यथा अद्येत्यादि अमुकगोत्रो
ऽमुकदेवशर्माहं कर्तव्याऽमुकपुरश्चरणकर्मणि विघ्ननिरासार्थं गणपतिपूजनमहं करिष्ये इति सं
कल्प्य वेदिमध्ये पंचोपचारैः पूजयेत् ततो मांसभक्तादिना पूजितदेवताभ्यो बलिं दद्यात् ततः ये
रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः मातरोऽप्युग्ररूपाश्च गणाधिपतयश्च ये विघ्नभूतास्तथाचा
न्ये दिग्विदिक्षु समाश्रिताः सर्वे ते प्रीतमनसः प्रीत्या गृह्णन्त्विमं बलिं इत्यनेनाष्टदिक्षु भूतेभ्यो ब
लिं दद्यात् ततो गायत्रीप्रथमं ज्ञाताज्ञातपापक्षयार्थं जपेत् यथा अद्येत्याद्यमुकगोत्रः श्री अमु
कदेवशर्मा ज्ञाताज्ञातपापक्षयकामोऽष्टोत्तरसहस्रं सावित्रीजपमहं करिष्ये ततउपवासं हवि
ष्यं वा कुर्यात् ततः परेदिने उषसि स्नानादिकं विधाय स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् अ
द्येत्यादि अमुकगोत्र अमुकदेवशर्मा अमुकदेवताया अमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्ष
यपूर्वकं तन्मंत्रसिद्धिकामोऽद्यारभ्य यावत्कालेन सिध्यति तावत्कालममुकमंत्रस्य यत्संख्याज
पदशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनरूपपुरश्चरणमहं
करिष्ये इति संकल्प्य भूतशुद्धिं प्राणायामं च कृत्वा स्वस्वमुद्रां बद्ध्वा स्वस्वपद्धत्युक्तक्रमेण

133

देवतां संपूज्य दीपप्रज्वालिते देवतां हृदये कृत्वा प्रातःकालमारभ्य मध्यन्दिनं यावज्जपं कुर्या
त् ततो होमः ततस्तर्पणं श्रीकुलार्णवे तर्पणं ततः कुर्यात्तीर्थोदैर्गन्धमिश्रितैः इतिवचनात्
ततो मार्जनं यथा नमः शूलमुद्राधारी अमुकदेवतां तर्पयामि नमः इति कुंभमुद्रया स्वमूर्ध्नि समभिषि
चेत् ततो ब्राह्मणभोजनं ततो दक्षिणा यथा संकल्प्य अद्य कृतैतदमुकदेवतायाः अमुकमंत्रस्य
पुरश्चरणकर्मणः सांगतार्थं दक्षिणामिमां कांचनमिदं यथानामगोत्राय श्रीगुरवे तुभ्यमहं संप्र
ददे ततो छिद्रावधारणं यच्छिद्रं तपश्छिद्रं यच्छिद्रं यजने मम तत्सर्वमच्छिद्रमस्तु भास्क
रस्य प्रसादतः इति पुरश्चरणविधिः समाप्त इति शिवं ॥

अथ दीक्षाप्रयोगः तत्र शिष्यः पूर्वमुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्या
त् यथा अद्येत्यादितिथ्यंते अमुकगोत्र अमुकदेवशर्मा धर्मार्थकाममोक्षप्राप्तिकाम अमुकदेवता
यामत्कर्तव्याऽमुकमंत्रदीक्षामहं करिष्ये इति संकल्प्य गुरुं वृणुयात् तद्यथा गं साधु भवानास्तां
साधास्ते ॐ अर्चयिष्यामो भवंतं ॐ अर्चय अर्चय ततो गंधपुष्पवस्त्रालंकारादिभिर्गुरुमभ्यर्च्य

श्री
१३४
134

दक्षिणजानुं धृत्वा पठेत् ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्माऽमुकदेवताया मत्कर्तव्याः अ
मुकमेत्रदीक्षाकर्मणि अमुकगोत्रं श्रीमदमुकदेवशर्माणमेभिः पाद्यादिभिरभ्यर्च्य गुरुत्वेन भवं
तमहं वृणे वृतोऽस्मीति गुरुर्वदेत् प्रतिवचनं शिष्यो यथाविहितं कर्म कुरु इति वदेत् यथाज्ञान
तः करवाणीति गुरुः शिष्यस्य प्रतिवचनं ततो गुरुराचम्य द्वारदेशे सामान्यार्घ्यं कृत्वा द्वारं संपूज्य
दीक्षास्थाने प्रविश्य आसनमास्तीर्य तत्रेशाने सिंदूरेण यंत्रं मूलमन्त्रं वा लिखेद्यथा त्रिकोणं
बिन्दुसंयुक्तं षट्कोणं वृत्तमंडलं वसुपत्रं त्रिवृत्तांकं भूपुरद्वेणोपशोभितं दीक्षायंत्रमिदं देवि दी
क्षाकाले प्रपूजयेत् तत्र ॐ ह्रीं श्रीं गणेशाय नमः पूर्वे रँ धर्माय नमः दक्षिणे वरुणाय नमः प
श्चिमे रँ कुवेराय नमः उत्तरे रँ आग्नेय्यामग्नये नमः रँ नैरृतये नमः नैरृते रँ वायव्ये वरुणाय नमः
रँ ईशाने ईशानाय नमः इति भूपुरं संपूज्य षट्कोणेषु वामावर्तेन रँ मायायै नमः रँ मोहिन्यै नमः
रँ मीनायै नमः रँ मंगलायै नमः रँ सर्वमंगलायै नमः रँ महाविद्यायै नमः ततस्त्रिकोणे रँ गंगा
यै नमः रँ यमुनायै नमः रँ सरस्वत्यै नमः ईशानदिग्भागतः प्रपूजयेत् मूलदेवीविदो रँ स
दाशिवाय नमः रँ महारौद्राय नमः रँ कामेशाय नमः रँ कमनेश्वराय नमः ततः अष्टपत्रेषु गामा

वर्तेन ऐं ब्राह्म्यैनमः एवं नारायण्यैनमः कौमार्यैनमः अपराजितायैनमः माहेश्वर्यैनमः चामुण्डा
यैनमः वाराह्यैनमः नारसिंह्यैनमः ततोऽष्टभैरवाः ऐं महाकालायनमः कालाग्नयेनमः कराला
यनमः विकरालायनमः संहारायनमः रुरवेनमः उन्मत्तभैरवायनमः ऐं ईशानायनमः इतियं
त्रमभ्यर्च्यैवं गुरुं प्रपूजयेत् ततोऽग्निकर्मपूर्वकं कुण्डं खनेत् योनिरूपं त्रिकोणमरणिं प्रपूज्य वह्निमा
वाह्य ओं रं रं रं अग्ने वैश्वानर प्रज्वल २ फट् स्वाहा इत्यावाहनं संपूजयेच्च ततआज्यं संस्कृत्य तेनैवाज्ये
नपरामन्त्रेण नाममन्त्रेण वाष्टोत्तरशतं जुहुयात् ततो देवीमावाह्य परां ध्यात्वा शङ्खखेटगुरुरुत्तरा
भिन्नखंशिखं विष्टरशोधनादिकं कुर्यात् इतिकृत्वा ततः शिष्यदेहे भूतशुद्धिं कुर्यात् तद्यथा
मूलाधारादहं सरति कुण्डलिनीं पृथिव्या सह स्वाधिष्ठाने नीत्वा तत्र जले पृथ्वीं लीनां ततस्तां नीत्वा
जले वह्नौ वह्निं वायौ वायुमाकाशे आकाशं मनसि मनो नादे नादं ध्वनौ ध्वनिं विचिन्त्य तत्परमशिवे
लीनं विचिन्त्य यमिति वायुबीजेन पापपुरुषं संशोष्य रमिति वह्निबीजेन संदह्य वमिति वरुण
बीजं शुक्लवर्णं सहस्रारे विचिन्त्य तद्भवामृतेन शरीरमुत्पाद्य ललाटस्थलमिति पृथ्वीबीजेन
पीतवर्णेन स्वदृढीकृत्य सोऽहमिति मन्त्रेण कुण्डलिनी ममृतलोलीभूतां पंचभूतानि जीवात्मानं

श्री १३५ चक्रलपद्येन स्वस्वस्थाने नियोजयेत् ततो देवतारूपमात्मानं विभाव्य शिष्यहृदि हस्तं निधाय
प्राणप्रतिष्ठां कुर्यात् ॐ आं ह्रीं क्रों हंसः अमुकदेवतायाः प्राणा इह प्राणाः जीव इह स्थितः सर्वेन्द्रिया
णि इह स्थितानि वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्रा
णप्रतिष्ठां विधाय प्राणायामत्रयं कारयेत् पुनराचमनत्रयं ततो मूलेन दिशो बद्ध्वा सर्वतोऽग्निप्रा
कारं विचिन्त्य परां ध्यायेत् गुरुः शिष्याय शान्ताय परां प्रीत्यै वह्नेः समक्षं यन्त्राग्रे दक्षकर्णे मूलेन शनैः श
नैः मूलमन्त्रं त्रिः वामे एकवारं समर्पयेत् शिष्योऽपि दक्षिणादिना गुरुं तोषयेत् यथा दरिद्रः काकि
नीं दद्यात् दशग्रामाः स्याताधिपः दशाधिपश्चैकमेव यथाशक्ति प्रदीयते इति शास्त्रोक्तवचनात् त
तो वह्निं समापयेत् इति दीक्षाविधिः स्वल्पप्रकारेण समाप्तमिति शिवं ॥

ॐ श्रीदेव्यै सिद्धिदात्र्यै नमः अथ मालासंस्कारः तत्रादौ संकल्पः अद्येत्यादि तिथ्यन्ते अमुकगो
त्रोऽमुकशर्माहम् अमुकदेवताप्रीतये अमुकमालाशोधनं करिष्ये इति संकल्प्य ह्सौमिति मन्त्रेण
पंचगव्येन संशोध्य अश्वत्थपत्रनवकैः पद्माकारं कल्पयेत् अश्वत्थाभावे न्यपत्रैर्वा तत्र मालां स्था

135

पयेत् ॐ ह्रां गं सद्योजाताय नमः इति शूलमुच्चरन् पंचगव्यैः क्षालयेत् इति सद्योजातेन क्षालयेत्
शुद्धजलैः सद्योजातमिति मूलं वामदेवाय नमः इति चंदनादिगंधैर्निघर्षयेत् ॐ अघोराय इति
धूपयेत् ॐ तत्पुरुषाय नमः इति लेपयेत् ॐ ईशानाय नमः इति मेरुं शतैकं च मंत्रयेत् ततो देवता
मावाह्य प्राणप्रतिष्ठां कृत्वा देवतां पूजयेत् ॐ ह्रीं माले माले महामाले सर्वतत्त्वस्वरूपिणि चतुर्वर्ग
स्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव इति रक्तपुष्पैः संपूजयेत् ॐ ऐं श्रीं मालिकायै नमः इति पूजये
त्पुनः ततो मातृकावर्णैर्मंत्रयेत् ततोष्टोत्तरशतं जप्त्वाष्टोत्तरशतं हुत्वा संपातान्ज्ये निक्षिपेत् हो
माशक्तो द्विगुणो जपः कार्यः ॐ त्वं माता सर्वदेवानां सर्वसिद्धिप्रदा मता तेन सत्येन मे सिद्धिं देहि
मातर्नमोस्तु ते इत्युक्त्वा परिपूज्य गोपयेदिति माला संस्कारः समाप्तमित्योम् ॥ ॥

ॐ श्रीगुरवे श्रीवाग्भवांबिकायै नमः अस्य श्रीमहाषोढान्यासस्य श्रीपरब्रह्म ऋषिः जगती छं
दः श्रीमानर्धनारीश्वरो देवता ह्रं बीजं सः शक्तिः ॐ कीलकं श्रीमहात्रिपुरसुंदर्यंगत्वेन भो
गापवर्गसिद्धये श्रीमहाषोढान्यासे विनियोगः इति कृतांजलिरेवं न्यसेत् ततः करांगुलि षु

श्री
१३६
136

न्यासः ॐ ऐं क्लीं श्रीं ह्सौंः ह्सौंः स्हौंः ईशानायनमः अंगुष्ठयोः ह्रं ह्सैं स्हैं तत्पुरुषाय
नमः तर्जन्योः ह्रं ह्सुं स्हुं अघोरायनमः मध्यमयोः ह्रं ह्सिंः स्हिंः वामदेवायनमः
अनामयोः ह्रं ह्सं स्हं सद्योजातायनमः कनिष्ठयोः ह्रं ह्सौंः स्हौंः ईशानायनमः शिरसि ह्रं ह्सैं स्हैं
तत्पुरुषायनमः मुखे ह्रं ह्सुं स्हुं अघोरायनमः हृदये ह्रं ह्सिं स्हिं वामदेवायनमो लिंगे ह्रं ह्सं स्हं
सद्योजातायनमः पादयोः ह्रं ह्सौं स्हौं ईशानायऊर्ध्ववक्त्रायनमः शिरसि ह्रं ह्सैं स्हैं तत्पुरुषायपू
र्ववक्त्रायनमो मुखे ह्रं ह्सुं स्हुं अघोरायदक्षिणवक्त्रायनमः दक्षिणकर्णे ह्रं ह्सिं स्हिं वामदेवाय
उत्तरवक्त्रायनमः वामकर्णे ह्रं ह्संः स्हंः सद्योजातायपश्चिमवक्त्रायनमः
चोरहृपे इतिवक्त्रपञ्चकन्यासः ॥ ॥
क्रमेणाऽङ्गुष्ठाद्यंऽगुलिभिरेकैकवक्त्रेन्यस्तव्यः ह्रं ह्सौंः स्हौंः अंगुष्ठाभ्यांनमः
ह्रं ह्सीं स्हीं तर्जनीभ्यांस्वाहा ह्रं ह्सूं स्हूं मध्यमाभ्यांवषट् ह्रं ह्सैं स्हैं अनामिका
भ्यांहुं ह्रं ह्सौं स्हौं कनिष्ठिकाभ्यांवौषट् ह्रं ह्सः स्हः करतलपृष्ठाभ्यांफ
ट् इतिकरन्यासः एवंषडंगन्यासः ध्याने अमृतार्णवमध्योद्यत्स्वर्णद्वीपमनोर

मे कल्पवृक्षवनांतःस्थे नवमाणिक्यमंडपे नवरत्नमये श्रीमत्सिंहासनगतांबुजे त्रिकोणां
तःसमासीनेचंद्रसूर्यशतप्रभं अर्धांबिकासमाश्लिष्टं प्रविभक्तविभूषणं कोटिकंदर्पलावण्यं
सदाषोडशवार्षिकं मंदस्मितमुखांभोजं त्रिनेत्रं चंद्रशेखरं दिव्यांबरस्रगालेपं दिव्याभरणभूषि
तं पानपात्रं च चिन्मुद्रां त्रिशूलं पुस्तकं करैः विद्यासंसदि विभ्राणं सदानंदमुखेक्षणं महाषोडो
दिताशेषदेवतागणसेवितं एवं चिंत्यांबुजे ध्यायेदर्धनारीश्वरं शिवं शुद्धरूपं वा स्मरेद्देवि स्त्रीरू
पं वा विचिंतयेत् अथवा निष्कलं ध्यायेत् सच्चिदानंदलक्षणं सर्वतेजोमयं ध्यायेत् सचराचरवि
ग्रहं सहस्रदलपंकजे सकलशीतरश्मिप्रभं वराभयकरांबुजे विमलगंधपुष्पांबरं प्रसन्नवद
नेक्षणं सकलदेवतारूपिणं स्मरेच्छिरसि हंसगं तदभिधानपूर्वं गुरुं इति ध्यात्वा तद्विद्यया त
न्मातृकां शिरसि विन्यस्य तदात्मानं ध्यात्वा न्यसेत् पंचवक्त्रं चतुर्बाहुं सर्वाभरणभूषितं चंद्र
सूर्यसहस्राभं शिवशक्त्यात्मकं भजे इति ध्यात्वा प्रपंचो भुवनो मूर्तिर्मंत्रदेवतमातृकाः महा
षोढाह्वयो न्यासः सर्वन्यासोत्तमोत्तमः अथ प्रपंचन्यासः ॐ ऐं ह्रीं श्रीं ह्सौः स्हौः अप्रपंचरूपा
यै श्रियै नमः शिरसि ईँ आं ह्रीं परूपायै मायायै नमः मुखे ईँ ईं जलादिरूपायै कमलायै नमः

श्री
१३२
137

हँ ईं गिरिरूपायै विल्ववल्लभायै नमः हँ उं पत्तनरूपायै पद्मधारिण्यै नमः हँ ऊं पीठरूपायै स
मुद्रतनयायै नमः हँ ऋं क्षेत्ररूपायै लोकमात्रे नमः हँ ॠं वनरूपायै कमलवासिन्यै नमः
हँ लृं आश्रमरूपायै इंदिरायै नमः हँ ॡं गुहारूपायै महामायायै नमः हँ एं नदीरूपायै रमा
यै नमः हँ ऐं चत्वररूपायै पद्मायै नमः हँ ओं उद्भिजरूपायै नारायणप्रियायै नमः हँ औं स्वे
दजरूपायै सिद्धलक्ष्म्यै नमः हँ अं अंडजरूपायै राज्यलक्ष्म्यै नमः हँ अः जरायुजरूपायै महाल
क्ष्म्यै नमः हँ कं केवलरूपायै आर्यायै नमः हँ खं त्रुटिरूपायै उमायै नमः हँ गं कलारूपायै चंडि
कायै नमः हँ घं काष्ठारूपायै दुर्गायै नमः हँ ङं निमेषरूपायै शिवायै नमः हँ चं श्वासरूपायै
अपर्णायै नमः हँ छं घटिकारूपायै अंबिकायै नमः हँ जं मुहूर्तरूपायै सत्यै नमः हँ झं प्रहर
रूपायै ऐश्वर्यै नमः हँ ञं दिनरूपायै शांभव्यै नमः हँ टं संध्यारूपायै ईशान्यै नमः हँ ठं रात्रिरूपा
यै पार्वत्यै नमः हँ डं तिथिरूपायै सर्वमंगलायै नमः हँ ढं वाररूपायै दाक्षायिण्यै नमः हँ णं न
क्षत्ररूपायै हैमवत्यै नमः हँ तं योगरूपायै महामायायै नमः हँ थं करणरूपायै माहेश्वर्यै नमः
हँ दं पक्षरूपायै मृडान्यै नमः हँ धं मासरूपायै रुद्राण्यै नमः हँ नं राशिरूपायै शर्वाण्यै नमः हँ पं

ऋतत्वरूपायैपरमेश्वर्यैनमः हँ फंअयनरूपायैकाल्यैनमः हँ बंसंवत्सररूपायैकात्यायिन्यैनमः
हँ भंयुगरूपायैगौर्यैनमः हँ मंप्रलयरूपायैभवान्यैनमः हँ यंपंचभूतरूपायैब्राह्म्यैनमः हँ रंपं
चतन्मात्रारूपायैवागीश्वर्यैनमः हँ लंपंचकर्मेंद्रियरूपायैवाण्यैनमः हँ वंपंचज्ञानेंद्रियरूपायै
सावित्र्यैनमः हँ शंपंचप्राणरूपायैसरस्वत्यैनमः हँ षंगुणत्रयरूपायैगायत्र्यैनमः हँ संअंतःक
रणचतुष्टयरूपायैवाग्वरदायैनमः हँ हंअवस्थात्रयरूपायैशारदायैनमः हँ ळंसप्तधातुरूपा
यैभारत्यैनमः हँ क्षंदेहत्रयरूपायैविद्यात्मिकायैनमः इत्येकपंचाशतशक्तीर्मातृकास्थाने
न्यसेत्ततः हँ अंआमित्यादिक्षांतमुच्चार्यसकलप्रपंचादिदेवतायैश्रीपरांबादेव्यैनमः स्हौंःह्सौंः
श्रींह्रींऐंॐइतिव्यापयेत् अथभुवनन्यासः ॐपादयोः हँ अंआंइंअतललोकनिलयशतकोटि
गुह्यादियोगिनीमूलदेवतायुतावारशक्त्यंबादेव्यैनमः गुल्फयोः हँ ईंउंऊंवितललोकनिलय
शतकोटिगुह्यांतरानंतयोगिनीमूलदेवतायुतावारशक्त्यंबादेव्यैनमः जंघयोः हँ ऋंॠंऌंसु
तललोकनिलयशतकोसप्ततिगुह्याचिंत्ययोगिनीमूलदेवतायुतावारशक्त्यंबादेव्यैनमः जान्वोः
हँ ॡंएंऐंमहातललोकनिलयशतकोटिमहागुह्यस्वतंत्रयोगिनीमूलदेवतायुतावारशक्त्यंबादे

श्री
१३८

138

व्यै नमः ऊर्वोः हँ ॐ औं तलातललोकनिलयशतकोटिपरमगुह्येच्छायोगिनीमूलदेवतायुताधा
रशक्तिवा[illegible]तादेव्यै नमः स्फिजोः हँ अं अः रसातललोकनिलयशतकोटिरहस्यज्ञानयोगिनीमू
लदेवतायुताधारशक्तिवायुतादेव्यै नमः मूलाधारे हँ कं खं गं घं ङं पाताललोकनिलयशतकोटि
रहस्योत्तरक्रियायोगिनीमूलदेवतायुताधारशक्तिवायुतादेव्यै नमः स्वाधिष्ठाने हँ चं धं भूलो
कनिलयशतकोटिगुप्तरहस्यडाकिनीयोगिनीमूलदेवतायुताधारशक्तिवायुतादेव्यै नमः म
णिपूरके हँ टं धं भुवोलोकनिलयशतकोटिमहारहस्यराकिनीयोगिनीमूलदेवतायुताधार
शक्तिवायुतादेव्यै नमः अनाहते हँ तं धं स्वर्लोकनिलयशतकोटिमहारहस्यलाकिनीयोगिनी
मूलदेवतायुताधारशक्तिवायुतादेव्यै नमः विशुद्धौ हँ पं धं महोलोकनिलयशतकोटिगुप्तका
किनीयोगिनीमूलदेवतायुताधारशक्तिवायुतादेव्यै नमः आज्ञायां हँ यं धं जनोलोकनिलयश
तकोटिगुप्ततरशाकिनीयोगिनीमूलदेवतायुताधारशक्तिवायुतादेव्यै नमः ललाटे हँ शं धं त
पोलोकनिलयशतकोट्यतिमहागुप्ततरहाकिनीयोगिनीमूलदेवतायुताधारशक्तिवायुतादेव्यै
नमः ब्रह्मरंध्रे हँ लं तः सत्यलोकनिलयशतकोटिमहागुप्तयाकिनीयोगिनीमूलदेवता[illegible]

युताधारशक्त्यै वायुतादेव्यै नमः इति विन्यस्य हँ अं अमितादित्यां तमुद्धार्यचतुर्दशभुवनाधि
पायै श्रीपरावादेव्यै नमः स्हौंः ह्सौंः श्रीं ह्रीं ऐं ॐ इति व्यापयेत् अथ मूर्तिन्यासः शिरसि हँ अं के
शवायाखिलरक्षण्यै नमः मुखे हँ आं नारायणायादिशक्त्यै नमः दक्षांसे हँ इं माधवाय वृष्टिदायै नमः वामांसे
हँ ईं गोविंदाय ईशानायै नमः दक्षपार्श्वे हँ उं विष्णवे उग्रायै नमः वामे हँ ऊं मधुसूदनायोर्ध्वनयना
यै नमः दक्षकक्ष्यां हँ ऋं त्रिविक्रमाय ऋद्ध्यै नमः वामायां हँ ॠं वामनाय स्वरूपिण्यै नमः दक्षोरौ
हँ लृं श्रीधराय गुप्तायै नमः वामे हँ लॄं हृषीकेशाय लूनदोषायै नमः दक्षजानुनि हँ एं पद्मनाभा
य एकनायिकायै नमः वामे हँ ऐं दामोदराय ऐंकारिण्यै नमः दक्षजंघायां हँ ओं वासुदेवाय सरस्व
त्यै नमः वामे हँ औं संकर्षणाय और्विकारायै नमः दक्षपादे हँ अं प्रद्युम्नायाञ्जनप्रभायै नमः वामे
हँ अः अनिरुद्धायास्थिमालाधरायै नमः दक्षपादाग्रादूरुमूलपर्यंतं हँ कं मं भवाय क्रूरमर्द्दायै नमः वा
मादेवं खं वं शर्वाय खगवत्यै नमः दक्षपार्श्वे गं फं रुद्राय गरिमफलप्रदायै नमः वामे घं पं प
शुपतये घोररूपायै नमः दक्षदोर्मूले ङं नं उग्राय पद्मनाभायै नमः वामे चं धं महादेवाय चन्द्रार्ध
धारिण्यै नमः कंठे छं दं यमाय छन्दोमय्यै नमः वदने जं थं ईशानाय जगत्स्थानायै नमः दक्षकर्णे

श्री
१३९

139

फंतंततत्पुरुषाय हां हृत्स्यैनमः वामे अंणंअघोरायज्ञानदायैनमः भाले टंढंसद्योजातायटंक
धारिण्यैनमः शिरसि ठंडंवामदेवायठंकृतिहामयैनमः मूलाधारे यंमंब्रह्मणेयद्विण्यैनमः स्वा
धिष्ठाने रंभंप्रजापतयेरंजिन्यैनमः मणिपूरके लंवेदसेलक्ष्म्यैनमः अनाहते वंपरमेष्ठिनेवज्रिण्यैन
मः विशुद्धौ शंपितामहायशक्तिधारिण्यैनमः आज्ञायां षंविधात्रेषडाधारायैनमः अर्धेंदौ संवि लया
रिंचयेसर्वनायिकायैनमः निरोधिन्यां हंसूक्ष्मेहसिताननायैनमः नादे ळंचतुराननायललितायैन
मः नादांते क्षंः हिरण्यगर्भायक्षमायैनमः इतिविन्यस्य अंआमित्यादिक्षांतमुच्चार्य सकलवि
मूर्त्यात्मिकायैश्रीपरावादेव्यैनमः स्हौंः हसौंः श्रीं ह्रीं ऐं ॐ इतिव्यापकंकुर्यात् अथमंत्रन्यासः
मूलाधारे हं अंआं इं एकलक्षकोटिभेदप्रणवाद्येकाक्षरात्मिकाखिलमंत्राधिदेवतायैसकल
फलप्रदायैएककूटेश्वर्यैवादेव्यैनमः स्वाधिष्ठाने हं ईं उं ऊं द्विलक्षकोटिभेदहंसादिद्व्यक्षरात्मि
काखिलमंत्राधिदेवतायैसकलफलप्रदायैद्विकूटेश्वर्यैवादेव्यैनमः मणिपूरके हं ऋं ॠं लृं त्रिलक्षको
टिभेदवह्न्यादित्र्यक्षरात्मिकाखिलमंत्राधिदेवतायैसकलफलप्रदायैत्रिकूटेश्वर्यैवादेव्यैनमः
अनाहते हं ॡं एं ऐं चतुर्लक्षकोटिभेदचंद्रादिचतुरक्षरात्मिकाखिलमंत्राधिदेवतायैसकलफ

लप्रदायैचतुष्कूटेश्वर्यंबादेव्यैनमः विशुद्धौ हँ ॐ औं अं अः पंचलक्षकोटिभेदसद्योदिपंचात्त
रात्मिकाखिलमंत्राधिदेवतायैसकलफलप्रदायैपंचकूटेश्वर्यंबादेव्यैनमः आज्ञायां हँ कं खं
गंषड्लक्षकोटिभेदस्कंदादिषट्तत्त्वात्मिकाखिलमंत्राधिदेवतायैसकलफलप्रदायैषट्कूटेश्व
र्यंबादेव्यैनमः भ्रुवोः हँ घंङंचं सप्तलक्षकोटिभेदगणेशादिसप्ततत्त्वात्मिकाखिलमंत्राधिदे
वतायैसकलफलप्रदायैसप्तकूटेश्वर्यंबादेव्यैनमः भाले हँ छंजंझं अष्टलक्षकोटिभेदवटु
काद्यष्टतत्त्वात्मिकाखिलमंत्राधिदेवतायैसकलफलप्रदायैअष्टकूटेश्वर्यंबादेव्यैनमः बिंदौ हँ ञं
टंठंनवलक्षकोटिभेदब्रह्मादिनवतत्त्वात्मिकाखिलमंत्राधिदेवतायैसकलफलप्रदायैनवकू
टेश्वर्यंबादेव्यैनमः नादे हँ डंढंणं दशलक्षकोटिभेदविष्ण्वादिदशतत्त्वात्मिकाखिलमंत्राधि
देवतायैसकलफलप्रदायैदशकूटेश्वर्यंबादेव्यैनमः नादांते हँ तंथंदं एकादशलक्षकोटिभेद
रुद्रायेकादशतत्त्वात्मिकाखिलमंत्राधिदेवतायैसकलफलप्रदायैएकादशकूटेश्वर्यंबादेव्यैनमः
जिह्वायां हँ धंनंपं द्वादशलक्षकोटिभेदवाण्यादिद्वादशतत्त्वात्मिकाखिलमंत्राधिदेवतायैसक
लफलप्रदायैद्वादशकूटेश्वर्यंबादेव्यैनमः व्यापिकायां हँ फंबंभं त्रयोदशलक्षकोटिभेदत्त

श्री त्म्यादित्रयोदशाक्षरात्मिकाखिलमंत्राधिदेवतायै सकलफलप्रदायै त्रयोदशकूटैश्वर्यै वाग्देव्यै नमः समानस्था
१८. ने हूँ मं यं रं चतुर्दशलक्षकोटिभेदगौर्यादिचतुर्दशाक्षरात्मिकाखिलमंत्राधिदेवतायै सकल
फलप्रदायै चतुर्दशकूटैश्वर्यै वाग्देव्यै नमः उन्मन्यां हूँ लं वं शं पंचदशलक्षकोटिभेददुर्गादि
पंचदशाक्षरात्मिकाखिलमंत्राधिदेवतायै सकलफलप्रदायै पंचदशकूटैश्वर्यै वाग्देव्यै नमः
140 ध्रुवमंडले हूँ षं सं हं लं क्षः षोडशलक्षकोटिभेदत्रिपुरादिषोडशाक्षरात्मिकाखिलमंत्राधि
देवतायै सकलफलप्रदायै षोडशकूटैश्वर्यै वाग्देव्यै नमः इति विन्यस्य हूँ अं आमित्यादितां
तमुच्चार्य सकलमंत्राधिदेवतायै श्रीपरावाग्देव्यै नमः स्हौः ह्सौः श्रीं ह्रीं ऐं ओं व्यापयेत् ॥
अथ दैवतन्यासः दक्षपादे हूँ अं आं सहस्रकोटियोगिनीकुलसेवितायै निवृत्त्यै वाग्देव्यै नमः
वामपादे हूँ इं ईं सहस्रकोटियोगिनीकुलसेवितायै प्रतिष्ठायै वाग्देव्यै नमः दक्षगुल्फे हूँ उं ऊं सहस्रकोटियो
गिनीकुलसेवितायै विद्यायै वाग्देव्यै नमः वामे हूँ ऋं ॠं सहस्रकोटिशाक्तकुलसेवितायै शान्त्यै वाग्दे
व्यै नमः दक्षजंघायां हूँ ऌं ॡं सहस्रकोटिमुनिसेवितायै शान्त्यतीतायै वाग्देव्यै नमः वामायां
हूँ एं ऐं सहस्रकोटिदेवताकुलसेवितायै हृल्लेखायै वाग्देव्यै नमः दक्षजानुनि हूँ ओं औं सहस्रकोटि

रात्नसकुलसेवितायै गगनांबादेव्यै नमः वामे हुँ अंअः सहस्रकोटिविद्याधरकुलसेवितायै
रक्तांबादेव्यै नमः दक्षोरो हुँ कंखं सहस्रकोटिसिद्धकुलसेवितायै महोच्छुष्मांबादेव्यै नमः वा
शक्त्या स्वयं सादरं सेवाद्यनंतसाधनानि विधिना श्रीसद्गुरोराज्ञया जातस्वस्वपुनस्ततस्त
द्विहिते स्थिरासने भूगृहे कुर्यान्मंत्रमुदीरयन्निति महानुष्ठाने हे तो वशी गृहीतस्यास्य मंत्र
स्य पुरश्चरणसिद्धये मयेयं गृह्यते भूमिर्मंत्रोयं सिद्धितामिति मंत्रेण ततो ज्ञात्वाज्ञातपापक्ष
यार्थं सहस्रं पंचकं त्रयं वाष्टोत्तरसहस्रं वा गायत्रीं जपित्वा ब्राह्मणान् भोजनादिनाभ्यर्च्य गुरुं वस्त्रा
दिभिः ततो हविष्यान्नैव भोजनाच्छादनाकुर्यात् उक्तं च सनत्कुमारकल्पे विप्रान्संतर्पयेदन्ना
न्भोजनाच्छादनादिभिः बहुभिर्वस्त्रभूषाभिः प्रणमेद्गुरुमात्मनः आरभेत्ततिजपं पश्चात्तदत्र
ज्ञापुरःसरमिति पूर्वदिनकृत्यं ततो जपारंभदिने स्नानादिकं विधाय दीपस्थाने गत्वासनवि

श्री
१६५
165

धिं च संपाद्य संकल्पं कुर्यात्तस्य यथा अद्येत्यादि पंचांगं स्मृत्वा ऽमुकाऽमुकमंत्रस्य सिद्धिकामोऽमु
कसंख्याजपदशांशहोमतर्पणाभिषेकात्मकपुरश्चरणमहं करिष्ये इति संकल्प्याऽमुकऋषि
रऽमुकछंदः अमुकदेवता पुरश्चरणजपे विनियोगः इत्युक्त्वा ऋष्यादिन्यासान्ध्यानं च कृत्वा
त्वं माले सर्वदेवानां सर्वसिद्धिप्रदा मता तेन सत्येन मे सिद्धिं मातर्देहि नमोऽस्तु ते इति जपमालां
प्रार्थ्य हस्ते कृत्वा देवदेहं भावयन् जपमारभेदिति पुरश्चरणदिवसाऽतिक्रमो न कर्तव्यः जप
स्तु प्रत्यहं न न्यूनानाधिको न त्वरया कार्यः उक्तं च नारदीये नैरंतर्यविधिः प्रोक्तो न दिनं व्यति
लंघयेत् दिवसातिक्रमो तेषां सिद्धिरोधः प्रजायते शनैः रतिस्पष्टं त्वद्रुतं न विलंबितं न न्यूनं ना
तिरिक्तं वा जपं कुर्याद्दिने दिने मध्यादिनावधिश्च उक्तं च चंद्रकायां शिवादींश्च गुरून्नत्वा जपं कु
र्यात्समाहितः उक्तं संख्यामिति प्रातः मध्यदिनावधिमानसः सिद्धिकामानां पुष्टकामे हृणोपाकः
वाचको मारणे चैव प्रशस्तो जप ईरितः प्रायने दर्भशय्यायां शुचिः प्रयतमानसः नैकवासा जपे
न्मंत्रं बहुवस्त्राकुलेन च गोभिलोपि नाद्रवासा जपं कुर्यात् होमे दाने प्रतिग्रहे सर्वे तद्वा त्वसं
विद्यात् बहिर्जानु च यत्कृतं न यदा पादमाक्रम्य तथैव हि यदा करौ न चासमाहितमनः मा न संश्र

हयन्जपन् नैवचंक्रमणंचैवनपार्श्वमवलोकयन् नप्राहृतोनजल्पंश्चनप्रावृतशिरस्तथा अ
शुचिर्दर्शनेउक्तं सनत्कुमारकल्पे जपकालेयदापश्येदशुचिंमंत्रवित्तमः प्राणायामेतदाकु
र्यात्ततःशेषंसमाचरेत् यदाचैवभवेन्मंत्रीस्वयमप्यशुचिस्तनः आचांतःप्रयतोभूत्वातस्यासंपू
र्ववदाचरेत् मौनेनजपंकुर्यात् तदुक्तंआंगिरसः संध्ययोरुभयोर्मध्येभोजनेदंतधावने पितृ
कार्येचदैवेचतथामूत्रपुरीषयोः गुरूणांसन्निधौदानेयागेचैवविशेषतः एषसमाहितोतिष्ठ
न्स्वर्गमाप्नोतिमानवः मौनोपचारप्रायश्चित्ते तदुक्तंयोगांतरे सकृदुच्चरितेशब्देप्रणवंसमु
दीरयेत् प्रोक्तेपरमशब्देपिप्रणवंसकृदुच्चरेत् योगयाज्ञवल्क्यश्च यदिवाकर्मलोपःस्याज्जपा
दिषुकथंचन व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं शाकटायनोपि क्षुतेनिष्ठीवनेचैवदंतो
च्छिष्टेतथानृते पतितानांचसंभाषेदक्षिणंश्रवणंस्पृशेत् अग्निरापश्चवेदाश्चसोमसूर्यानिल
स्तथा सर्वएवहिविप्रस्यकर्णेतिष्ठंतिदक्षिणे अन्यच्च जपश्रांतःस्तुतेध्यायेध्यानश्रांतःस्तुते
जपेत् जपध्यानसमायुक्तोमंत्रीसिद्ध्यतिनान्यथेति अथपुरश्चरणस्वरूपमुच्यते पूजात्रैका
लिकीनित्यंजपस्तर्पणमेवच होमोब्राह्मणभुक्तिश्चपुरश्चरणमुच्यते पंचांगानिमहादेविजप

श्री
१९९

166

होमस्य तर्पणं स्वभक्त्यैकविप्राणामाराधनमथोप्सारि पूर्वैर्यथा दशांशेन पुरश्चरणमुच्यते
सनत्कुमारोपि होमस्यानियतत्वाच्च तर्पयेत्तद्दशांशेन सद्धृतेन पयोम्भसा कुर्याद्दशांशतो होमस्त
तः सिद्धो भवेन्मनुः स्कंधे पूजया विपुले राज्यं अग्निकार्येण संपदा जपेन पापसंशुद्धिर्ध्यानेध्या
नेन मुच्यते वसिष्ठसंहितायां रत्नमात्रे स्थंडिले वा संदीप्ते होमकर्मणि क्रियासारे होमोऽष्ट
दिक्षु प्रागग्रहः प्रागुदकप्रवणो दक्षिणोथवा उदगग्रहः प्रवेशो वा स्थंडिलमतस्य स्थंडिले स्मृतमि
ति वायवीसंहितायां अथाग्निकार्यं वक्ष्यामि कुंडे वा स्थंडिलेपि वा वेद्यामप्यायसे पात्रे मृ
ण्मये वा नवे शुभे स्थंडिले वा प्रकुर्वीत स्वसिद्धिः सितकैः सितैः इति स्थले कुंडे वा स्थंडि
ले वापि कुंडे होमप्रशस्यति होमोक्तविधिनाचैव कुर्याद्धैसाधकोत्तमः कुंडे तु नारदेनोक्तं ह
स्तमात्रं शुभं मतं अथ होमकालः वसंते चैव पूर्वाह्णे मध्याह्ने ग्रीष्म उच्यते अपराह्णे भवेद्वर्षा
प्रारंभे वार्द्धरात्रिके उषे हेमंतके चैव संध्यायां शिशिरः स्मृतः ग्रीष्मे चोच्चाटनं कुर्यात् शमने
प्रावृषे स्तथा शरदि शांतिकं कुर्याद्धेमंते मोहितं क्रूरः शिशिरे मारणं ज्ञेयं वसंते वश्यकर्म
णि बधिरत्वं कर्महोमेन नेत्रत्वं धत्वमाप्नुयात् नासिकायां मनोपीडा शिरो होमो हि सर्वदा

यतः काष्ठं ततः श्रोत्रं यतो धूमो यनासिका यतो ल्पं प्रज्वलन्नेत्रं यतो भस्म ततो शिरः यतः प्रज्वलि
तो वह्निस्तन्मुखं जातवेदसः स्वर्णसिंदूरबालार्ककुंकुमक्षौद्रसन्निभः वह्निवर्णः शुभावहः भेरी
वारीदहस्तीनां ध्वनिर्वह्निः शुभावहः नागपत्राब्जपद्मागपाटलायूथिकानि च गंधो वह्निः शुभावहः का
कस्वरस्वरो वह्निर्यजमानस्य दुःखदः कृष्णे कृष्णगते वर्णे यजमानं विनाशयेत् एवं दुष्टेषु वह्ने
षु प्रायश्चित्तं वदेत् देशिकः मूलेनाज्येन जुहुयात् पंचविंशतिराहुती इति वह्निस्वरूपः अथ होम
द्रव्याणि प्रणवकल्पे पलाशपुष्पहोमेन सर्वज्ञत्वमवाप्नुयात् अश्वत्थस्य समिद्धोमाद्ब्राह्मण्यं स्व
स्थिरं भवेत् दूर्वाहोमादवाप्नोति दीर्घायुष्यं न संशयः अन्नाज्यहोमादाप्नोति पुनः राज्यं द्विजोत्तमः
कन्याकामो लभेत्कन्यां लाजाहोमेन सुव्रतः वैराग्यकामो वैराग्यं लभते घृतहोमतः श्रेयार्थी श्रि
यमाप्नोति बिल्वपत्रस्य होमतः पुत्रकामो लभेत्पुत्रं जीवपुत्रस्य होमतः आरोग्यकामो आरोग्यं ल
भते तिलहोमतः यद्यदिच्छति तत्सर्वं लभते पत्रहोमतः अन्यच्च येषां जपे च होमे च संख्या नोक्ता
महर्षिभिः तेषामष्टसहस्राणि संख्योक्ता जपहोमयोः यस्मिन्स्तु तिगदैनैव मंत्रसंख्या विधीयते
तत्र सर्वत्र मंत्राणां संख्या ह्रद्वियुगे युगे क्रमात् कल्पोक्ता च कृते संख्या त्रेतायां द्विगुणा स्मृतः द्वा

श्री
१६७
167

शेत्रिगुणप्रोक्ताकलौसंख्याचतुर्गुणा स्वाहांतेनैवमंत्रेणहोमकार्यंविजानतः नमोंतेचनमस्का
रोमकारांतेनवैजपः लक्षत्रयंजपेन्मंत्रंततःसिद्धोभवेद्ध्रुवं संन्यासिनांनहोमोस्तिनब्राह्मणस्यतर्प
णं जपमात्रेणसिद्धिस्यात्तर्पणाद्यंविकल्पितमिति तथाचगौतमीमते होमकर्मण्यशक्तानांवि
प्राणांद्विगुणोजपः इतरेषांतुवर्णानांत्रिगुणादिविधीयते कुंभसंभवश्च यद्यदंगंविहीयेततत्सं
ख्याद्विगुणोजपः कर्तव्यःसांगसिद्ध्यर्थंतदशक्तिरमक्षितः इतिकश्चित्प्रत्यहंजपदशांशहोमत
र्पणमार्जनभोजनंकरोति कश्चित्कृतेपूर्वेकरोति तावपिसांप्रदायको ४१ उक्तंचनारदीये स्व
जपस्यदशांशेनहोमंकुर्याद्दिनेदिने अथवालक्षपर्यंतंहोमःकुर्याद्विपश्चितः ४२ अनंतरं होमत
र्पणमार्जनदशांशतःकुर्यात् तत्रवैशंपायनः तर्पणस्यदशांशेननमोंतेमंत्रमुच्यते अभिषिंचेत्स्व
मूर्द्धानंसजलैःकुंभमुद्रया अथहोममुद्राः होमेमुद्रास्मृतास्तिस्रोमृगीहंसीचसूकरी शांतिकेच
मृगीज्ञेयाहंसीपौष्टिककर्मणि सूकरीत्वभिचारेतुकार्यातत्रविद्वत्तमैः सूकरीकरसंकोचीहंसीपु
ष्टिकनिष्ठिका मुक्तौकनिष्ठतर्जन्यौमृगीमुद्राप्रकीर्तिता ४४ अभिचारादिहोमेषुसूकरीकथिताबु
धैः सूकरीपुत्रकामायधनकामायहंसनी मृगीमोक्षप्रकर्तव्या आहुतीःसर्वकामिका इतेयन्मुद्रया

तीतं न तत्सर्वं निष्फलं भवेत् अथ संक्षेपपुरश्चरणविधिः कृष्णाष्टमीं समारभ्य यावत्कृष्णचतु
र्दशी देवं ध्यात्वा जपेन्मंत्रं अयुतानि चतुष्टयं ४० दशांशं होमयेत्पश्चात्तर्पयेदभिषेचयेत् ततः
सिद्धो भवेन्मंत्रश्चाब्रवीत्कुंभसंभवः तद्यथा पूर्वोक्तमासमिथ्यादो अष्टम्यां स्नानादिकं कृत्वा
जपस्थाने आसनविधिं च कृत्वा संकल्पं कुर्यात् अद्येत्यादि अमुकाक्षराऽमुकमंत्रस्य सिद्धिकामा
युतचतुष्टयसंख्याकं जपदशांशहोमतर्पणाभिषेकात्मकं पुरश्चरणमहं करिष्ये तत्राष्टम्यादि
चतुर्दशीपर्यंतं प्रतिदिनं पंचसहस्रं सप्तदशचतुर्दशसंख्याकं चतुर्दश्यां चतुर्दशस्थाने षोडश
संख्याकं जपमहं करिष्ये इति संकल्पः न्यासादिकं कृत्वा जपं कुर्यात् जपांते होमादिकं प्रकारां
तरमुक्तं कल्याणे वे मंत्रीतत्प्रजपेन्मंत्रं मातृकाक्षरसंपुटं क्रमोत्क्रमात्साहस्रं त्रिमासात्सिद्धिर्भ
वेन्मनुः मातृकाजपमात्रेण मंत्राणां कोटिकोटयः सिद्धास्युः न च संदेहो तस्मात्सर्वं तद्भवं
अत्र शतसहस्रेण संख्याव्यवच्छेदकः अष्टोत्तरशतसंख्याजपेत्यर्थः अत्रापि पूर्ववत्प्रायश्चित्ता
दिकं कृत्वा आरंभदिने तद्दिनमारभ्य मासपर्यंतं प्रतिदिनमष्टोत्तरसंख्याकं जपमहं करिष्ये इति सं
कल्पं जपमारभेत् मातृकोच्चारणं सानुस्वारं कुर्यात् अं अः पँ॰ इत्यादि एवं मासपर्यंतं जपं कृत्वा

श्री
१६८

168

मासांतेहोमादिकंकुर्यात् एवंपुरश्चरणंभवति अथवाअन्यत्प्रकारेणपुरश्चरणमुच्यते ग्रहणे
अर्कस्येंदोर्वाशुचिःपूर्वमुपोषितः नद्यांसमुद्रगामिन्यांनाभिमात्रेंभसिस्थितः स्पर्शाद्विमुक्तिपर्यंतं
जपेन्मंत्रंसमाहितः तत्तत्कालेजपित्वाचहोमादिकंसमाचरेत् इतिकुलप्रकाशतंत्रेउक्तं पूर्व
दिनेउपवासमेकभक्तंवाकुर्यात् अन्नैश्चविविधैर्देविपदार्थैःषड्रसान्वितैः सुभोजितेषुविप्रे
षुसर्वंहिसफलंभवेत् सम्यक्सिद्धैकमंत्रस्यपंचांगोपासनेनच सर्वमंत्राश्चसिद्ध्यंतितत्प्रभावा
त्कुलेश्वरि उपदेशस्यसामर्थ्याच्छ्रीगुरोश्चप्रसादतः मंत्रप्रभावभक्त्याचमंत्रसिद्धिप्रजायते
यदृच्छयाश्रुतंमंत्रंछद्मनापिबलेनवा प्रेरितंवात्रगाथादौतज्जप्तंत्वनर्थकृत् पुस्तकेलिखि
तान्मंत्रानालोक्यप्रजपंतिये ब्रह्महत्यासमंतेषांपातकंपरिकीर्तिते स्वप्नोपदिष्टमंत्रस्यनविधिं
चैवनक्रिया उपदिष्टंदेवतांध्यात्वाजपेच्छुभकरंभवेत् आवाह्यदेवतामेकामर्चयेचान्यदेवता
उभयोर्लभतेशापंमंत्रीचंचलमानसः ग्रंथांतरेच निश्चयोत्साहधैर्यैश्चतत्त्वज्ञानस्यदर्शनात्
अल्पाशीत्यक्तसंगश्चषड्भिःमंत्रप्रसिध्यति शिवोपि मंत्रसंहरणेशौचमनेनमंत्रार्थचिंतनं अव
ज्ञत्वमनिर्वेदौजपसिद्धेस्तुहेतवः गुप्तबीजाश्चयेमंत्रानदास्यंतिफलंप्रिये मंत्राश्चैतन्यसहि

ता सर्वसिद्धिकरा मताः चैतन्यरहिता मंत्राः प्रोक्ता वर्णास्तु केवलाः फलं नैव प्रयच्छंति लक्षकोटिजपादपि अथवा देवतारूपं गुरुं ध्यात्वा प्रतोषयेत् तस्य च्छायानुसारी स्यादनन्ययुक्तेन चेतसा गुरुमूलमिदं सर्वं तस्मान्नित्यं गुरुं जपेत् गुरुस्मरणहीनोपि मंत्रसिद्धो न संशयः श्रीभगवानपि संतुष्टो स्ति गुरोर्यस्य तस्य तुष्टं जगत्त्रयं नास्त्यसाध्यं जगत्यत्र तस्य प्रसन्ने गुरौ रोऽभूने सा बुद्धिर्निर्यमैर्यमैश्च विमलाया माधवध्यायिनी सा जिह्वा मस्तव र्षिणी प्रतिपदं यः स्तौति नारायणं चेडालदेहेप्यथ द्विशरीरे ब्रह्मविग्रहे श्रीगुरोः तारतम्येषु स्थितेषु पुरुषोत्तमः ओमवत्सर्वदाव्याप्तः सर्वसंबंधवर्जितः एकरूपो महादेवस्थितः सोहं परात्परः इति यो वेदवेदान्तैः स्तौति वर्णाश्रमी भवेत् इति गुरुस्मरणविधिः समाप्त इति शिवं ॥ ॥

ॐ श्रीगुरवे शिवाय नमः श्रीरस्तु अथ महादेवार्चा तत्र श्रीमान् साधको ब्राह्मे मुहूर्ते चोत्थाय विहिताह्निकः श्मशानार्चनसंभारं हकारपंचकं च गंधादिकं समादाय सानुगः सवीरो रात्रिमुखे वीरभूमिं व्रजेत् तत्र भूमौ सम्प्रपादात्तां भूमिमुत्तरस्य श्मशानवेलां नोल्लंघयेत् तत्र संभारं संस्था

श्री
१६९

169

य स्वहस्तपादौ प्रक्षाल्य त्रिराचम्य प्राणायामत्रयं विधाय पुनराचम्य स्वमूलऋष्यादिकरषडं
गान् विधाय मूलमष्टोत्तरशतं जपेत् यथाशक्ति जपं कृत्वा देवीं सशिवां गुरुं स्वं ध्यात्वा यदिकव
चसहस्रनामस्तवराजान् पाठयेत् तिष्ठन्ति तदा मूलमुच्चरन् सप्तपदमात्रां वेलामुल्लंघ्य श्मशानमंड
लं प्रदक्षिणीकृत्वा प्रविश्य चितां प्रणमेत् यथा ज्वालाकरालवदने कल्पान्तदहनप्रिये
प्राणिप्राणालयोद्भूते चिते मेनुग्रहं कुरु इति चितां नत्वा यथाचारं प्रशस्तान् भूतभैरवान् संपु
ष्टयोर्ध्वत्वा पूजामारभेत् यथा अस्य श्रीश्मशानपूजामंत्रस्य महाकालभैरवऋषिः [शि]
उष्णिक् छंदः [मु] श्रीश्मशानकालिकादेवता [ह्र] ह्रीं बीजं [गु] हूं शक्तिः [ना] क्रीं कीलकं [न] श्रीधर्मार्थका
ममोक्षार्थे श्मशानपूजायां विनियोगः [स] इति कृतांजलिः स्मृत्वा न्यसेत् ऋष्यादिं ॐ क्रामिति
षडंगे यथाशक्ति स्वासनशोधनभूतशुद्धिप्राणप्रतिष्ठान्तर्मातृकाबहिर्मातृकान्यासान्
स्वमूलऋष्यादिकरषडंगन्यासांश्च कृत्वा स्वहृदयकमले मानसोपचारैराराध्य चितायाई
शाने च तत्रस्थां वेदीं विधाय तत्र श्रीचक्रं विलिख्य विभाव्य वा तत्र देवीं विंदौ ध्यात्वा कार
णपूजनादि पात्रस्थापनादिकं विधाय आदौ देवीं पंचोपचारेण संपूज्य नवग्रह श्रीपादुकां पू

जयामिनमः तर्पयामिनमः इतिनवग्रहान्संपूज्य ॐ ह्रीं वटुकायनमः वटुकश्रीपादुकांपूज

यामिनमः तर्पयामिनमः इतिपूर्वेवटुके भूतभैरवान्संपूजयेत् यथा ॐ श्रीमहोग्रायनमः

ॐ श्रीमदालसायैनमः पूर्वे रवि १ ॐ श्रीचित्रांगदायनमः ॐ श्रीचित्रिण्यैनमः उत्तरे चं॰ २

ॐ ह्रीं चंडायनमः ॐ ह्रीं चंड्यैनमः ईशाने भौ॰ ३ ॐ ह्रौंः भास्वतेनमः ॐ ह्रौंः प्रभायैनमः वायव्ये

बु॰ ४ ॐ लोंलोलालायनमः ॐ लोंलोलायैनमः आग्नेये जी॰ ५ ॐ भैं भूतेशायनमः ॐ भैं भूतधा

त्र्यैनमः दक्षिणे शु॰ ६ ॐ क्रीं करालायनमः ॐ क्रीं करालिन्यैनमः नैरृते श॰ ७ ॐ ह्रीं श्रीं

भीमायनमः ॐ ह्रीं श्रीं भीमरूपायैनमः प॰ ८ इतिसृष्टिक्रमपदे संहारपदेतु विपरीतक्रमेण

भीमादिमहोग्रांतं पूजयेत् इति यथाचारक्रमेण गंधादिततपुष्पैः भूतभैरवानभ्यर्च्य पुनर्विंदौ

स्वदेवीं संपूज्य यथाशक्तिजपं कृत्वा श्रीदेव्यैसमर्प्य चिताग्नौदशांशं होमं कृत्वा कवचसहस्र

स्वनामस्तवराजपाठादिकं विधाय तदपिसमर्प्य तत्रवटुकाभिः संतर्प्य देवीं विसृज्य स्व

हृदयानीय नवपात्रवंदनं कुर्यात् इतिमहाश्मशानार्चाविधिः ॥

॥ ॥

श्री
१०.
३६
170

रजस्वलागतभयार्थं

८	१२	१५	१
१४	२	७	१३
३	१७	१०	६
११	५	४	१६

यात्रिभयापनोदार्थं

८	१०	१३	१
१२	२	७	११
३	१५	८	६
९	५	४	१४

संतानार्थं देयं

८	३०	३३	१
३२	२	७	३१
३	३५	२८	६
२९	५	४	३४

वंध्यायास्तजनिताच

८	२४४	२४७	१
२४६	२	७	१४५
३	२४९	२४२	६
२४३	५	४	२४८

षट्शात्ताज्वरगदनाशने

८	२५४	२५७	१
२५६	२	७	२५५
३	२५९	२५२	६
२५३	५	४	२५८

वंदीप्रमोक्षस्य

८	५५४	५५७	१
५५६	२	७	५५५
३	५५९	५५२	६
५५३	५	४	५५८

प्रकृतिवृध्यादिसौभाग्यदा

८	४६९	४७२	१
४७१	२	७	४७०
३	४७४	४६७	६
४६८	५	४	४७३

पनमत्तयंविंशततः

८	९४	९७	१
९६	२	७	९५
३	९९	९२	६
९३	५	४	९८

प्रीतिःकालेन

८	२९	३२	१
३१	२	७	३०
३	३४	२७	६
२८	५	४	३३

स्याद्विसंख्यसहस्रतोरिवलमिदंवण्ण मनोभीष्टदा

८	४४४	४४७	१
४४६	२	७	४४५
३	४४९	४४२	६
४४३	५	४	४४८

सजीवसंतानार्थं

८	४४	४७	१
४६	२	७	४५
३	४९	४२	६
४३	५	४	४८

डाकिनीभयहरं

७	२४	१	२६
२	२५	८	२३
२८	३	२२	५
२१	६	२७	४

ॐ श्रीगुरवे सरस्वतीरूपायै नमः श्रीपार्वत्युवाच नमस्ते देवदेवेश सर्वशास्त्रविशारद विशो
कस्य महायंत्रं वद मे परमेश्वर श्रीईश्वर उवाच शृणु देवि महायंत्रम् अतिगोप्यं च पार्वति विशोकस्य
महायंत्रं ब्रह्मविष्णुशिवात्मकं नवकोष्ठांकितं यंत्रं स्वर्गपातालसिद्धिदं न वक्तुं हान्मयाख्यातं गो
प्यं कर्त्तुं न शक्यते आदौ भूर्जे सिते पत्रे विलिखेद् अष्टगंधके नानारंगैःपिष्टकेण पूजयेद्यंत्रराजकं
कुंकुमागुरुकस्तूरीरक्तचंदनपारतं गोरोचनं च कर्पूरं तगरं चाष्टगंधकं नानापुष्पैः प्रपूजयेत
यंत्रम् अष्टोत्तरशतं अष्टाशीति दिनं देव्याः पूजयित्वा विसर्जयेत् जप्यं सहस्रमेकं च हवनं तद्दशां
शकं क्षीरखंडाज्यमधुना जुहुयाच्चाम्रते शिवे अर्धरात्रस्य समये देवी दृष्ट्वा वरप्रदा सर्वसिद्धीश्व
रः साक्षाज्जायते नात्र संशयः मोहनं स्तंभनाकर्षवशीकरणम् उत्तमं विद्वेषोच्चाटनं चैव मारणं
प्राणदायकं चमत्कारकरं यंत्रं धनधान्यादिसिद्धिदं पुत्रपौत्रादिवृद्धिस्थं त्वं ते शक्तिप्रदं भवेत्
अग्निशत्रुभयं नास्ति राजचौरभयं न हि न शस्त्रबाधते तस्य न भयं देवदानवैः इति विशोककल्पः
समाप्तः ॥







श्री
१२
171

+ + ५ ४ १ ८ + + + + ३ ६ ७ २ + + ३ ६ ७ २ ५ ४ १ ८

ज्ञानंशिवपदंज्ञानंज्ञानंगुरुस्वरूपिणे इच्छार्थज्ञानितत्त्वेषुगुरुसारेशिवापदे ॥
ॐश्रीगुरवेशिवायोनमः ऋषिच्छंदोदेवतानांन्यसेत्तंगलयःस्मृतः चत्वारोमुष्टिरहिता
अंगुष्ठंबीजकीलयोः मुष्टिबद्धमितिशेषः इतिऋष्यादिन्यासः अथकरन्यासः मंत्रा
भिष्टयोःपाण्योःपल्लवांगानिविन्यसेत् अंगुष्ठेनाचरेन्न्यासमन्यांगुलिसमाश्रयात् अंगुष्ठ
विषयेन्यासंतर्जनीशिरसेवहि अथषडंगन्यासविचारः कनिष्ठांगुष्ठरहितैस्त्रिभिस्तुहृदि
विन्यसेत् मध्यमानामिकाभ्यांतुन्यसेच्छिरसिमंत्रवित् शिखांगुष्ठेनविन्यसेद्दशभिःकव
चंन्यसेत् रुद्धैतैर्नेत्रविन्यासंविदध्यात्परमेश्वरि तर्जनीमध्यमाभ्यांतुततोस्त्रंविन्यसेत्प्रिये
अथमातृकामुद्रायथा ललाटेनामिकामध्येविन्यसेन्मुखवृत्तके तर्जनीमध्यमानामावृद्धा
नामाचनेत्रयोः अंगुष्ठंकर्णयोश्चैवकनिष्ठांगुष्ठकौनसोः मध्यास्तिस्रोगंडयोस्तुमध्यमामोष्ठ
योर्न्यसेत् अनामांदंतयोर्न्यस्यमध्यमामुन्नमोगके मुखेनामामध्यमांचहस्तपादेषुपार्श्वयोः
कनिष्ठानामिकामध्यास्तास्तुपृष्ठेचविन्यसेत् ताःसांगुष्ठानाभिदेशेमध्यदेशेचविन्यसेत्
हृदयेचतलेसर्वंअंसयोस्तुककुत्स्थले हृत्पूर्वहस्तपात्कक्षिमूलेषुतलमेवच एतास्तु

मातृकामुद्राक्रमेणपरिकीर्त्तिताः अज्ञात्वाविन्यसेद्यस्तुन्यासास्तस्यात्रस्यनिष्फलाः इति
मातृकामुद्राः अथपरमुद्रायथा दक्षांगुष्ठेणरांगुष्ठंतिस्रामुष्टिर्द्वयेनहि सावकाशं
चैवमुष्टिंकुंभमुद्राविदुर्बुधाः १ त्रिस्थूलाग्नौकरौकृत्वाविन्यस्तावभितोनयेत् अग्निमुद्रेयमा
ख्याताबहिःप्राकारलक्षणा २ मुष्टिंकृत्वाचरेन्मंत्रीतर्जनींदंडवत्तथा सौभाग्यदंडिनीनाम
रिपून्दंडयतीक्षणात् ३ अंगुष्ठंमुष्टिगंकुर्यादिग्जिह्वाग्रहाभवेत् कनिष्ठांगुष्ठकौसक्तौकरयो
रितरेतरे ४ तर्जनीमध्यमानामासंहितामुग्रवर्जिता मुद्रैषागालिनीप्रोक्ताशंखस्योपरि
चालिता ५ वामांगुष्ठंतुसंगृह्यदक्षिणेनतुमुष्टिना कृत्वोत्तानांततोंगुष्ठमंगुष्ठंतुप्रसारयेत्
वामांगुलितथाश्लिष्टाःसंयुक्ताःसंप्रसारिताः दक्षिणांगुष्ठसंस्पृष्टामुद्रैषाशंखसंज्ञिता ७
अथोमुखेवामहस्तेतादृशेदक्षहस्तकं विन्यस्यांगुष्ठयुग्मंतुपार्श्वयोःसंप्रसार्यच ८ दर्शये
दर्घ्यपात्रेषुमत्स्यमुद्रेयमीरिता ७ अंगुल्यनामतर्जन्योर्मध्येनखेनिष्ठाग्रयोगतः मुद्रेयंत्रिशिखा
प्रोक्ताइतिलक्षणसंग्रहे ८ हस्ताभ्यामंजलिंबद्ध्वानामिकामूलपर्वतः अंगुष्ठौनिक्षिपेत्से
यंमुद्रात्वावाहिनीस्मृता ९ अधोमुखीत्वियंचेत्स्यात्स्थापनीयंनिगद्यते १० उच्छ्रितांगुष्ठ

श्री
१२२
172

मुष्ट्योस्तु संयोगात्सन्निधायिनी अंतःप्रवेशितांगुष्ठा सैव संरोधिनी मता उत्तानेमुष्टियुग
लं संमुखीकरणी भवेत् देवतांगेषु षडंगानां न्यासः स्यात् सकलीकृतिः ५ सव्यहस्तकृतिमु
ष्टिर्दीर्घायो मुखे तर्जनी अवगुंठनमुद्रेयमभितो भ्रामिता मता १६ अन्योन्याभिमुखाश्लिष्टाक
निष्ठानामिकाः पुनः तथैव तर्जनीमध्याये तु मुद्रेयमीरिता अमृतीकरणे कुर्यात्तथा साधकस
त्तमः १७ अन्योन्यग्रथितांगुष्ठाप्रसारितपरांगुलिः महामुद्रेयमुदिता परमीकरणे प्रिये १८
प्रयोजयेदिमा मुद्रा देवताह्वानकर्मणि १८ पुटांजलिकरौ कृत्वा व्यत्यस्य तदनामिके तत्र वे
तर्जनीप्रस्ते त्रिखंडा ललिता वरा १९ वेचर्यां वक्ष्यमाणायां मध्यमे करपृष्ठगे तर्जन्यौ ऋजु
संश्लिष्टे मुद्रा प्रोक्ता नमस्कृतौ २० कनिष्ठानामिकामध्या न वै रन्योन्यसंगताः कृत्वांगुष्ठौ क
निष्ठास्थौ ऋजू कुर्याच्च तर्जनी सर्वसंक्षोभिणी मुद्रा त्रैलोक्यक्षोभकारिणी एतासां मध्यमे द
वितर्जनीवत्कृते तदा सर्वविद्राविणी मुद्रा सर्वासामपि योषितां २२ द्वाभ्यामंकुशरूपाभ्यां सं
श्लिष्टाकर्षिणी मता २३ परिवृत्तांगुलीं कृत्वा न वश्लिष्टतरौ करौ अंगुष्ठौ तर्जनीश्लिष्टौ न वे
रावेशकारिणी २४ करौ द्वौ प्रस्ते कृत्वा विन्यसेत्तत्कनिष्ठके तदग्राश्लेषतोऽग्रे मध्यमे नामिके

ऋज्वी तत्रस्थितौ तर्जन्यौ अङ्गुष्ठौ मध्यमोपरि इयमुन्मादिनी मुद्रा सर्वोन्मादनकारिणी २५ अ
स्यास्त्वनामिके मध्ये तर्जन्यावङ्कुशाकृती एषा महाङ्कुशा मुद्रा सर्वमनाकर्षकारिणी २६ सव्यद
त्तकरौ सम्यक्व्यत्यसेत्कूर्परौ ततः मणिबन्धौ च बध्नीयादंजलिमध्यपृष्ठयोः विधाय मध्ये तर्जन्या
वङ्गुष्ठौ कारयेद्दृढं कनिष्ठानामिके कुर्याद्व्यत्यसेत्करपृष्ठगे इयं सा खेचरी मुद्रा ललिता प्रीतिकारि
णी अस्या विरोचनेनैव सर्वसिद्ध्यन्ति देवताः २७ अस्यामेव च मुद्रायामेषोपरभेद उक्त इति सव्य
दक्षिणदेशेन दक्षिणे सव्यदेशतः बाहुं कृत्वा महादेवि हस्तौ संपरिवर्त्य च कनिष्ठानामिके देवि
युक्ते तेन क्रमेण तु तर्जनीभ्यां समाक्रांते सर्वोर्ध्वमपि मध्यमे अङ्गुष्ठौ तु महेशानि कारयेन्नावपि दृ
ढं इयं सा खेचरी नाम्ना मुद्रा सर्वोत्तमा प्रिये रचितैवं महेशानि सर्वतेजोपहारिणी बद्ध्यैव तया दे
वि दृश्यते साधकोत्तमः योगिनीसर्ववृन्दैस्तु ज्वलत्पावकसन्निभः डाकिनी राकिनीवृन्दैर्लाकि
नी काकिनीगणैः शाकिनी हाकिनीवृन्दैर्दृश्यते परमेश्वरी एतया कृतया देवि योगिनीनां भवेत्
प्रियः अतः समयमुद्रेयं सर्वासां परिकीर्तिता प्रयतोऽप्रयतो वापि शुचौ देशेऽथवाशुचौ उत्थितो वो
पविष्टो वा चक्रमन्निश्चलोऽपि वा उच्छिष्टो वाशुचिर्भूत्वा भुंजानो मैथुने रतः मुद्रयामध्यमो गत्वा

श्री
१७३
173

परिवर्त्तक्रमेणैव पार्थिवस्थानकेयुक्त्यासद्यः खेचरतां व्रजेत् मध्यमामध्यमापार्श्वे कनिष्ठाग्रवि
पर्ययात् अनामिकाव्यत्ययस्तेतर्जन्यावेक्षणाकृती इतरेतरनयोगेणवीजमुद्रेयमीरि २८ कनि
ष्ठांगुष्ठसंश्लेषान्महायोनिस्त्रिखंडका २९ कनिष्ठानामिकामध्याव्यत्यस्ताः पृष्ठतः क्रमात् वलि
तामूर्ध्वयोगेनऋज्वीतर्जनिकौकरौ शक्त्युत्थापनमुद्रेषांजपपूजासमाधिषु मूर्छीकरणमेतस्या
रचनेनसमीरितं ३० वाणकोदंडमुद्रास्यात्ऋज्वंगुष्ठेनमुष्टिना पाशमुद्राचतेनैवतर्जन्यांगु
ष्ठयोगतः ३३ कनिष्ठानामयोःपृष्ठेस्यादंगुष्ठस्तुतर्जनी कुटिलाऋज्वमध्यास्यान्मुद्रास्यादंकुशा
भिधा ३४ लक्षणसंग्रहे हस्तौतसंमुखौकृत्वासंहतावुन्नतांगुली तलांतर्मिलितांगुष्ठौमुद्रेषाप
द्मसंज्ञया ३५ आसनेपद्ममुद्रास्याद्धस्तद्वयमधोमुखं मुद्रेषाकुशलप्रश्नेतदेवोर्ध्वमुखंपुनः
मुद्रास्यात्स्वागतेपाद्यमुद्राचांजलिरुच्यते अनामांगुष्ठयोगात्साप्रोक्ताचार्घ्यस्यमुद्रिका ४०
उत्तानेदक्षिणेहस्तेकृत्वानिम्नतलेसुधीः कनिष्ठहीनासंयुक्ताश्चतस्रोंगुलयउन्नमाः मुद्रेषाच
मनेप्रोक्ताधोमुखीस्यात्वनामया मुष्ट्यंगुष्ठाभवेन्मुद्रामधुपर्केवरानने ४२ अधोमुखीदक्षह
स्तेकृत्वामुष्टिकनिष्ठया वियुक्तास्नानमुद्रेषागदितापरमेश्वरि ४३ उत्तानेदक्षिणेहस्तेकृ

त्वा तन्मध्यमां पुनः अंगुष्ठेन स्पृशेदेषा मुद्रा वस्त्रस्य कीर्तिता ४४ ऐवैषानामिकां स्पृशेन्
मुद्राभूषणसंज्ञका कनिष्ठास्पर्शितो ह्येषा उपचिन्नस्य मुद्रिका ४५ ज्येष्ठाग्रेण कनिष्ठाग्रं स्पृ
शेद्गंधाख्यमुद्रिका अथो मुखे करे कृत्वा तर्जन्यग्रेण योजयेत् अंगुष्ठाग्रेण मुद्रेषा पुष्पाख्या पर
मेश्वरि अंगुष्ठाग्रेण तर्जन्याः स्पृशेदग्रं महेश्वरि धूपमुद्रेण माख्याता सर्वदेवप्रियंकरी ज्येष्ठाग्रे
ण स्पृशेदग्रं मध्यमायाः सुरार्चने दीपमुद्रेयमुदिता सर्वदेवप्रियंकरी प्रेमाग्रं तु स्पृशेद्विज्ये
ष्ठाग्रेण तु देशिकः नैवेद्यमुद्रा कथिता देवानां तृप्तिदायिनी नारदपंचरात्रे विपर्यस्तेन जले कृ
त्वा वामदक्षिणहस्तयोः अंगुष्ठौ ग्रथते श्चैव कनिष्ठानामकोन्तरे चक्रमुद्रेयमुद्दिष्टा सर्वदुः
खनिकृंतनी ५१ ग्रासमुद्रा सव्यहस्ते प्रफुल्लकमलाकृतिः दर्शयेत्पंचवायूनां मन्य हृ
स्तेन नारद कनिष्ठानामिके सम्यगंगुष्ठाग्रेण योजयेत् प्राणमुद्रा समाख्याता प्रथमा मुनिस
त्तम ५२ योजयेत्तर्जनीमध्यमा सपानस्यानमुद्रिका मध्यमानामिके तद्वद्व्यानमुद्रा प्रकीर्तिता
तर्जनीमध्यमानामा तद्वन्मुद्रा तृतीयका सर्वाभिरंगुलीभिश्च पंचमी मुद्रिका मता स्वकीयैर्म
नुभिः पंचमुद्रा वाक्षो प्रकीर्तिता ५३ प्राणसंज्ञस्तथापानो व्यानोदानमनुस्तथा समानोऽङ्गु

श्री
१२४
174

तासर्वेप्रणवाद्याहिवंतिकाः पंचमुद्राभवंतीहभवंतिसुनिसत्तमाः लक्षणसंग्रहे मणिबं
धस्थितौकृत्वाप्रसृतांगुलिकौकरौ कनिष्ठांगुष्ठयुगलेमिलित्वा ततःप्रसारयेत् सप्तजिह्वाख्य
मुद्रेयंप्रियावैश्वानरस्यहि ५८ कुलार्णवे अंगुष्ठानामिकाभ्यांतुवटुकस्यबलिःस्मृतः तर्ज
नीमध्यमानामिकांगुष्ठायोगिनीबलिः अंगुलीभिश्चसर्वाभिरुक्तोभूतबलिःप्रिये अंगुष्ठत
र्जनीभ्यांतुक्षेत्रपालबलिर्भवेत् अंगुष्ठमध्यमाभ्यांतुराजराजेश्वरस्यच इयमेवगणेशस्यब
लिमुद्राप्रकीर्तिता अंगुष्ठमध्यमाभ्यांतुगणेशस्यबलिंहरेत् ६२ इतिज्ञानार्णवात् पति
वाहिन्या हृन्नाभ्यामंगुलीबद्धातर्जन्यौदंडवत्सृजेत् अग्रेवामेततःपृष्ठेदक्षमाकर्षयेच्छनैः
नाराचमुद्रासंप्रोक्तायोज्याबलिविसर्जने अधोमुखेवामहस्तेऊर्ध्वास्यंदक्षहस्तकं कृत्वांगु
लीरंगुलीभिःसंयोज्यपरिवर्जयेत् एषासंहारमुद्रास्याविसर्जनविधौप्रिये वामांगुष्ठेस्तुत
र्जन्यादक्षमुष्ठेस्तुतर्जनी संयोज्यांगुष्ठकाग्राभ्यांतर्जन्याग्रेस्वकेस्पृशेत् एषापाशाख्यामु
द्राकथितापरमेश्वरि ६६ हस्तौतुसंमुखीकृत्यसंलग्नौसंप्रसारितौ अंगुल्यौमध्यमेभूयःसंल
ग्नेसंप्रसारितौ गदामुद्रेयमाख्यातासर्वशत्रुनिवर्हिनी ६७ कृत्वामुष्टिंतुहस्ताभ्यांवामस्योप

रिद्वित्रिणं कुर्यान्मुष्टलमुद्रेयं कथिता परमेश्वरि ९८ ऊर्ध्वस्त्ववामतर्जन्यामधोवक्त्रार्पणं
न्यसेत् तिर्यङ्मध्यमे वेदेषा वज्रमुद्रा महेश्वरि ९९ कनिष्ठानामिकाबद्धा चांगुष्ठेनैव दक्षि
तः श्लिष्टांगुली प्रसृते च संयुक्ते खड्गमुद्रिका इति सौभाग्यरत्नाकरे मुद्राविचारः समाप्तः॥

ॐ श्रीगुरवे शिवायो नमः अथ शिवाबलिप्रकारः तत्र कुत्रचिद्रहःस्थाने श्रीकालीप
द्धत्युक्तक्रमेण सर्वान्पूजां यथाविधि विधाय ऐशान्यां दिशि मण्डले कृत्वा सामान्यार्घ्यप्रो
क्षणीपात्रौ बुनासे प्रोक्ष्य पीठपूजां तत्र कृत्वा गंधाक्षतपुष्पधूपदीपादिनाभ्यर्च्य पृथक्पृथ
क् कुत्रचिदस्रते कस्मिंश्चिन्मांसे कस्मिंश्चिन्मांसमत्स्ये कुत्रचिन्मुद्रा कस्मिंश्चिच्छुष्कमांसा
मिषामोदकादिनि निक्षिप्य कालीकालीति शिवां कालीसमाहूय ह्रीं श्रीं एहि महाकालि बलिं
गृह्ण २ गृह्णापय २ मदीये आलये आगच्छ २ मम कार्यं साधय २ प्रसादं कुरु २ सर्वसिद्धिं
देहि २ स्वाहा गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि शुभाशुभफलं व्यक्तिं ब्रूहि गृह्ण
बलिं मम इति मंत्रं त्रिःपठित्वा ततोऽन्यत्र कुत्रचित्समीपस्थे स्थाने स्वात्मानं रहः स्थित्वा उल्का

श्री
१७५
175

मुखिवेघोररावेगुह्याकाननवासिनि कृपाकुरुमहाभागेनमस्तेचंडिवल्लभे १ संग्रामश्री
लेशावरिप्रावमांसप्रमोदिनि पाहिमांसेकटहरेनमस्तेचितिवासिनि २ फलमूलाशनेदे
विचंडिकेचंडनादिनि भयेभ्योरक्षमांदेविपशुरूपेविराविनि ३ शिशुप्रियेशिवामोदेदिक्
चक्रभ्रमकारिणि शुभाशुभफलंब्रूहिनमस्तेकालिकाप्रिये ४ कालिकापीठनिलयेमांसा
स्थिशोणितप्रिये लेलिह्यमानजिह्वाभिर्नमस्तेतारिणीप्रिये ५ प्रचंडचंडिकेदेविशिवाश्रा
तनिनादिनि चिताश्मलिविल्सांगेनमस्तेचंडचर्चिते ६ मातर्देविनमस्तेस्तु वरदेपापनाशि
नि चिताश्मासितेनित्यंपाहिमांतारिणीप्रिये ७ सदासेतमहृदयेपुनःपुनःविलोकिनि
देहिमेसकलान्कामान्सर्वदेविस्वरूपिणि ८ शिवास्तोत्रमिदंवत्सबलिंदत्वापठेतसकृत्
शिवतस्यभवेत्तुष्टाभीष्टान्कामानवाप्नुयात् एतदज्ञानतोमूढायेजपंतिविमोहिताः तेषां
निंदादिदोषेणदेवताशापमाप्नुयात् १० शिवारूपधरेदेविकामकालिनमोस्तुते उल्कामुखि
ललजिह्वेघोररावेसृगालिनि ११ श्मशानवासिनिप्रेतेशवमांसप्रियेनघे अरण्यचारिणि
शिवेफेरेजंबुकरूपिणि १२ नमोस्तुतेमहामायेजगत्तारिणिकालिके मातंगिकुक्कुटेरौद्रे

कालकालि नमोस्तु ते ३ सर्वसिद्धिप्रदे भीमे भयंकरि भयावहे प्रसन्ना भव देवेशि मम
भक्तस्य कालिके ४ संसारतारिणि जये जय सर्वशुभंकरि विस्रस्तचिकुरे चण्डि चामु
ण्डे मुण्डमालिनि ५ संहारकारिणे क्रुद्धे सर्वसिद्धिं प्रयच्छ मे दुर्गे किरातशवरि प्रेतास
नगते भये ६ अनुग्रहं कुरु सदा कृपया मां विलोकय राज्यं प्रयच्छ विकटे वित्तमायुः सु
तान् स्त्रियं ७ शिवाबलिविधानेन प्रसन्ना भव भैरवि नमस्तेस्तु नमस्तेस्तु नमस्ते
स्तु नमो नमः ८ इत्येतैरष्टभिः श्लोकैः शिवास्तोत्रमुदीरयेत् एह्येहि जगतां मातर्जेन
निगृह्ण गृह्ण इमं सामिषान्नबलिं सिद्धिं देहि देहि शत्रुक्षयं कुरु कुरु ह्रूं ह्रूं ह्रीं ह्रीं हुं फट् स्वाहा
इत्यनेन मन्त्रेण बलिमादौ दद्यात् इति शिवाबलिप्रकारः समाप्तः । कैवल्याय वो भवीतन्तरां
॥ संवत् विक्रमाः १९४१ आषाढवदि ९ बुधौ लिखितं पण्डितकृष्णेन शुभमस्तु सर्वजगतां
यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

॥ -॥०॥- ॥ -॥०॥- ॥

॥ -॥०॥- ॥

श्री
१७६

176

प्रकारांतरेणादंबलिविधानं अथ छागबलिविधानं. ततः बहिरेव पशुं स्नापयित्वा नेत्रबंधपू
र्वकं मंडपमध्ये समानीय मेचाकारस्तंभमध्ये पशुं बंधय बंधय ॐ वरुणपाशेन पशुं बंधय बंधय
इति पिप्पलादिवृक्षोद्भवयज्ञयूपे पट्टडोरादिना पशुं बंधयेत् ॐ छागपशवे नमः इति पादयोः
पाद्यं नमः एवं अर्घ्यं स्वाहा एषोऽर्घः इदमाचमनीयं स्वाहा अपवं इदं स्नानीयं सर्वांगे वाराहीयमु
नागंगाकरतोयासरस्वती कावेरीचंद्रभागा च सिंधुभैरवसागराः अजस्नाने महेशानि सान्निध्य
मिह कल्पय ॐ छागपशवे नमः इदं स्नानीयं ॐ छागपशवे नमः एष गंधः इति शृंगयोः ॐ छा
गपशवे नमः एते अक्षताः ॐ छागपशवे नमः एतानि पुष्पाणि वौषट् एष धूपः अयं दीपः इदं नै
वेद्यं छागपशवे नमः रँ एतदधिपतये अग्नये नमः इति पशुपृष्ठे पुष्पं दद्यात् अद्ये एतत्संप्रदानरू
पाये सांगोपांगाये सायुधाये सवाहनाये सपरिवाराये अष्टकदेवतासहित अष्टकदेव्यै पुष्पं न
मः इति देव्यै पुष्पांजलिं दद्यात् ततो वामहस्तेन छागस्कंधे धृत्वा दक्षहस्तेन कुशादिना ॐ स्त्रीं
पशु हूं फट् स्वाहा इति पाशुपतास्त्रेण त्रिधा संप्रोक्ष्य ॐ वाक्त आप्यायतां ॐ मनस्त आप्यायतां
ॐ चक्षुस्त आप्यायतां ॐ रसना त आप्यायतां ॐ मेढ्रं त आप्यायतां ॐ पुच्छं त आप्यायतां ॐ शृं

गेतश्चाप्यायेतां ॐरोमाणितश्चाप्यायंतां ॐवाचंतेशुंधामि ॐमनस्तेशुंधामि ॐरसनांतेशुं
धामि ॐघ्राणंतेशुंधामि ॐप्राणंतेशुंधामि ॐहस्तौतेशुंधामि ॐपादौतेशुंधामि ॐमङ्गंतेशुं
धामि ॐमांसंतेशुंधामि ॐपायुंतेशुंधामि ॐरुधिरंतेशुंधामि ॐमज्जंतेशुंधामि ॐनाडीस्तेशुं
धामि ॐचक्राणितेशुंधामि ॐरोमाणितेशुंधामि ॐसर्वांगानितेशुंधामि ॐअग्निःपशुरासीत्ते
नायजंत सएतंलोकमयजद्यस्मिन्नग्निःसतेलोकोभविष्यति तंजेष्यसिपिबैतारायः ॐसूर्यः
पशुरासीत्तेनायजंतसएतंलोकमयजद्यस्मिन्सूर्यःसतेलोकोभविष्यति तंजेष्यसिपिबैता
रायः ॐविष्णुःपशुरासीत्तेनायजंतसएतंलोकमयजद्यस्मिन्विष्णुः सतेलोकोभविष्यति
तंजेष्यसिपिबैतारायः ॐरुद्रःपशुरासीत्तेनायजंतसएतंलोकमयजद्यस्मिन्रुद्रः सतेलो
कोभविष्यति तंजेष्यसिपिबैतारायः ॐसद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः भवे
भवेनातिभवेभजस्वमांभवोद्भवायनमः ॐवामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्राय
नमः कालायनमः कलविकरणायनमः बलायनमोबलविकरणायनमः बलप्रमथनाय
नमः सर्वभूतदमनायनमोमनोन्मनायनमः ॐअघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्व

श्री
१७७
177

शर्वेभ्यो नमस्तेस्तु रुद्ररूपेभ्यः ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्
ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मेस्तु सदाशि
वो ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋत
जा अद्रिजा ऋतं बृहत् ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्र
मणेष्वधिक्षियंति भुवनानि विश्वा ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्यो
र्मुक्षीय मामृतात् ॐ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततं तद्विप्रासो वि
पन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं पदं ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु
आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते गर्भं देहि सिनीवालि गर्भं देहि सरस्वति गर्भं ते अश्विनौ
देवावाधत्तां पुष्करस्रजौ ॐ आपो हिष्ठा मयो भुवस्ता न ऊर्जे दधातन महेरणाय चक्षसे यो वः शिव
तमो रसः तस्य भाजयतेह नः उशतीरिव मातरः तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आ
पो जनयथा च नः ॐ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनी स्थो वरुणस्य ऋतसदन्यसि
वरुणस्य ऋतसदनमसि वरुणऋतसदनमासीद इति संप्रोक्ष्य शूले सांगां सावरणां सायुधां


सवाहनां सपरिवारां अमुकदेवतासहितां अमुकदेवीं त्वां जुष्टं प्रोक्षामि इतिप्रोक्षणं अथांगपू
जा श्रोत्रयोः ॐ दिशे नमः त्वचि ॐ वाताय नमः चक्षुषोः ॐ सूर्याय नमः घ्राणयोः ॐ अश्वि
नीकुमाराभ्यां नमः वाचि ॐ अग्नये नमः मुखे ॐ सरस्वत्यै नमः कंठे ॐ महालक्ष्म्यै नमः हस्तयोः
ॐ इंद्राय नमः पादयोः ॐ उपेंद्राय नमः पायौ ॐ मित्राय नमः उपस्थे ॐ प्रजापतये नमः शिरसि
ॐ चामुंडायै नमः स्कंधे ॐ भद्रकाल्यै नमः पृष्ठे ॐ गंधर्वाय नमः पुच्छे ॐ वीरभद्राय नमः वृष
णयोः ॐ वाराह्यै नमः उदरे ॐ सप्तसमुद्रेभ्यो नमः रुधिरे ॐ ब्रह्मणे नमः मांसे ॐ विष्णवे न
मः वसायां ॐ रुद्राय नमः चक्रेषु ॐ जीवात्मने नमः रोमसु ॐ ओषधीवनस्पतिभ्यो नमः नाडी
षु ॐ गंगायमुनाभ्यां नमः सर्वांगेषु ॐ मरुद्गणेभ्यो नमः इतिपशोरंगपूजा ततः पशोर्दक्षि
कर्णे ॐ पशुपाशाय विद्महे पशुरूपाय धीमहि तन्नः पशुः प्रचोदयात् ॐ हिलि हिलि किलि कि
लि पशुरूपधरायै ह्रीं दुर्गायै वषट् इति पशुकर्णे वारत्रयं पठेत् ॐ नेत्रत्रयाय वौषट् इति नेत्रबंधं
मोचयेत् ततः पुष्पांजलिं गृहीत्वा ॐ यज्ञार्थे पशवः सृष्टाः यज्ञार्थे पशुघातने अतस्त्वां घा
तयिष्यामि तस्माद्यज्ञे वधोऽवधः शिवाय तमिदं पिंडमतस्त्वं शिवतां गतः उद्बुध्यस्व पशो त्वं

श्री
१७८

178

हिनाशिवस्त्वंशिवोसिहि २ पशुरूपंपरित्यज्यत्वंगंधर्वस्वरूपधृक् गौरीरूपंसमासाद्य
ममकल्याणदोभव ३ पशुपाशविमोक्षायहेमकुंडस्थितायच पशवेचनमस्तुभ्यंनमस्ते
बलिरूपिणे ४ छागोयोसिबलिरूपस्त्वमाज्ञायापरयागुरो छेदभेदोद्भवेदुःखेत्वमस्त्वपशुरू
पधृक् ५ इतिबद्धांजलिर्पठेत् ततःसंकल्पः ॐअद्येत्यादिश्रीअमुकदेविप्रीतये अमुकच्छागं
वह्निदेवतंदत्तयज्ञविनाशिन्यै महाघोरायै योगिनीकोटिपरिवृतायै ह्रींभद्रकाल्यैमूले अ
मुकदेवतासहित अमुकदेविंदशवर्षावच्छिन्न छागबलित्वेनाहंघातयिष्ये इतिसंकल्पः
अंगस्फुरणादिकंकारयित्वा ततःखड्गमादाय त्रिकोणवृत्तचतुरस्रात्मके मंडलोपरिताम्रा
दिपात्रेसंस्थाप्यः खड्गंध्यात्वा ॐअष्टबाहुर्महातेजशणमश्रारक्तलोचनः भीमदंष्ट्राकरालस्या
लोलजिह्वाभयानकः ॐखड्गायनमः इतिपाद्यादिभिसंपूज्यः मूलेवागीश्वरीब्रह्माभ्यांनमः
मध्ये श्रीलक्ष्मीनारायणायनमः ॐअग्रे ॐउमामहेश्वरायनमः इतिसंपूज्यः ॐखड्गतीक्ष्ण
छिंधिछिंधिकटकट इतिखड्गमंत्रंत्रिर्जपित्वा ॐअसिर्विशसनश्चैवतीक्ष्णधारोदुरासद
श्रीगर्भोविजयश्चैवधर्मपालनमोस्तुते करवालकृपाणत्वंचंडिकायाकरेस्थितः पशुरक्तप

दानेनचामुण्डाप्रीतिमावह इतिनमस्कृत्य खड्गकारदक्षिणहस्तेनखड्गमुद्रांदर्शयित्वा खड्ग
मादाय ॐकालिकालिमहाकालिकालिकेकालरात्रिके छिंधिछिंधिफट् रुधिरंपिवपिव
मांसंभक्षयभक्षयस्वाहा इतिपशुस्कंधेखड्गंस्पर्शयेत् ततश्छेदकर्तुस्तिलकादिकंकृत्वा
तस्यहस्तेखड्गंदद्यात् ॐवीरायास्त्ररनाशायशक्तिकार्यार्थतत्परः पशुच्छेदत्वयाशीघ्रंवी
रनाथनमोस्तुते इतिप्रणम्य एकघातेनपशुंघातयेत् ततःदेव्यावामभागे



त्रिकोणवृत्तचतुरस्रात्मकोपरिछागमुण्डंसरक्तंस्थाप यित्वा रुधिरामृतेन
देवींतर्पयेत् मूलं ॐकौशिकीरुधिरेणाप्यायतां इतित्रि वारंतर्पयित्वा शेषरु
धिरंस्थापयित्वा ततःछागमुण्डंपूजयेत् ॐदिव्यकपालायनमः ॐरुधिरवदनायनमः ॐसि
द्धायनमः ॐसिद्धगात्रायनमः ॐबीजपुरुषायनमः इतिसंपूज्य प्रदीपवर्त्तिकांगृहीत्वा मूलं
अमुकदेविअमुककपालं गृह्णगृह्णभक्षयभक्षयस्वाहा इतिप्रदीपवर्त्तिकापशुशिरसि
दद्यात् यावच्छीर्षकरोमाणिदीपोदहतिभैरव तावद्वर्षसहस्राणिगौरीलोकंसगच्छति इति
समर्प्य रक्तभागचतुष्टयंकृत्वा ईशाने ॐविदारिकायैनमः अग्नये ॐपापराक्षस्यैनमः नैऋते

श्री ॐपूतनायैनमः वायोः ॐकौशिकैनमः ॐरक्तदंतिकायैस्वाहा इति समर्पयेत् ततः पुष्पां
१७९ जलिंगृहीत्वा ॐमहिषघ्निमहामायेचामुंडेमुंडमालिनि आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तु
ते इतिदेव्यैसमर्प्य कृतयापूजासांगतास्तिद्धये इमानिदत्तानिसमर्पयामिनमः इतिछा
179 गबलिविधानं ॥

ॐ श्रीगुरवे परमशिवाय नमः अथ नैमित्तिकपूजा तत्र दीक्षितः प्राप्तपूर्णाभिषेकः कृतगुरुस्म
रणो नित्यार्चनानिरतो नैमित्तिकार्चनं कुर्यात् तत्र विशेषदिवसेषु क्रियमाणा महापूजा नैमित्ति
कपूजेत्युच्यते विशेषदिवसास्तु तंत्रेषु पर्वत्वेनोक्तानि दिनानि तानि तु गुरुपरमपरमेष्ठिगुरू
णां जन्मवारतिथिनक्षत्राणि स्वजन्मतिथिवारनक्षत्राणि विद्याप्राप्तिदिनं गुरोः त्यदिनमष्ट
मी चतुर्दशी पूर्णिमामावास्या रविसंक्रांतियुगादिदिनानि पुष्यनक्षत्ररविवासरयोर्योगपवीत
गमनदैशिकागमनवीरमहायोगिदर्शनतीर्थगमनव्रतदीक्षायुत्सवदिनानि विशेषक्षेत्रग
मनदेवतादर्शनान्तरत्रितयसंपातदिनानि चान्तरद्वयसंपातदिनानीति एकस्यान्तरस्यादि
ननित्यान्तरत्वेनोदयान्तरत्वेन च दर्शनं यस्मिन् दिने तद्दिनं विशेषपर्वं तेषु दिनेषु नित्यपूजानं
तरं यथाबलं यथाश्रद्धा यथाकालं यथादेशं यथाविभवविस्तरं वित्तशाठ्यरहितो यथोक्तद्रव्यैः
यथागुरूपदेशं शक्तिसामयिकैः सार्धं विशेषपूजां कृत्वा यथाशास्त्रं गुरून्सामयिकांश्च परितो
षयेत् अत्र गुरुपर्वसु गुरुपंक्तिपूजोक्तमानवौघगुरुसंख्योक्तान् साधकान् तत्तन्नाम्ना सर्वोप
चारैः समभ्यर्च्य यथाशक्तिदक्षिणादानादिभिः परितोषयेत् चैत्रादिफाल्गुनांतेषु मासेषु

श्री
१८०
180

द्वादशस्वपूर्णिमास्वविशेषपूजांकुर्यात् तद्यथा तत्रादौचैत्रमासिपूर्णिमायांदमनकैःपूजयेत्
तत्रचैत्रशुक्लत्रयोदश्यांसाधकःकृतनित्यकृत्यःसायंसाधकैःसार्धंदमनकसमीपंगत्वा पूर्वो
क्तचतुष्कल्पलताविद्याभिर्दमनकमभिमंत्र्य स्वासनेसमुपविश्य प्राणायामत्रयऋष्यादिकरष
डंगन्यासांश्चविधाय कामभस्मसमुद्भूतरतिवाष्पजलोद्भव ऋषिगंधर्वदेवादिमोहनीयनमो
स्तुते सांवत्सरिकपूजायाःपरिपूर्णत्वसिद्धये दमनत्वंसमायाहित्वमस्वचनमोस्तुते शिवप्र
सादसंभूतअत्रसन्निहितोभव शिवकार्यंसमुच्छिद्यनेतव्योसिशिवाज्ञया इतिदमनकमामंत्र्य
तत्रकामदेवंरतिंचतत्तन्मंत्रेणवक्ष्यमाणप्रकारेणध्यात्वा संपूज्यगृहमागच्छेत् ततश्चतुर्दश्यांकृ
तनित्यकृत्यःसाधकःसाधकैःसार्धंपुनर्दमनकसमीपंगत्वा स्वमंत्रेणदमनकंसमूलमुत्पाट्यास्त्रेण
वगुंठ्यच्छित्वागृहमानीय अघोरेभ्योंघोरेभ्योंह्रींघोरघोरतरेभ्यःश्रींसर्वतःसर्वसर्वेभ्योनमस्तेरुद्ररूपे
भ्यः ह्रींश्रींइतिमंत्रेणदमनकमभ्युक्ष्य पूजास्थानेकिंचित्पात्रेदमनेननवधाविभज्य मध्येपूर्वादिदि
क्षुसंस्थाप्य तन्मंत्रेणचंदनागुरुकर्पूरकुंकुमादिपंकैःसंलिप्य ह्रंनमः संनमः तंनमः मंनमः
लंनमः वंनमः रंनमः यंनमः क्षुंनमः इतिनवधाविभक्तंदमनंमध्यादिप्रादक्षिण्येनसंपूज्य तथैवा

नेदेश्वरीबीजेननवधाविभक्तेनपूजयेत् ततोसूत्रेणसंरक्ष्यत्रिशूलमुद्रांबद्ध्वा कवचमंत्रेणदमनो
परिभ्रामयेत् ततोनूतनवस्त्रेणाच्छाद्य रहसिदमनंस्थापयेदित्यधिवासनंचतुर्दश्यांरात्रौकुर्या
त् ततःपौर्णमास्यांप्रातःस्नात्वानित्यपूजांनिर्वर्त्य सामयिकैःसार्धंरात्रौस्वस्तिवाचनपुरःसरंद
मनंपूजास्थानमानीय पूर्वेद्युरधिवासनाकरणेचतुर्दश्यांसायंतनेप्रोक्तविधिनादमनमामंत्र्य
वापूर्णिमायामेवदमनमामंत्र्यानीयोक्तविधिनासद्योधिवासनंविधाय पुरतःसिंदूरेणचतुर
स्रहन्नहृयवेष्टितंनवयोनिचक्रंविधाय तस्यनवस्वयोनिषुस्वर्णादिरचितान्नवकलशान् य
वपुंजोपरिदीक्षाप्रकरणेवक्ष्यमाणविधिनामध्ययोनावेवोक्तंवाकुंभंसंस्थाप्य स्वासनपूजादि
पीठपूजांतेप्रागवहितस्यारतःसंक्षेपतोवाकृत्वा पंचायतनक्रमीचेत्गणेशादीन्दमनैःसंपूज्य
स्वदक्षिणभागेसर्वतोभद्रमंडलेवक्ष्यमाणप्रकारेणकृत्वा तदशक्तौअष्टदलकमलंवासिंदूरादि
नाकृत्वा तन्मध्येअशोकतरुंपंचवर्णैरजोभिरापूर्य अशोकायनमस्तुभ्यंकामस्त्रीशोकनाश
न शोकार्तिंहरमेनित्यमानंदंजनयस्वमे इत्यशोकतरुंप्रार्थ्याशोकायनमइत्यशोकतरुं
संपूज्य यस्मादिप्रलयांतोयःकालरूपोमहाबलः कलयत्यपिविश्वंयस्तस्मैकालात्मनेन

श्री
१८१
181

मः इति कालं च संपूज्य अशोकतरोरधस्त्रिकोणमंडले मंडूकादिपरतत्त्वांतं योगपीठं संपूज्य अ
ष्टदलकेसरेषु स्वाग्रादिप्रादक्षिण्येन ॐ सौभाग्यै नमः हर्षायै नमः वर्षायै नमः ॥ तत्र बिंदुत्रिकोण
गर्भमष्टदलकमलं चतुरस्रेण वेष्टितं पूजामंडलं कृत्वा ॥ १ धृत्यै नमः श्रांत्यै नमः प्रीत्यै नमः संगमा
यै नमः निर्वाणायै नमः कामुकायै नमः इति मध्यांते संपूज्य ह्रीं सर्वशक्तिकमलासनाय नमः
इति समस्तपीठं संपूज्य ॥ २ तत्र ॐ कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोऽनंगः प्रचोदयात्
इति कामगायत्र्या कामदेवमावाह्यावाहनादिप्राणप्रतिष्ठांते पाशांकुशधनुर्बाणमुद्राः प्रदर्श्य
कामदेवं तरुणमरुणवर्णं रक्तवस्त्राभरणमाल्यानुलेपनं वामदक्षिणयो रतिप्रीतिभ्यां शोभि
तं पुष्पबाणेक्षुधनुर्धरं वसंतसहितं ध्यात्वा ॐ ऐं ह्रीं श्रीं क्लीं कामाय नमः इति मंत्रेण गंधादि
पंचोपचारैः कामदेवं संपूज्य तद्वामभागे रतिं गौरवर्णां सर्वालंकारभूषितां रक्तवस्त्रपरीधानां पद्म
द्वयकरां ध्यात्वा श्रीं श्रीं श्रीं श्रीं क्रों रत्यै नमः इति मंत्रेण रतिं पंचोपचारैः संपूज्य कामस्य दक्षिणभागे
प्रीतिं श्यामवर्णां सर्वालंकारभूषितां रक्तवस्त्रपरीधानां तांबूलकरां ध्यात्वा ध श्रीं श्रीं श्रीं क्रों
प्रीत्यै नमः इति प्रीतिं पंचोपचारैः संपूज्य ततः कामदेवस्याग्रे कदंबवनमध्ये वसंतं गौरवर्णं वा

मद्हस्तेन तथा कुंभं दक्षिणहस्तेन नानापुष्पसमुच्चयं दधानं रक्तवस्त्राभरणभूषितं रक्तमाल्यानु
लेपनं ध्यात्वा वं वसंताय नमः इति मंत्रेण पंचोपचारैः वसंतं संपूज्य पुनर्मध्ये कामदेवं पुष्पांजलि
ना संपूज्याष्टदलकेसरेषु अग्नीशासुरवायव्यमध्ये चतुर्दिक्षु च क्लां हृदयाय नमः क्लीं शिरसे नमः
क्लूं शिखायै नमः क्लैं कवचाय नमः क्लौं नेत्रत्रयाय नमः क्लः अस्त्राय नमः इति षडंगानि संपूज्या
ष्टदलेषु त्वाग्रादि प्रादक्षिण्येन कामाय नमः भस्मशरीराय नमः अनंगाय नमः मन्मथाय नमः
वसंतसखाय नमः स्मराय नमः इक्षुधनुर्धराय नमः पुष्पबाणाय नमः इत्यष्टौ कामान् संपूज्य
बहिश्चतुरस्रे लोकपालांस्तदस्त्राणि च पूजयेत् ततः पुनः कामदेवं तन्मंत्रेण संपूज्य धूपदीपा
दिकं दत्त्वा प्रणम्य कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोनंगः प्रचोदयात् इति काम
गायत्रीं यथाशक्ति जपित्वा समर्प्य नमोस्तु पुष्पबाणाय जगदानंदकारिणे मन्मथाय जगन्नेत्रे
रतिप्रीतिप्रियाय चेति कामदेवं प्रणम्य मूलविद्ययाकर्षणादिकरषडंगन्यासान् कृत्वा मध्ये
कुंभे भगवद्देवीमावाह्य षोडशोपचारैः संपूज्य प्रागवत्तिथिनित्यादिलोकपालांतावरणक्रमेण
दमनैः संपूज्य आवाहितासि देवेशि सद्यः कालेमया शिवे कर्तव्यं तु यथालाभं पूर्णं पर्व त्वदाज्ञ

श्री
१८२
182

या इति विज्ञाप्य देवीं गंधपुष्पादिभिः दमनैः पुनः संपूज्य प्राग्वद्धूपदीपनैवेद्यानि निवेद्य नैमि
त्तिकहोमं नित्यहोमोक्तविधिना संस्कृतेऽग्नौ नित्यहोमद्रव्यैः केवलघृतेन वा नित्यहोमसंख्यात्रिगुणं
हुत्वा प्राग्वद्राजोपचारमहदारात्रिककुमारीसुवासिनीवटुकादिपूजां विधाय सर्वान्भोजनव
स्त्रालंकारदक्षिणाताम्बूलादिभिः परितोष्य स्वगुरुं गोभूहिरण्यवस्त्रालंकारपूजाप्रणतिभिः प
रितोष्य तदभावे तत्सुतज्येष्ठकनिष्ठादीन् अन्यं वा महायोगिनं संपूज्य दक्षिणादानादिभिः प
रितोष्य मूलविद्यां नित्यजपात्त्रिगुणसंख्यं जपित्वा अंगविद्या अपि तथा जपित्वा देव्यै जपसम
र्प्य स्तुत्वा पुनः पुनः प्रणम्य षोडशार्णे जगन्मातर्वाञ्छितार्थफलप्रदे कामानपूरय मे देवि
कामं कामेश्वरेश्वरि इति देवीं प्रार्थ्य पुनः कामदेवं तन्मंत्रेण दमनैः संपूज्य धूपदीपनैवेद्यतां
बूलान्निवेद्य प्राग्वत्स्तुत्वा प्रणम्य कामदेवं सवसंतं विसृज्य पुष्पांजलिमादाय समस्तचक्र
चक्रेशि सर्वविद्याशरीरिणि वेदमातर्ममाभीष्टं पूर्णमस्तु त्वदाज्ञया इति देवीं प्रार्थ्य पुष्पांजलिं
दत्वा प्राग्वद्देवीं विसृज्य श्रीपात्रे चोद्वासनादि प्राग्वद्यथा गुरूपदेशं विधाय शक्तिसामयिका
न्परितोष्य ब्राह्मणान् अपि दक्षिणाभोजनादिभिः परितोषयेदिति दमनपूजाविधिः इयं

दमनपूजा यदि चैत्रपूर्णिमायां न संपद्यते तदा पक्षद्वयस्याष्टमीनवमीचतुर्दशपञ्चन्यतमतिथौ
कार्या चैत्रमासि चेन्न भवेत् तदा वैशाखे ज्येष्ठे वा मासि प्रोक्ततिथिष्वन्यतमतिथौ कुर्यात् अ
थ चैत्रमासि पूर्णिमायामेव तत्कालसंभवैः पुष्पैः सचंदनकर्पूरकुंकुमकल्हारैर्वसंतोत्सवपूजां कु
र्यात् अत्रापि नैमित्तिकपूजायां सर्वत्र पूजाद्रव्याणि पूर्वेद्युर्निशि पवित्रे स्थाने कचित्वावेनि
धाय मूलविद्ययाभ्युक्ष्य मूलविद्यया तद्दिननित्याविद्यया च गंधपुष्पधूपदीपनमस्काराद्यैः
पंचोपचारैरभ्यर्च्याधिवासनं विधाय परेद्युः स्वनित्यक्रमार्चनान्तैः तैः सविशेषं पूजनं कृत्वा
स्वगुरुपूजनं च कुर्यादिति साधारणमधिवासनं पूजनं च सर्वत्र ज्ञेयं नैमित्तिकार्चनं तु सर्वदा
रात्रावेव कार्यं नित्यार्चनं दिवा कुर्याद्रात्रौ नैमित्तिकार्चनं उभयोः काम्यकर्माणि चेति शा
स्त्रस्य निर्णय इति कुलार्णववचनात् अत्र वैशाखे मासि पूर्णिमायां हिमजलैः कर्पूरकस्तूरी
चंदनोन्मिश्रैः शीतलोदकैर्वा प्राग्वदधिवासनपूर्वकं विशेषपूजां कुर्यात् अथ ज्येष्ठे मासि पू
र्णिमायां विशेषपूजां विधाय कदलीपनसाम्रफलैर्महानैवेद्यैर्देवीं परितोष्य गुर्वादिपूजनं
च कुर्यात् आषाढे मासि पूर्णिमायां एलाकक्कोलजातीफलकुंकुमान्वितैश्चंदनैः पूजयेत्

श्री
१८३
183

अथ श्रावणमासि पूर्णिमायां पवित्रारोपणं कुर्यात् अथ श्रावणे मासीत्युपलक्षणं मिथुनसं
क्रमणमारभ्य तुलासंक्रान्तिपर्यन्तं पवित्रोत्सवस्य कालः तिथयस्तूपक्षद्वयेपि चतुर्थ्यष्टमीन
वमीचतुर्दशीपूर्णिमाचेति अत्रोत्तरोत्तरं गौणः कालः पवित्राणि स्वर्णरूप्यताम्रपट्टसूत्रत्रसरी
मयसूत्रदर्भमुञ्जशणसूत्रवल्कलकर्पाससूत्रेष्वन्यतमेन सूत्रेण कुर्यात् कर्पाससूत्रं चेत् सुवा
सिनीभिः कृतं त्रिगुणं त्रिगुणीकृतं नवसूत्रं स्यैकसरत्वेन कल्पितैर्भक्तिसंख्यैः सूत्रैः पवित्राणि
कुर्यात् तत्र षोडशाङ्गुलदैर्घ्याणि षोडशसूत्रैः षोडशग्रन्थियुक्तानि नवाङ्गुलदैर्घ्याणि नवसर
त्नेन वग्रन्थियुक्तानि वा यस्मिन्नावरणे यावत्यः शक्तयस्तत्संख्यं सरत्न ग्रन्थियुक्तानि वा पवि
त्राणि कुर्यात् तत्रावरणशक्तिसंख्याङ्गुलादिपत्रे मूलदेव्याः षोडशाङ्गुलायामादिकं पञ्चदश
नित्यानां पञ्चदशाङ्गुलादिकं वाराहीकुरुकुल्लयोश्च मूलदेव्या इव पवित्राणि कुर्यात् आयुधाना
मष्टाङ्गुलदैर्घ्यं सरं ग्रन्थियुक्तानि गुरुपंक्तित्रयस्य तत्तदाद्योक्तगुरुसंख्याङ्गुलादिकं नवाङ्गु
लादिकं वा पवित्राणि कुर्यात् इत्थं श्रीचक्रे पूज्यदेवतावृन्दसमसंख्यानि पवित्राणि उक्तप
देष्वेकपक्षानुसाराणि कृत्वाष्टोत्तरशतसरत्नं ग्रन्थियुक्तमेकं वितानात् पूजाविष्टरमानदैर्घ्यं

आत्मनः क्रमागमस्तशिष्याणां च स्कंधादिनाभिपर्यंतदैर्घ्यमंगीकृतपक्षानुसारि सद्ग्रंथिक
मन्येषां सामान्ययोगिपक्षीनां एकग्रंथि नवसरतन्तुकृतानि मंडपस्यैकसूत्रेणावेष्टनप्रमाणं ग्रं
थिरहितं पवित्रं कुर्यात् अत्रावरणशक्तिसमसंख्यां तत्वादिपक्षे आत्मनः क्रमस्तशिष्याणां
च मूलदेवीवत् अत्र पवित्रेषु ग्रंथयो वालामंत्रेण कवचमंत्रेण वा कार्याः ग्रंथिषु सूत्रवेष्टने
यथेष्टमेवेति इत्थं पवित्राणि विधाय पवित्रारोपणदिनात् पूर्वदिने साधकः कृतनित्यकृ
त्यो रात्रौ साधकैः सार्धं पवित्राणि पूजास्थानमानीय पवित्रस्थाने सिंहरादिना चतुरस्रवृ
त्तवेष्टितं नवयोनिचक्रं कृत्वा कचित्पात्रे तस्मिन्मंडले पवित्राणि गोरोचनाकुंकुमरक्तचंदन
कस्तूरी कुंकुमकर्पूरपंकैः प्रतिसूत्रमेकैकं लिप्त्वा लाक्षागैरिकाद्यैर्ग्रंथिस्थानेषु विचि
त्रितानि संस्थाप्य कार्पाससूत्रकृतानि चेत् तति चित्राणि तदा तेषां नवसु सूत्रेषु ॐकाराय न
मः चंद्रमसे नमः वह्नये नमः ब्रह्मणे नमः नागाय नमः गुरवे नमः रवये नमः सदाशिवा
य नमः सर्वदेवेभ्यो नमः इति देवताः संपूज्य शिरोमंत्रेणाभिमंत्र्य रुद्रमंत्रेणाभ्युक्ष्यास्त्रमंत्रे
णावकुंठ्य पवित्रेषु मूलविद्यया षडंगैश्च संपूज्य षोडशानित्यांश्च पूजयित्वा तेषु सुगंधकु

श्री
१८४
184

सुमात्किनिक्षिप्य पंचरत्नानि सर्वौषधीश्च निक्षिपेत् पंचरत्नानि तु हीरकमुक्ताफलनील
पद्मरागमरकताख्यानि सर्वौषधयस्तु सर्षपकुष्ठहरिद्रादारुहरिद्रालोध्रमुस्तोशीरप्रियं
गुच्छिलीराख्या ततो नववस्त्रयुगेन छादयेदित्यधिवासनं विधाय पूर्वेद्युः साधकः कृतनि
त्यकृत्यः समयिभिः सार्धं रात्रौ द्वारपूजापूर्वकं पूजास्थाने प्रविश्य पूजामंडपं वितानादिभि
रलंकृत्य पूजाविष्टरादूर्ध्वे वितानात् पूजाविष्टरपर्यंतं शक्त्यावतारारंभं महापवित्रं चालंब
यित्वा आसनपूजादिकां जातं विधाय दमनपूजावत् कुंभस्थापनं कृत्वार्घ्यस्थापनात्म
पूजांतं पीठपूजां विधाय पंचायतनदेवताः संपूज्य पवित्रैः संभाव्य तस्मिन् कुंभे देवीमा॥
वाह्य सर्वोपचारैरभ्यर्च्य नित्यपूजाक्रमेणावरणिमहेंद्रं पवित्रैः संभाव्य तद्देगह्ववने प्राग्वत् कृत्वा
गुरुं संतोष्य तस्मै पवित्रं समर्प्य पूर्णाहुतिं कृत्वा अग्नये पवित्रार्पणं विधाय गुर्वनुज्ञया स्वयमपि प
वित्रधारणं कृत्वा दमनपूजावत् शक्तिसमायिकान् पवित्रदानभोजनताम्बूलदक्षिणादिभिः
परितोष्य जपं विधाय देवीं विसृज्य ब्राह्मणादीन् भोजनभूरिदक्षिणादिभिश्च तोषयेत् षण्ण
नवत्यंगुलायामसरगुंथितमुक्तानि त्रीणि पवित्राणि कृत्वा प्राग्वदधिवासनादि सर्वं कृत्वा तानि
त्रै

देव्यै समर्प्य शेषं समापयेत् इतिपवित्रारोपणविधिः ॥ अथ भाद्रपदे मासि पूर्णिमायां के
तकपुष्पैः साधिवासे विशेषपूजां कुर्यात् आश्वयुजे मासि शुक्लपक्षप्रतिपत्तिथिमारभ्य पूर्णि
मापर्यंतं पंचदशसु तिथिषु प्रत्यहं नित्यपूजानंतरं नैमित्तिकत्वेन चक्रक्रमं रात्रौ संपूज्य प्रतिप
त्तिथिमारभ्यैकादिवृद्ध्या प्रतिपदि शतं द्वितीयायां द्विशतं तृतीयायां त्रिशतमित्यादि जपहोमौ
विधाय पूर्णिमायां तद्दिने पंचदशशतजपानंतरं शतसंख्याकमधिकं जपित्वा होमांते शत
संख्यं होमं कुर्यात् प्रतिपदादितिथिषु एकादिवृद्ध्या पूर्णिमायां षोडशकन्या यथा भवंति तथा क
न्यापूजनं च कुर्यात् तत्र प्रत्यहं प्रातः कन्यकाया निमंत्रणं कृत्वा पूजाजपहोमांते तां सुस्नातां स
मलंकृतां पूजास्थाने सुखासने समुपवेश्य तस्यां प्रागुक्तविधिना देवीमावाह्य संपूज्य वस्त्राल
करणभोजनतांबूलदक्षिणादानादिभिः परितोष्य प्रणम्य विसर्जेत् एवं बहुकन्यापूजनेऽपि प्रत्ये
कं पूजनं कुर्यात् अस्मिन्नेव मासि प्रतिपत्तिथिमारभ्य नवम्यंतासु नवरात्रितिथिषु विशेषपू
जां कृत्वा एकादिवृद्ध्या जपादिकं च विधाय कुमारीपूजनं चैकादिवृद्ध्या कुर्यात् नवरात्रेषु कु
मारीपूजने विशेषः ॥ प्रतिपद्येकवर्षा द्वितीयायां द्विवर्षा एवं नवम्यां नववर्षा कन्या पूज्या

श्री
१८५
185

तत्रापि तिथिकुमारीः पूर्वदिनपूजिताश्च नवम्यामेकवर्षादि नवकुमार्यो यथा भवंति तथा पूज
येत् तासां नामानि तु प्रतिपदि शुद्धा द्वितीयायां ललिता चतुर्थ्यां मालिनी पंचम्यां वसुंधरा ष
ष्ठ्यां सरस्वती सप्तम्यां रमा अष्टम्यां गौरी नवम्यां दुर्गा मंत्रास्तु ऐं ह्रीं श्रीं शुद्धायै नमः ऐं ह्रीं श्रीं ल
लितायै नमः इत्यादिनाममंत्रैः पूजयेत् अथवा नवयौवनसंपन्ना यथोक्तलक्षणाः सुवासिनीर्वा
नवरात्रिषु पूजयेत् तासां नामानि तु हृल्लेखा गगना रक्ता महोच्छुष्मा करालिका इच्छा ज्ञाना
क्रिया दुर्गा चेति अत्रापि मंत्रास्त्रितारांते हृल्लेखायै नमः इत्यादयः अथ पूज्या पूज्य कुमारीणां
लक्षणानि तत्र प्रथमं पूज्यालक्षणानि श्रीकुलार्णवे अरोगिणीं सुपुष्टांगीं सुरूपां व्रणवर्जि
तां एकवंशसमुद्भूतां कन्यां सम्यक् प्रपूजयेत् अथापूज्या कुमारिकालक्षणानि तत्रैव
हीनाधिकांगीं कुष्ठीं च विशीलकुलसंभवां ग्रंथिस्फुटितशीर्णांगीं रक्तपुष्पव्रणांकितां जात्यं
धां केकरां काणां कुरूपां तनुलोमशां संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां अथ फलवि
शेषे पूज्या कुमारीविशेषः ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां लाभार्थे वैश्यवंशोत्थां सु
तार्थे शूद्रवंशजां दारुणे चांत्यजातीयां पूजयेद्विधिना नरः अत्र नित्यनैमित्तिकपूजांगकुमा

रीपूजास्तु उक्तजातिषु सर्वे सर्वाभे उत्तरोत्तरा श्रेष्ठेति अथ पूज्यस्ववासिनीलक्षणानि
स्वरूपा तरुणी शान्ता नुकूला मुदिता शुचिः शंकाहीना भक्तियुक्ता शुद्धशास्त्रोपयोगिनी अ
लोलुपा सुशीला च स्मिता स्यात्प्रियवादिनी गुरुदैवतसंयुक्तास्तचित्ता कौलिकप्रिया विमत्स
रा विशेषज्ञा देवताराधनोत्सुका मंत्रतंत्रसमायुक्ता समयाचारपालिका मनोहरा सदाचारा
शक्तिरेखा सुलक्षणा अथ वर्ज्यपूज्यस्ववासिनीलक्षणानि दुष्टा उग्रा कर्कशा स्तब्धा कुत्सिताकुल
दूषिका दुराचारा परार्थीनाभावहीना तत्सर्वलसा निद्रासक्ता तिदुर्मेधा हीनांगी व्याधिपीडि
ता दुर्गंधा दुःखिता मूर्खा हृष्टोन्मत्ता रहस्यभित् कृतकौतुकत्सिता लापा निर्लज्जा कलहप्रि
या विरूपोन्मार्गगा क्रुद्धा पंग्वंधा विकृतानना ईदृशीं मंत्रयुक्तां च शक्तियोगे विवर्जयेदिति
इत्येन नवरात्रपूजा चैत्रादि फाल्गुणान्तेषु द्वादशमासेषु चैत्राषाढाश्विनपुष्याख्यामासचतुष्ट
ये चैत्राश्विनमासयोर्वाश्विने वा शुक्लपक्षेषु यथाविभवविस्तरे कार्यापि तत्र नवरात्रकरणाशा
क्तौ तृतीयादिनवम्यंते सप्तरात्रं पंचम्यादित्रिरात्रं वा नक्तं तत्तत्तिथिकुमारीपूजनादिभिर्नवरात्रो
त्सवं कुर्यात् एवमन्ये पि नैमित्तिकपूजाविशेषा बहवः संति ते त्वत्र ग्रंथगौरवभयान्नलिखि

श्री
१८६

186

ताः तेन साधकैः गुरुतः प्राप्तव्रतस्य ज्ञातव्याः अथ कार्तिके मासे पूर्णिमायां कुंकुमेन देवीं सम
भ्यर्च्य रात्रौ कुंडस्थंडिलादावग्निस्थापनं कृत्वा नित्यहोमक्रमेणैव हुत्वा पिष्टमयैर्घृतपूरितैः
कर्पूरवर्तिदीपितैः प्रदीपैः सांगायै सावरणायै देवीं दीपदानं कुर्यात् तत्र तत्समये भूतले सिंदूरादिना
विपुलं श्रीचक्रं विरच्य तत्र देवीमावाह्य संपूज्य मध्ये बिंदुचक्रे षोडश दीपान् शर्करागुडमि
श्रयवगोधूमादिपिष्टरचितान् कर्पूरगर्भवर्तिकान् घृतपूरितान् प्रज्वालितान् मूलविद्यया
मूलदेवतायै स्थापयित्वोत्सृज्य नित्यादिश्रीचक्रे पूज्य समस्तदेवताभ्यः तत्तत्पूजास्थाने तत्त
न्मंत्रेण तत्तदग्रे एकमेकं दीपं स्थापयित्वोत्सृजेत् एतावत्करणाशक्तौ एकस्मिन् स्वर्णादि
भाजनेन नवयोनिचक्रं अष्टदलकमलं वा कुंकुमादिना निर्माय तस्मिन् यथोक्तरूपान् नवदी
पान् मध्ये स्वयोनिषु दलेषु वा संस्थाप्य देवीमभ्यर्च्योत्सृज्य समर्पयेत् अथ मार्गशीर्षमा
सि पूर्णिमायां कर्पूरयुक्तनारिकेरजलैरर्घ्यस्थापनं विधाय स्रग्गंधपुष्पादिभिः संपूज्य
माषपिष्टनिर्मिताश्वपैर्नैवेद्यं च कुर्यात् अथ पौषमासि पूर्णिमायां देवीं संपूज्य शर्करायुक्तं
गुडयुक्तं वा गव्यं दुग्धं नैवेद्यं दद्यात् अथ माघमासि पूर्णिमायां श्लोकैः कृसरैर्वा तिलैर्देवीं सावरणां

संपूज्य शर्कराज्यापूपादिनैवेद्यं च निवेदयेत् अथ फाल्गुणे मासि पूर्णिमायां पंकजैः स्वर्णर
जतपुष्पैः कल्हारैर्मधूकपुष्पैश्च देवीं संपूजयेत् इति श्रीमन्नैमित्तिकपूजा ॥

श्री
१८७

187

श्री विद्याचन्द्र सामरस